UNIVERSAL
LIBRARY

OU_184401

UNIVERSAL
LIBRARY

OUP—391—29-4-72—10,000.

OSMANIA UNIVERSITY LIBRARY

Call No. S29A·1 VAIR Accession No. PG S857

Author

Title ऋग्वेद व्याख्या

PT-2-1947.

This book should be returned on or before the date last marked below.

*The Adyar Library Series—No. 61*

## BESANT CENTENARY VOLUME

GENERAL EDITOR:

G. SRINIVASA MURTI, B.A., B.L., M.B. & C.M., VAIDYARATNA
*Director, Adyar Library*

# ṚGVEDAVYĀKHYĀ

## MĀDHAVAKṚTĀ

## PART II—AṢṬAKA I, ADHYĀYAS V TO VIII

# ṚGVEDAVYĀKHYĀ

## MĀDHAVAKṚTĀ

PART II—AṢṬAKA I, ADHYĀYAS V TO VIII

EDITED BY

DR. C. KUNHAN RAJA

*Head of the Department of Sanskrit, University of Madras*

THE ADYAR LIBRARY

1947

Printed by C. Subbarayudu, at the Vasanta Press,
The Theosophical Society, Adyar, Madras
P. I. C. No. 85—25-9-1947.

# PREFACE

WITH this volume closes the available portion of this very rare commentary on the *Ṛgveda* by Mādhava. The first volume containing the first four *Adhyāyas* of the first *Aṣṭaka* was published as No. 22 in the Adyar Library series in 1939. The whole portion was also issued through the Bulletin of the Adyar Library. This second instalment was taken up in 1943, and 64 pages (473-536) were published in the Bulletin in 1943, February and May and in May 1944. For various reasons, there were difficulties in speedily carrying on the printing of the work, and we had to discontinue the publication of further parts in the Bulletin. Although I regret very much the delay in issuing this part, I have the great satisfaction that this delay has enabled me to publish it on the occasion of the Centenary celebration of Dr. Annie Besant, in October, 1947. Along with this celebration, the Library is celebrating its Diamond Jubilee, after completing sixty years in December, 1946. It is a great privilege to associate one's literary activities with such great events. This volume being issued as the Besant Centenary Volume, is being published in the 61st year of the Library, and it bears the No. 61 in the Library Series; it is a very happy and auspicious coincidence.

After the first part was published, Dr. Lakshmana Sarup had been publishing the commentary on the *Ṛgveda* by Mādhava, son of Veṅkaṭārya, called the *Ṛgarthadīpikā*. By the time I could see the copy, I had printed a part of this second instalment of the commentary by this other Mādhava. I had to keep the whole publication uniform; further I have included the commentary of Mādhava, son of Veṅkaṭārya, for the sake of comparison with the commentary of this Mādhava, and it would be easier to make that comparison if the two commentaries are published side by side. For these reasons, I have continued to add the commentary of Mādhava, son of Veṅkaṭārya, in spite of the fact that the commentary is available in the edition of Dr. Sarup. In adding this commentary of Mādhava, son of Veṅkaṭārya, I have utilised the manuscripts of the work in the Adyar Library. Since this part of the edition has no pretension to being a critical presentation, I have not utilised all the material available in the edition of Dr. Sarup, though I have consulted it and have profited by it.

The palm-leaf manuscript of the commentary of Mādhava, in the Adyar Library, the only manuscript of the work till now known, on which this edition is based, has been my constant companion for many years now. When I have completed examining the manuscript for the preparation of this edition, I feel that the parting of company with this manuscript would be more painful than parting company with a dear friend after many years of close association. But

I am happy that after years of toil and much strain for my eyes, I have been able to give a new body to this very rare commentary for the *Ṛgveda*, perhaps the earliest now known.

The date of the commentary, the identity of the author, his chronological relation with other authors, especially Mādhava, son of Veṅkaṭārya—there are many matters that need very close examination. There are points where there is close resemblances between this commentary and the commentary of Mādhava son of Veṅkaṭārya; sometimes there is a complete identity even in wording. But there are many differences also.

It cannot be said that this commentary gives any fresh interpretation of the text of the *Ṛgveda*. What is important in these commentaries is that there are many interesting remarks in the course of the commentary. They have to be collected and presented in an orderly form. Specially noteworthy is the remark about the *Galitas* in the *Padapāṭha* of the *Ṛgveda*. Another interesting point is the suggestion that in *Sūkta* 117, a *Sūkta* must have ended with the 10th verse and that the remaining 15 verses must be a separate *Sūkta*. There are many other important and interesting remarks made in the course of the commentary. I have to defer a critical consideration of these problems for a detailed Introduction, along with various indices and appendices that would form a separate volume in this set.

On this day when this volume is being issued, we are celebrating the Centenary of the birth of Dr. Annie

Besant. Although I am not able to see her now with my physical eyes, she is able to see us all, in spite of the fact that she put aside her physical body fourteen years ago. When I dedicate this volume to her sacred memory, I know that she would be immensely pleased with this further addition to the literary activities of the Library. The *Ṛgveda* connects us with the past of humanity many millenniums ago, through this long interval of time, and will unify the present generation with the future generation of humanity even many millenniums hence. The *Ṛgveda* is the product of the Indian soil; but it is a common heritage of humanity from the ancient times. To Dr. Annie Besant, this unity of man separated by so many millenniums is a matter of personal experience, though to men of my nature, it can at best be only a belief.

I dedicate this humble result of my years of labour as a token of my gratitude to her for all the encouragement she has shown me in my life. She it is that put me on the Path. I place this volume at her feet as an offering from a devotee, with the following prayer:

वाचामधीश्वरी देवी साक्षाच्छ्रीः सर्वमङ्गला ।
वसन्ताम्बा चिरं जीयात त्रिमूर्तीनामनुग्रहात् ॥

*Adyar Library* C. KUNHAN RAJA
1st Oct. 1947

## पञ्चमोऽध्यायः

**प्र मन्महे शवसानाय शूषमाङ्गूषं गिर्वणसे अङ्गिरस्वत् ।**
**सुवृक्तिभिः स्तुवत ऋग्मियायार्चामार्कं नरे विश्रुताय ॥**

प्रमन्महे । प्रब्रूमो बलमाचरते सुखकरमाङ्गूषं[1] गिर्वणं[2] गिर्वणसेऽङ्गिरोवत् स्तुतिभिः स्तुवते ऋषयेय[3] ऋग्मयेऽर्चनीयो[4] भवति । यदि वा स्तुवते स्तूयमानाय यज्वने वदामार्कं स्तोमम् । येनार्चति सोऽर्कः । नरे नेत्रे । विश्रुताया[5] । नरे नर्याय नृतमाय नृणाम्[6] ॥ (ऋ. वे. ४. २५. ४)

प्रमन्महे प्रब्रूमः बलाचरणशीलाय बलकरणं स्तोमं गीर्भिर्वननीयाय अङ्गिरोवत् । स्तोत्रैः स्तुवते पुरुषाय य ऋगर्हः स्तुत्यो भवति तस्मै ब्रूमः स्तोत्रं नृषु प्रसिद्धाय ॥ (१)

**प्र वो महे महि नमो भरध्वमाङ्गूष्यं शवसानाय साम ।**
**येना नः पूर्वे पितरः पदज्ञा अर्चन्तो अङ्गिरसो गा अविन्दन् ॥**

[1] The anusvāra before गू in आंगूषं worm-eaten and missing.

[2] गिर्वणं extra.

[3] य after ये extra.

[4] Read ऋग्मयो.

[5] Read विश्रुताय.

[6] Perhaps to add इति after this.

प्र वः । प्रहरध्वं वो यूयम् । महते महत् स्तोत्रं इन्द्राय । तदेवाङ्गूष्यमुक्थ्यम् । शवसानाय सा + + + +[1] प्रभृतानां गवां मार्ग +[2] । अर्चन्तः तदस्थानि[3] कर्माणि कुर्वाणाः ता गाः अन्वगच्छन् ॥

प्र वो महे । प्रभरध्वं यूयं महन्नमः महते इन्द्राय आङ्गूषाईमनुशंसनीयं शवसानाय साम । येनेन्द्रेण अस्माकं पितरः अङ्गिरसः पणिभिरपहृतानां गवामावासस्थानज्ञाः स्तुवन्तः पशूनविन्दन् ॥ (२)

**इन्द्रस्याङ्गिरसां चेष्टौ विदत्सरमा तनयाय धासिम् ।**
**बृहस्पतिर्भिनदद्रिं विदद्गाः समुस्रियाभिर्वावशन्त नरः ॥**

इन्द्रस्य । इन्द्रस्याङ्गिरसां च प्रेषणे सति अलभत सरमा स्वसन्तानायान्नम् । तथा च सुमेति भा + + + + +[4] या नो गा अन्वधिङ[5] इति । सरमया निवेदितासु गोषु बृहस्पतिः अहिनदह्रिम्[6] । अविन्दच्च गाः । संवावशन्त संजग्मिरे गोभिः । नरो देवाः । उस्रिया गावः उत्सरन्तीति । अभि श्यावं न कृश (ऋ.वे. १०.६८.११) + + + +[7] बृहस्पतिभिनत् इति पादो[8] न सृष्टः । तत्र देवता बृहस्पतिरिति ॥

[1] This is in the first line of a new leaf, the end of which is broken off for four inches. So there is a break of about 20 letters in every line on this sheet.

[2] Read मार्गज्ञाः The last letter is completely worm-eaten.

[3] Read तदन्तस्थानि.

[4] Break in the line. Passage unintelligible.

[5] Not clear.

[6] Read अभिनदद्रिम्.

[7] Break in the line. After कृश the ए mark of the next letter partly seen.

[8] This is the fourth pāda in it.

इन्द्रस्याङ्गिरसां च प्रेषणे सति अविन्दत् सरमा नाम देवमातृस्थानीया देवानां पुत्रेभ्यो देवेभ्यः गवात्मकमन्नम्। ज्ञाते चान्ने गवामावरणं शैलं बृहस्पतिः अभिनत्। अविन्दच्च गाः। ततः संवावशन्तैच्छन् कामान् भोक्तुं नेतारो देवाः ॥ (३)

**स सुष्टुभा स स्तुभा सप्त विप्रैः स्वरेणाद्रिं स्वर्यो३ नवग्वैः।**
**सरण्युभिः फलिगमिन्द्र शक्र वलं रवेण दरयो दशग्वैः ॥**

स सुष्टुभा। सुष्टोभनेन[1] स्तुभा स्तोत्रेण। तच्छब्दो द्वितीयः पूरक एव। सप्तभिः ऋषिभिः प्रयु + + + +[2] रूपेण[3] स्वरेणेति। स्वरः स्तोभः।.एतेनाद्रिम्। स्वर्योऽभिगन्ता स्तुत्यो वा।नवयैः[4] अङ्गिरोभिः सरणमिच्छद्भिः। फलिङ्गं[5] बलम्। फलिर्भेदनकर्मा। विन्दे + + + +[6] यो विदारितवानासीत्[7]। दशग्वैरङ्गिरोभिरिति ॥

स इन्द्रः स्तोत्रेण शोभनेन सप्तभिः ऋषिभिः प्रयुज्यमानेनागतबलः। सिंहनादेनाद्रिं स्वरणकुशलः अङ्गिरोभिः सह दारयति तदनुसरणमिच्छन्। दशग्वैरङ्गिरोभिर्वेष्टयितारं फलिगं मेघाकारं बलमसुरमिन्द्र शक्र दारितवानसि। नवभिर्मासैरङ्गिरस्सु सत्रमासीनेषु केचन पशूनलभन्त। दशभिरपरे। ततः नवग्वा दशग्वाश्च उच्यन्ते। यास्कस्त्वाह नवगतयो नवनीयगतयो वा—इति ॥(४)

[1] Read स सुष्टोभनेन or it may be that pratīka is not separately given.

[2] Break in the line.

[3] रूपेण much injured; only a conjecture.

[4] Read नवग्वैः.

[5] Read फलिगं.

[6] Break in the line. ए mark in न्दे injured; only a conjecture.

[7] रि after विदा completely worm-eaten.

**गृणानो अङ्गिरोभिर्दस्म वि वरुषसा सूर्येण गोभिरन्धः ।**
**वि भूम्या अप्रथय इन्द्र सानु दिवो रज उपरमस्तभायः ॥**

गृणानः स्तूयमानस्त्वमङ्गिरोभिरिति[1] । गृणानः । स्तूयमानस्त्वमङ्गिरोभिः दस्म विव्रतवानसि[2] उषसा सूर्येण + + + +[3] ति । व्यप्रथयश्च[4] भूम्या इन्द्र समुछ्रितम् । विषमामिमां समां कृतवान् । वि दिवो रजसो मूलमस्तभ्नाः ॥

उपस्तूयमान अङ्गिरोभिरुपक्षपयितः विवारितवानसि उषसा सूर्येण च सहायाभ्यां पशुनिमित्तमन्धकारम् । भूम्याश्च उच्छ्रितं देशं व्यप्रथयो विषमां समीचकर्थ । दिवो लोकस्य मूलं अधः स्थित्वा अस्तभ्नाः ॥ (५)

**तदु प्रयक्षतममस्य कर्म दस्मस्य चारुतममस्ति दंसः ।**
**उपह्वरे यदुपरा अपिन्वन् मध्वर्णसो नद्यश्चतस्रः ॥**

तदु । तदेव पूज्यतममस्य कर्म भवति । दस्मस्य चारुतममस्ति दंसः कर्मैं + + + +[5] पृथिव्यामुप्ताश्चतस्रो नदीरपिन्वत् । चतस्रो नूनं प्रधानभूता नद्यः । ह्वरतिर्गत्यर्थ इति ॥

तदेव पूज्यतमं अस्य कर्म दर्शनीयस्य कल्याणतममस्ति कर्म । किं तदित्याह—उपह्वरे—इति । चतस्रः दिशः मधूदकाः नदीः मनुष्यसमीपे यद्दुहत् । दिग्भ्यो नदीर्मनुष्यान् प्रापयति ॥ (६)

[1] This passage is not wanted : it is a repetition.
[2] Read विवृतवानसि.
[3] Break in the line. ण only partly seen.
[4] व्यप्र mostly worm-eaten.
[5] Break in the line.

द्विता वि वव्रे सनजा सनीळे अयास्यः स्तवमानेभिरर्कैः ।
भगो न मेने परमे व्योमन्नधारयद्रोदसी सुदंसाः ॥

द्विता । द्वैधं विवव्रे सनजा पूरणजननेन[1] सनीळैः स + + + +[2] नेहिरर्कैः[3] । भग आदित्य इव । परमे नहसि[4] । अधारयद्रोदसी सुकर्मा ॥

द्वैधं विवव्रे चिरजाते एकाधारे द्यावापृथिवी स्तूयमानैः स्तोत्रैरिन्द्रः गमनकुशलः । भग इव अहोरात्रे परमे व्योमन्नयन्तरिक्षे द्यावापृथिव्यौ धारयति सुकर्मा ॥ (७)

सनाद्दिवं परि भूमा विरूपे पुनर्भुवा युवती स्वेभिरेवैः ।
कृष्णेभिरक्तोषा रुशद्भिर्वपुर्भिरा चरतो अन्यान्या ॥

सनात् । चिरादेवारभ्य दिवं भूमिं च परिचरतः । नानारूपे पुनः पुनः जायमा + + + +[5] श्वेतैरेवं[6] वपुर्भिस्तेजोभिराचरतो अन्यान्या । पुनः पुनश्चरतं इत्यर्थः ॥

चिरादारभ्य दिवं भूमिं च लक्षीकृत्य नानारूपे पुनः पुनर्जायमाने तरुणे स्वैर्गमनैरहोरात्रे चरतः । रात्रिः कृष्णैर्वर्णैश्चरति । श्वेतैरहः । एवं अन्यान्या चरतः । एकस्या उपर्यन्या । तस्या उपर्यन्या इति ॥ (८)

[1] Read पुराणजननेन.
[2] Break in the line.
[3] Read नेभिरर्कैः.
[4] Read नभसि.
[5] Break in the line.
[6] Perhaps to read श्वेतैः । एवं.

सनेमि सख्यं स्वपस्यमानः सूनुर्दाधार शवसा सुदंसाः ।
आमासु चिद्दधिषे पक्कमन्तः पयः कृष्णासु रुशद्रोहिणीषु ॥

सनेमि । पुराणं सख्यं शोभनानि कर्माणि चरन् । सूयमानः शवसा शवसः पुत्रः । बलीत्यर्थः + + + +[1] त्वं पयोऽन्तर्धारयसि । अपि च कृष्णासु रीहिणीषु च । तास्वन्तः श्वेतमया रयः पय इति[2] ॥

पुराणं सख्यं शोभनानि कर्माणि इच्छन् शवसा स्तूयमान इति इन्द्रं बलवत्तया आह—ओजसो जातमुतमन्य एनम्—इति मन्त्रः । सुकर्मा त्वम् । आर्द्रासु कृष्णासु रोहिणीषु च गोषु पक्वं श्वेतं च पयः अन्तः धारयति ॥ (९)

सनात्सनीळा अवनीरवाता व्रता रक्षन्ते अमृताः सहोभिः ।
पुरु सहस्रा जनयो न पत्नीर्दुवस्यन्ति स्वसारो अह्रयाणम् ॥

सनात् । सनादेवारभ्य एकपाणिनिलया अवनीरङ्गुल्यो भ + + + +[3] वन्ति । सहोभिरमृताः भूयो भूयः कार्यकरणेऽपि ग्लानिमगच्छन्त्यः । पुरूणि सहस्राण्यजनय[4] इव पत्न्यः परिचरन्त्यङ्गुल्यः[5] इन्द्रम् । अश्रीतशमनम् इति यास्कः[6] । जिह्वेतेरिति कि + + + +[7] ॥

चिरादारभ्य पाणेरेकस्मादुत्पन्ना अङ्गुल्यः सुश्लिष्टाः कर्माणि रक्षन्ते कार्यकरणवेगैरग्लानाः । पुरूणि सहस्राणि इन्द्रार्थं जनयः पत्न्य इव पुमांसं अह्रितयानमिन्द्रं अङ्गुल्यः परिचरन्ति ॥ (१०)

[1] Break in the line.
[2] Not quite clear.
[3] Break in the line.
[4] Read सहस्राणि जनय.
[5] Read परिचरन्त्योऽङ्गुल्यः
[6] Read अह्रीतगमनं इति यास्कः (नि. ५. १५).
[7] Break in the line. Not clear.

सनायुवो नमसा नव्यो अर्कैर्वसूयवो मतयो दस्म दद्रुः ।
पतिं न पत्नीरुशतीरुशन्तं स्पृशन्ति त्वा शवसावन् मनीषाः ॥

सनायुवः । प्रत्नाः । युमेत्वर्थीयः । नमस्कारेण वसुकामाः स्तोतारो दस्म ददुः । त्वां प्रति गच्छन्ति । यस्त्वं स्तुत्यो भवस्यर्कैः । पतिमिव पत्न्यः कामयमानाः । का + + + +[1] ॥

चिरत्वमाश्रयन्तः नवतराः नमस्कारेणार्कैश्च धनकामा मम मतयः स्तुतयो मत्तः निर्गच्छन्ति । ततस्ताः पतिमिव पत्न्यः कामयमानाः कामयमानं त्वां स्पृशन्ति बलवन् ॥ (११)

सनादेव तव रायो गभस्तौ न क्षीयन्ते नोप दस्यन्ति दस्म ।
द्युमाँ असि क्रतुमाँ इन्द्र धीरः शिक्षा शचीवस्तव नः शचीभिः ॥

+ + + चिरादेव[2] धनानि बाहौ[3] स्थितानि न क्षीणानि भवन्ति । न चोपस्तामि[4] भवन्ति । दर्शनीय दीप्तिमानसि कर्मवांश्चेन्द्र धृष्टः । प्रयच्छ शचीवः तव कर्मभिरस्मभ्यं धनम् ॥

चिरादेव तव धनानि हस्ते स्थितानि न च नश्यन्ति न च न्यूनीभवन्ति दर्शनीय । दीप्तिमानसि कर्मवश्च इन्द्र । धृष्टः प्रयच्छ कर्मवन् तव प्रज्ञाभिः अस्मभ्यम् ॥ (१२)

[1] Break in the line.

[2] Perhaps only the pratika सनात् missing.

[3] There should be तव before बाहौ.

[4] Read चोपदस्तानि.

**सनायते गोतम इन्द्र नव्यमतक्षद्ब्रह्म हरियोजनाय ।**
**सुनीथाय नः शवसान नोधाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥**

सनायते + + + +[1] मिन्द्र गौतमस्य पुत्रो नूतनमकरोत्[2] ब्रह्म हरियोजनाय । गोतमो गन्तृतम ऋषिः । सुनयनायास्माकं शवसान. नोधा अयमिति[3] ॥

चिरन्तनत्वमनुपालयते गोतमः नोधाः इन्द्र तुभ्यं नवतरं स्तोत्रमकरोत् । अश्वान् यो योजयति गमनाय । शोभननयनायास्माकं बलाचरणशील । न्त्योपसंहारार्था । उपान्त्यया धनमाशास्ते । धनार्थाः स्तुतय इत्युवाच—सनायुवो नमसा—इति ॥ (१३)

---

**त्वं महाँ इन्द्र यो ह शुष्मैर्द्यावा जज्ञानः पृथिवी अमे धाः ।**
**यद्ध ते विश्वा गिरयश्चिदभ्वा भिया दृळ्हासः किरणा नैजन् ॥**

त त्वं[4] महान् । त्वं महनीयोऽसीन्द्र य + + + +[5] वी + मेदहयो[6] दधासि यस्य खलु तव व्याप्तानि भुवनानि तथा शिलोच्चयाः ।

[1] Break in the line.

[2] नूत completely worm-eaten.

[3] There is no figure to mark the end of the Sūkta. There is an extra त after this, just before the pratika of the next Sūkta. Perhaps this is figure 1.

[4] त before त्वं not wanted. See previous note.

[5] य only partly seen. Then line breaks.

[6] Read पृथिवी अमे भये for वी+मेदहयो

असा[1] अभृतानि महान्ति च भयेनात्यन्तदृढा[2] अपि भुवनादयः किरण + + + +[3] ॥

त्वं महानिन्द्र यः खलु बलैर्द्यावापृथिवी प्रादुर्भवन् भये अधाः। यस्माच्च तव गिरयोऽपि व्याप्तेन महता भयेन दृढा अपि रश्मय इव चलनस्वभावाः कम्पन्ते। स त्वं महान् इति ॥ (१)

**आ यद्धरी इन्द्र विव्रता वेरा ते वज्रं जरिता बाह्वोर्धात्।**
**येनाविहर्यतक्रतो अमित्रान् पुर इष्णासि पुरुहूत पूर्वीः ॥**

आवेः आयोजयसि यदा त्वं + [4]विधकर्मणावश्वौ स्वरथेन तदनन्तरमेवादधाति तव बाह्वोः स्तोता स्तोत्रेण वज्रम्। येन वज्रेणाबाधितकर्मन् शत्रूनभिगच्छसि पुरुहूत बह्वीः पुरश्च ॥

यदा इन्द्र विविधकर्माणावश्वौ रथे योजयसि तदनन्तरमेव आदधाति तव बाह्वोः स्तोता वज्रं स्तुत्या। येन वज्रेण अबाधितकर्मन् अमित्रान् तत्पुरश्च बह्वीः प्रेरयसि पुरुहूत ॥ (२)

**त्वं सत्य इन्द्र धृष्णुरेतान् त्वमृभुक्षा नर्यस्त्वं षाट्।**
**त्वं शुष्णं वृजने पृक्ष आणौ यूने कुत्साय द्युमते सचाहन् ॥**

[1] सा partly worm-eater. Read अभ्वा for असा. It is definitely not भ्वा.

[2] य in ये worm-eaten.

[3] Line breaks. This is the last line in the broken leaf.

[4] वि before विध omitted and space left blank. Read विविध.

त्वम् । त्वं मर्य[1] इन्द्र धर्षयितैतानभिगतान् शत्रून् । किञ्च त्वभ्र-भुक्षाः[2] । ऋभुक्षदीतेषु निवसम्महन्नामसुपठितम्[3] । नर्यस्त्वमभिभविता । त्वं शुष्णासुरम् । व्रजने[4] व्रक्ष[5] आणाविति त्रीणि संग्रामनामानि । इह तु पूर्वे विशेषणे । वृधिः छेदनार्थः । पृचः[6] संपर्कार्थः । अणिः निखननार्थः । यूने कुत्साय दीप्तिमते । सचा सहकारी । तवानिति[7] । त्वं कुत्सशुष्ण-हर्म्येष्वाविथ (ऋ. वे. १. ५१. ६) इति[8] ॥

त्वं सत्यकर्मा इन्द्र धर्षयसि एतानमित्रान् । त्वं महान् नृहितः । त्वं सहसे सपत्नान् । त्वं शुष्णासुरं शत्रूणां छेदके इतरेतरसंपर्चने युद्धे यूने कुत्साय दीप्तिमते सहायभूतः हतवानसि ॥ (३)

**त्वं ह त्यदिन्द्र चोदीः सखा वृत्रं यद्वज्रिन् वृषकर्मन्नुभ्नाः ।**
**यद्ध शूर वृषमणः पराचैर्वि दस्यूँर्योनावकृतो वृथाषाट् ॥**

त्वं ह । त्वं खल्वेतदचूचुदस्सखा सन् व्रत्रस्यैव[9] युद्धे तस्य चोदनम् । यदा व्रत्रमाष्टक[10] शत्रुं वर्जिन्[11] वर्षणशीलकर्मन्नुभ्नाः ।

[1] What is written also looks like त्वममाय. There is नर्य later and it is taken up there also. Here सत्य is omitted.

[2] Read त्वमृभुक्षाः.

[3] Nigh 3-3. Read ऋभुक्षाः इति महन्नामसु पठितम्.

[4] Read वृजने.

[5] Read पृक्ष.

[6] Read पृचिः.

[7] Read हतवानिति.

[8] Read त्वं कुत्सं शुष्णहत्येष्वाविथ.

[9] Read वृत्रस्यैव.

[10] Read वृत्र for व्रत्र. आष्टक unintelligible.

[11] Read वज्रिन्.

हिंसार्थश्चोभाति[1] । यदा खलु शूर वर्षणमनस्क कुत्सस्योपयितृछत्रून्[2] योनौ विकृत्तवानसि अनायासेनाभिभविता शत्रूणाम् । योनिर्युद्धं योनेः[3] मिश्रणार्थादिति ॥

त्वं खल्वेदचूचुदः सखा सन् सख्युः कुत्सस्य वर्तयितारं शुष्णं यदा वज्रिन् वर्षणशीलकर्मन् तेजोभिर्बाधकैः पूरितवानसि । यदा खलु शूर वर्षणपरमनस्क कुत्सस्य शत्रून् पराचीनं कुत्सावासे विकृत्तवानसि अनायासेन शत्रूनभिभवन् । तदा शुष्णं तत्सहायांश्च अचूचुद इति ॥ (४)

**त्वं ह॒ त्यदि॑न्द्रारि॑षण्यन् दृ॒ळ्हस्य॑ चि॒न् मर्ता॑ना॒मजु॑ष्टौ ।**
**व्य१॒॑स्मदा॒ काष्ठा॒ अर्व॑ते वर्घ॒नेव॑ वज्रि॒ञ्छ्नथिह्य॒मित्रा॑न् ॥**

त्वं ह । त्वं ह त्यदिन्द्राहिंसन् दृढमपि मर्तानां यद्यप्रीतिर्भवेत् । त्वमस्माकमर्वतेऽश्वाय काष्ठा दिशो विचः[4] विवृणुहि । घनेव वज्रीश्नधीहि[5] अमित्रातीति[6] ॥

त्वमेतदिन्द्राहिंसन् दृढमपि पुरुषं मनुष्याणामप्रीतौ । न हंसि मनुषहितमित्यर्थः । स त्वमद्यास्माकं युद्धे प्रवेशार्थं अश्वानां दिशः । त्वमेतत् आ विवः । प्रवेशयाश्वान् संग्राममध्ये इत्यर्थः । स त्वं घनेन लोहपिण्डमिवामित्रान् श्नथिहि कुरु नानादिक्कान् इति ॥ (५)

[1] Not clear. Perhaps to read हिंसार्थश्चेह भातिः. The letter between श्चे and तिः worm-eaten.

[2] Read कुत्सस्योपक्षपयितॄन् शत्रून्.

[3] Read यौतेः.

[4] Read विवः.

[5] Read वज्रिन् श्नथिहि.

[6] Read मित्रानिति.

त्वां ह त्यदिन्द्रार्णसातौ स्वर्मीळ्हे नर आजा हवन्ते ।
तव स्वधाव इयमा समर्य ऊतिर्वाजेष्वतसाय्या भूत् ॥

त्वां ह । त्वां ह त्यदिन्द्र अर्णसाता[1] । अर्णोर्गन्तृभिः[2] भजनीये सममीळेह यनप्रदेन रजा[3] भवन्ते[4] साभाय्यार्थम्[5] । अपि वोदक-सा तिरर्णसातिः । वृत्रेणोदकार्थं योद्धुमित्यर्थः । तव बलवान् इयमाभवतु रक्षा संसंग्रामे[6] या वाजेषु युद्धेष्वतसाय्या अभिगन्तव्या योद्धृभिः । अनेस्सायो[7] नामकरण इति ॥

त्वां खल्वेतदिन्द्र उदकस्य दातरि सर्वस्य सेचके मनुष्या मेघैः सह युद्धे तदर्थं हवन्ते । तवान्नवन् इयमूतिर्युद्धेषु समाश्रयणीया समनुष्ये प्रदेशे अस्मद्रक्षणायाभूत ॥ (६)

त्वं ह त्यदिन्द्र सप्त युध्यन् पुरो वज्रिन् पुरुकुत्साय दर्दः ।
बर्हिर्न यत् सुदासे वृथा वर्गंहो राजन् वरिवः पूरवे कः ॥

त्वं ह । त्वं खल्वेतमिन्द्र सप्त युध्यन् पुरो वज्रिन् पुरुकुत्साय ऋषये दानितरितवानसि[8] । सप्तयत् पुरजर्मशारीरदीर्दत्[9] । किञ्च बर्हि-

[1] Read अर्णसातौ.

[2] Read अर्णोर्गन्तृभिः.

[3] Read स्वर्मीळ्हे । धनप्रदे आजा. Not quite satisfactory.

[4] Read हवन्ते.

[5] Read साहाय्यार्थम.

[6] One सं in the beginning unnecessary.

[7] Read अतेस्साय्यो.

[8] Read दारितवानसि.

[9] R.V, 1-174, 2. Read सप्तयत् पुरः शर्म शारदीर्दत,

रिवाध्वर्युः यद्धनं होसुरस्य[1] अनायासेनाच्छिन्नः[2] तद्धरिवः सुदासे पूरवेऽलं पूरयते कृतवानसि । सप्त यत् पुरजर्मशारर्दार्दत् किञ्च बर्हिरिवाध्वर्युरध्वनम्[3] ॥

त्वमेतदिन्द्र पुरुकुत्साय ऋषये सप्त पुरः युध्यन् दारितवानसि । किं च सुदासे राज्ञे तदर्थं अहोरसुरस्य यद्धनं बर्हिरिवानायासेन अच्छिनः तद्धनं राजन् पूरवे पूरयते कृतवानसि ॥ (७)

**त्वं त्यां नं इन्द्र देव चित्रामिषमापो न पीपयः परिज्मन् ।**
**यया शूर प्रत्यस्मभ्यं यंसि त्मनमूर्जं न विश्वध क्षरध्यै ॥**

त्वं त्याम् । नवक आद्यः पादः । त्वं तामस्माकं देव चित्रामिषमुदकानीव वर्धय परिज्मन् विम्मृतायाः[4] भूम्याः । यया भूर[5] त्वं प्रतियच्छस्मभ्यं[6] आत्मानं आत्मानम्[7] । उदकमिव + वेतः क + न्तमिति[8] ॥

त्वं तदन्नमस्माकं चित्रं । आप इव पीपयः परितो गमने । ययैषा शूर त्वमात्मानं अस्मभ्यमन्नमिव सर्वदा कामानां क्षरणाय प्रतियच्छसि । इन्द्र तव यागार्थं वर्धयान्नं इति ॥ (८)

[1] Read अंहोरसुरस्य.

[2] Read अनायासेनाच्छिनः.

[3] The whole passage from सप्त यत् here is a repetition.

[4] Read विस्तृताया.

[5] Read शूर.

[6] Read यच्छास्मभ्यं.

[7] Repetition of आत्मानं unnecessary.

[8] After उदकमिव the end of the leaf is very much damaged. र्वतः is clear; also क. Then one letter is completely lost and the line ends. The next line begins न्तमिति. Read उदकमिव सर्वतः क+न्तमिति.

अकारि त इन्द्र गोतमेभिर्ब्रह्माण्योक्ता नमसा हरिभ्याम् ।
सुपेशसं वाजमा भरा नः प्रातर्मक्षू धियावसुर्जगम्यात् ॥

अकारि । अकारि ते इन्द्र गोतमै[1] । तदेवाह—ब्रह्मण्योक्तानि[2] हविषा च षरिभ्यां[3] । अक्तोन्याभिमुख्येनोक्तानि[4] । स्वरूपं[5] । अन्नमाहरास्माकमिति ॥

अकारि ते इन्द्र गोतमैः । तदेवाह—ब्रह्माणि च ओक्तानि नमस्कारेण तव सहाश्वाभ्याम् । आ यद्धरी इन्द्र विव्रता—इत्यश्वयोः स्तुतिः । सुरूपमन्नं आभरास्मभ्यं इति ॥ (९)

---

वृष्णे शर्धाय सुमखाय वेधसे नोधः सुवृक्तिं प्र भरा मरुद्भ्यः ।
अपो न धीरो मनसा सुहस्त्यो गिरः समञ्जे विदथेष्वाभुवः ॥

वृष्णे । वर्षित्रे शर्धाय[6] सख्याय[7] । श्रुधिः उत्थानकर्म[8] । उत्तिष्ठति + + +[9] तरेतरोपबृंहितः शर्धं शर्धं वा एषामिति[10]. । सुमखाय

[1] Read गोतमैः.
[2] Read ब्रह्माण्योक्तानि.
[3] Read हरिभ्यां.
[4] Read ओक्तान्याभिमुख्येनोक्तानि.
[5] Read सुरूपं.
[6] र्धा partly worm eaten.
[7] Read सख्याय.
[8] It is not certain which root is meant. शृध् is the most likely. But it has only the following meanings: शृधु शब्दकुत्सायाम्, शृधु उन्दने and शृधु प्रहसने (प्रसहने). Read उत्थानकर्मा.
[9] The end of the line is damaged. Only an anusvāra and य after that visible in the middle.
[10] This looks like a quotation. Not clear.

शोभनधनाय । बहुव्रीहावपि[1] पूर्वपदे स्वरो मखे द्रष्टौ[2] । यद्वा मखिर्दान-कर्मा । शोभनो दाता सुमखः । वेधसे विधात्रे । मारुतनं[3] हि शर्धो विदधाति । उप + +[4] ष्णाणि[5] च फलानि च तस्मै स्तुतिं प्रभर । एतदेवाह । नोधस्सुवृक्तिं प्रहरा[6] मरुद्भ्य इति । तथा करोमीत्याभावो[7] प धीर इति । यथोदकान[8] धीरः शोभनाङ्गुलीकुत्सिजति[9] एवमहं मनसा पू + श्च[10] बह्वीर्गिरो मरुतां समञ्जेरं[11] योजयामि । या गिरो निरवद्यतया गिरो निरवद्यतया[12] विदथेष्वाभवन्ति ॥

वर्षित्रे मारुताय शर्धाय सुधनाय । नञ्सुभ्यामिति न दृष्टम् । अपि वा सुष्ठु प्रयच्छते विधात्रे स्तुतिं प्रभर । तदेवाह—नोधः त्वं स्तुतिं प्रभर मरुद्भ्य इति । आत्मानमित्थमुक्त्वा स्वयमेव तथा करोमि इति वदति—उदकानि धृष्टः शोभनाङ्गुलिकः कश्चित् यथोत्सिञ्चति एवमहमेषां यज्ञे प्रयोक्तुं योग्या गिरः मनसा समञ्जे संश्लेषयामि रचयामि इति ॥ (१)

[1] व completely worm-eaten before पि.

[2] Read दृष्टः.

[3] Read मारुतं.

[4] The letters ars very indistinct, as the end of the line is damaged. May be वुप or पुप (perhaps part of पुष्णा).

[5] ष्णाणि begins next line. णि must be for नि. Word uncertain.

[6] Read प्रभरा.

[7] Read तथा करोमीत्याह । आपो.

[8] Read यथोदकानि

[9] Read शोभनाङ्गुलीकः कश्चित् सिञ्चति.

[10] After पू a letter is omitted and space left blank. There is आ mark after the blank before श्च. Perhaps to read पूर्वीश्च.

[11] Read only समञ्जे. The letter र unnecessary.

[12] Repetition of गिरो निरवद्यतया unnecessary.

ते जज्ञिरे दिव ऋष्वास उक्षणो रुद्रस्य मर्या असुरा अरेपसः ।
पावकासः शुचयः सूर्या इव सत्वानो न द्रप्सिनो घोरवर्पसः ॥

ते । ते प्रादुर्भवन्त्यन्तरिक्षात् दर्शनीयाः सोक्तारो[1] रुद्रस्य मर्याः पुत्राः । मर्यशब्दो मर्त्यवचनः । इह तु पुत्रेषु पर्यवस्यति । असुरा अरेपसः शुद्धाः शोधका दीप्ताः सूर्या इव सत्वान इव च रुद्रस्य भूतानीव द्रप्सैरुकबिन्दुभिर्युक्ता[2] घोररूपाः ॥

ते प्रादुरभवन् द्युलोकात् दर्शनीयाः सेक्तारो रुद्रपुत्रा बलिनः अपापाः शोधकाः निर्मलाः सूर्या इव भूतानीव विप्रुड्भिर्युक्ता घोररूपाः । सिंहादयः सत्वान इति ॥ (२)

युवानो रुद्रा अजरा अभोग्घनो ववक्षुरध्रिगावः पर्वता इव ।
दृळ्हा चिद्विश्वा भुवनानि पार्थिवा प्र च्यावयन्ति दिव्यानि मज्मना ॥

युवानः । युवानो रुद्रा रुद्रपुत्रा अजरा अभोधनः[3] येन देवा भुञ्जन्ति तेषां हन्तारम्[4] । ववक्षुः वभवन्ति[5] अधृतगमनाः पर्वता इव दृढान्यपि व्याप्तानि भुवनानि भूतानि पार्थिवानि पच्यावयन्ति[6] दिव्यानि बलेन ॥

[1] Read सेक्तारो.

[2] Read द्रप्सैरुदकबिन्दुभिर्युक्ता.

[3] Read अभोग्घनः.

[4] Read हन्तारः.

[5] Read वहन्ति.

[6] Read प्रच्यावयन्ति.

तरुणा रुद्रपुत्राः देवानां अभोजयितॄणां अयजमानानां हन्तारः वहन्ति अमृतगमनाः शिलोच्चया इव । दृढान्यपि विश्वानि भुवनानि दिव्यान्यपि च बलेन प्रच्यावयन्ति ॥ (३)

**चि॒त्रैर॒ञ्जिभि॒र्वपु॑षे॒ व्य॑ञ्जते॒ वक्ष॑:सु रु॒क्माँ अधि॑ येतिरे शु॒भे ।**
**अंसे॑ष्वेषां॒ नि मि॑मृक्षुॠ॒ष्टय॑: सा॒कं ज॑ज्ञिरे स्व॒धया॑ दि॒वो नर॑: ॥**

चित्रैः । नानारूपैराभरणैर्वपुषे शोभार्थमलंकुर्वन्ति । वक्षस्सु रुक्मन्[1] हारान् अधियेतीरे प्रापयन्ति । शुभे शोभार्थो[2] तेषाम् । एषामंसेषु निषक्ता अभवन्नृष्टयः । तेऽमी सह प्रादुर्भवन्ति । घाणि धूतयो भृमिम्[3] । बलेन दिवः पुत्राः ॥

नानारूपैराभरणैः शोभार्थमङ्गानि अलंकुर्वन्ति । वक्षस्सु रौक्मान् कवचान् अधियातयन्ति शोभार्थम् । अंसेषु चैषां निषक्ता भवन्ति ऋष्टय आयुधविशेषाः । सह प्रादुर्भवन्ति बलेन दिवो नेतारः ॥ (४)

**ई॒शा॒न॒कृतो॒ धुन॑यो रि॒शाद॑सो॒ वाता॑न् वि॒द्युत॒स्तवि॑षीभिरक्रत ।**
**दु॒हन्त्यूध॑र्दि॒व्यानि॒ धूत॑यो॒ भूमिं॑ पिन्वन्ति॒ पय॑सा॒ परि॑ज्रय: ॥**

ईशानकृतः । ऐश्वर्यं कुर्वाणाः कम्पयितारो निशतामसितारो[4] वातान्विद्युतश्च बलैरकृण्वन् । दुभयन्ति[5] यद्दिव्यान्यभ्राणि धूतयो भूमिं पिन्वन्ति पयसा परितो गन्ताराः[6] । पेवनं आप्यायनमिति ॥

[1] Read रुक्मान्. [2] Read शोभार्थम्.

[3] घाणि धूतयो भृमिम् not wanted. There is a cross mark above the line before घाणि and a line is drawn below the line up to धू to indicate that the passage is to be deleted.

[4] Read रिशतामसितारो. [5] Read दुहन्ति.

[6] Read गन्तारः

स्तोतॄन् ईशितॄन् कुर्वाणाः कम्पयितारः रिशादसः वातान् विद्युतश्च वर्षार्थं बलैः कुर्वन्ति । दुहन्ति मेघं दिव्यान्युदकानि कम्पयितारः । भूमिमोषधीः दुहन्ति उदकेन परितो गन्तारः ॥ (५)

**पिन्वन्त्यपो मरुतः सुदानवः पयो घृतवद्विदथेष्वाभुवः ।**
**अत्यं न मिहे वि नयन्ति वाजिनमुत्सं दुहन्ति स्तनयन्तमक्षितम् ॥**

पिन्वन्ति । सिञ्चन्त्युदकानि मरुतः सुदानाः । तदेवोक्तम्—पयो घृतवत् सारवद्विदथेषु यज्ञेष्वाभवन्तः । यथादित्यं[1] मिहे युद्धार्थं विनयन्ति वाजिनः । एवं सेकाय विनयन्त्यभ्रं मरुतः । उत्सन्दुहन्ति स्तनयन्तमक्षितम् । उत्सो मेघ उत्सरन्त्यस्मादापः[2] इति ॥

पिन्वन्त्युदकानि मरुतः सुदानाः उदकं क्षरणवद्यज्ञेषु आभवन्तः । अन्तरिक्षात् ये दुहन्ति वर्षोदकमिति । घृतेन नो घृतप्वः पुनन्तु इति मन्त्रः । अश्वमिव बलिनं अमी सेचनाय मेघं शिक्षयन्ति । दुहन्ति च स्तनयन्तं अक्षीणं उत्साख्यं मेघम् ॥ (६)

**महिषासो मायिनश्चित्रभानवो गिरयो न स्वतवसो रघुष्यदः ।**
**मृगा इव हस्तिनः खादथा वना यदारुणीषु तविषीरयुग्ध्वम् ॥**

महिषासः । महान्तः प्रज्ञाप्राः[3] चित्रदीप्ताः पर्वता इव स्वबलाः शीघ्रस्यन्दनाः । मृगा इव हस्तवन्तः । गजास्तथोक्ताः । खातद[4] वानिनानि[5] यदारुणीष्व[6] वडवासु बलान्ययुङ्ध्वम् ॥

[1] Read यथात्यं.

[2] Cf. N. 10. 9. This is not what is found in N.

[3] Read प्राज्ञाः

[4] Read खादथ.

[5] Read वनानि,

[6] Read यदा आरुणीषु.

महान्तः प्राज्ञाः चित्रदीप्तयः पर्वता इव स्वबलाः बलमहत्तया लघुजवाः सिंहमृगा इव गजानरण्यानि परिगृह्य यूयं खादथ यदा अरुणवर्णासु बडवासु बलानि अयुग्ध्वं बलमादाय स्वाश्वा अधितिष्ठथ इति ॥ (७)

**सिंहा इव नानदति प्रचेतसः पिशा इव सुपिशो विश्ववेदसः ।**
**क्षपो जिन्वन्तः पृषतीभिर्ऋष्टिभिः समित्सबाधः शवसाहिमन्यवः ॥**

•सिंहा इव । सिंहस्सहतेः । सिंहा इव शब्दं कुर्वन्ति । प्रचे[1] । पिशा रुरवः[2] तरवो वा । पिशिराश्लेषणार्थः । ते इव । वृष + भिर्मरुतो[3]ऽश्चिभिः । •सुपेशसो विश्ववेदसः सर्वविदः । पक्षिपः[4] क्षपयितारः । तर्पयन्तः पृषतीभिः ऋष्टिभिश्च सहिताः । समित् सममेव गच्छन्ति । बाधाससहितां[5] मनुष्याः । शवसा[6] अहिमन्यवः आहननशीलमनसः । यद्वा अहीनज्ञानाः[7] ॥

सिंहा इव शब्दं कुर्वन्ति प्रकृष्टज्ञानाः । यथा पुरुषे मांसानि अवयवश्लिष्टानि एवं पदार्थैः सर्वैरेव मरुतः सुष्ठु आश्लिष्टा भवन्ति सर्वज्ञाः । उदकं पूरयन्तः पृषतीभिरश्वाभिः । ऋष्टिभिश्चायुधविशेषैः सममेव शत्रून् बाधितारः शवसा आहननशीला अभिमननाः ॥ (८)

[1] Read प्रचेतसः

[2] Word not clear. Perhaps अवयवाः

[3] One letter completely worm-eaten after वृष.

[4] Read only क्षिपः

[5] Read बाधासहिताः

[6] Started to write perhaps जी and corrected into श.

[7] नाः completely worm-eaten. Only a conjecture.

**रोदसी आ वदता गणश्रियो नृषाचः शूराः शवसाहिमन्यवः ।**
**आ वन्धुरेष्वमतिर्न दर्शता विद्युन्न तस्थौ मरुतो रथेषु वः ॥**

रोदसी शब्दापयत गणशः श्रयन्तो नृत्[1] सचन्तः शूराः शवसाहिमन्यवः । आतिष्ठन्ति बन्धुरेषु अमन्तिरिव[2] दर्शनीयामतिरूपनाम[3] । विद्युदिव च तिष्ठति मरुतो रथेषु वो दीप्तिः ॥

रोदसी स्वनिर्गमनेन शब्दापयत हे गणश्रियः इतरेतरयुक्ताः गनुष्याणां संभक्तारः शूराः शवसाहिमन्यवः । रथेषु ये बन्धुराः तेषु अमतिरिव रूपमिव दर्शनीयाः विद्युन्न अवतिष्ठते भूयो भूयः प्रस्फुरति यथा पदार्थानां रूपं बहिः स्थितं इति ॥ (९)

**विश्ववेदसो रयिभिः समोकसः संमिश्लासस्तविषीभिर्विरप्शिनः ।**
**अस्तार इषुं दधिरे गभस्त्योरनन्तशुष्मा वृषखादयो नरः ॥**

विश्ववेदसः । सर्वज्ञा रथभिस्संसेविमानाः[4] संसेव्यमानाः संगताः । बलैर्विरप्शिनो महान्तः । अस्तार इषुं दधिरे बाह्वोरनन्तबलाः वृषखादयो नरः । वृषा येषां खादिराः युद्धं भवति[5] ॥

सर्वज्ञानाः धनैः समानस्थानाः महतोऽपि पर्वतादीन् आत्मबलैः संमिश्रयन्तः क्षेप्तारः इषुं हस्तयोः धारयन्ति अनन्तबलाः वर्षणशीलखादिनामायुधयुक्ताः नेतारः ॥ (१०)

[1] Read नॄन्. [2] Read अमतिरिव.

[3] Read दर्शनीयाः । अमतिः रूपनाम.

[4] Read रयिभिः The portion संसेविमानाः does not seem to be necessary. वि is mostly worm-eaten; only a conjecture.

[5] Perhaps to read वृषा येषां खादयो युद्धे भवन्ति.

**हिरण्ययेभिः पविभिः पयोवृध उज्जिघ्नन्त आपथ्यो३ न पर्वतान् ।**
**मखा अयासः स्वसृतो ध्रुवच्युतो दुध्रकृतो मरुतो भ्राजदृष्टयः ॥**

हिरण्ययेभिः । हिरण्मयैश्चक्रैः रथानां उदकस्य वर्धकाः पर्वतानुज्जिघ्नन्ते यथा आपथ्यः । पथो ये आगच्छन्ति रथाः । ते यथाग्रतः स्थितान् स्थाणूनुज्जिघ्नन्ते । मखाः पूज्या गन्तारः स्वयं सररन्तः[1] ध्रुवाणामपि च्यवकाः[2] दुर्धरमात्मानं कुर्वाणा मरुतो दितीष्टयः[3] ॥

हिरण्मयैः पविभिः उदकस्य वर्धयितारः उद्बाधयन्ति तृणानीव पर्वतान् । दातारः गच्छन्तः स्वयमेव सरन्तः ध्रुवाणामपि च्यावयितारः दुर्धरस्य कर्मणः कर्तारः दीप्तायुधाः ॥ (११)

**घृषुं पावकं वनिनं विचर्षणिं रुद्रस्य सूनुं हवसा गृणीमसि ।**
**रजस्तुरं तवसं मारुतं गणमृजीषिणं वृषणं सश्चत श्रिये ॥**

घृषुम् । घृर्षकं शोधकं उदकवन्तं[4] विद्रष्टारं रुद्रस्य सूनुं हवसा स्तोत्रेण[5]स्तुमो मारुतं गणः[6] । पत्निवस्य[7]रजसः प्रेरकं प्रवृद्धं यूयमपि तं मारुतं गणां[8] तृतीयसवनेऽन्वयादृजीषिणं वृषणं सश्चयनार्थम्[9] ॥

[1] Read सरन्तः

[2] Read च्यावकाः । च्य is partly worm-eaten. But there is no आ mark.

[3] Read दीप्तेष्टयः A little space left blank before ती.

[4] द mostly worm-eaten.

[5] त in स्तो worm-eaten.

[6] Read गणम्. This मारुतं गणं unnecessary here.

[7] Not clear.

[8] Read गणं.

[9] Read सश्चत धनार्थम्.

घर्षणशीलं शोधकं भजनवन्तं विद्रष्टारं रुद्रस्य पुत्रं स्तोत्रेण स्तुमः। उदकस्य प्रेरयितारं वृद्धं मारुतं गणं तृतीयसवने अन्वयादृजीषिणं वर्षितारं सेवत श्र्यर्थम् ॥ (१२)

**प्र नू स मर्तः शवसा जनाँ अति तस्थौ व ऊती मरुतो यमावत ।**
**अर्वद्भिर्वाजं भरते धना नृभिरापृच्छ्यं क्रतुमा क्षेति पुष्यति ॥**

प्र नु स जनो बलेनान्यजनान् क्षिप्रं प्रतितिष्ठति। मरुतो युष्माकं रक्षणेन। यं यूयं रक्षथ अपि चाश्वैः अन्नं[1] भजते[2] धनानि च योद्धृभिः। अपिच आपृष्टव्यं[3] प्रशस्तं कर्माधितिष्ठति पुष्यति[4] च प्रजया पशुभिः ॥

प्रकर्षेणाभितिष्ठति क्षिप्रं स मर्तोऽन्यान् जनान् यं यूयं रक्षणेन मरुतः रक्षथ। अश्वरत्नं च बिभर्ति धनानि च दासैराप्रष्ठव्यं चित्रकर्माधितिष्ठति पुष्यति च प्रजादिभिः ॥ (१३)

**चर्कृत्यं मरुतः पृत्सु दुष्टरं द्युमन्तं शुष्मं मघवत्सु धत्तन ।**
**धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं पुष्येम तनयं शतं हिमाः ॥**

चर्कृत्यम्[5]। पौनंपुन्येन[6] कार्येषु पुरस्कर्तव्यं मरुतः पृत्सु दुष्टरं दीप्तिमन्तं शोषकमरिणां तरनयं[7] हविष्मत्स्वस्मासु निधत्त। धनानां स्प्रष्टारं

[1] Read अन्नं.

[2] Perhaps to read भरते itself.

[3] Read आप्रष्टव्यं.

[4] पुष्यति mostly worm-eaten.

[5] कृत्यं completely worm-eaten.

[6] Read पौनःपुन्येन.

[7] Not clear.

प्रशस्यं सर्वस्य कर्मणो द्रष्टारं[1] पुत्रं पोमयोम[2] पौत्रं च शतं हीमा जीवन्तः ॥

पौनःपुन्येन कर्तव्यं मरुतः संग्रामेषु तरितुमशक्यं दीप्तिमत् बलं हविष्मत्सु निधत्त। धनानां स्प्रष्टारं प्रशस्यं सर्वस्य द्रष्टारं पुत्रं तत्पुत्रं च पोषयेम। लभेमहि शतं हिमा जीवन्तः ॥ (१४)

नू ष्ठिरं मरुतो वीरवन्तमृतीषाहं रयिमस्मासु धत्त।
सहस्रिणं शतिनं शूशुवांसं प्रातर्मक्षू धियावसुर्जगम्यात् ॥

नू छिप्रम्। क्षिप्रं स्थिरं मरुतो बलवन्तं शत्रूणां अभिभवितारं रयिं पुत्रमस्मासु धत्त। यस्सहस्राणि शतानि च भजते प्रवृद्धः। प्रातर्मक्षु धिया वसुर्जम्य[3] मारुतो गणः[4] ॥

क्षिप्रं स्थिरं मरुतः पुत्रयुक्तं शत्रूणामभिभवितारं रयिमस्मासु धत्त सहस्रशतसख्याकं वर्धमानं इति ॥ (१५)

---

पश्वा न तायुं गुहा चतन्तं नमो युजानं नमो वहन्तम्।
सजोषा धीराः पदैरनु ग्मन्नुप त्वा सीदन् विश्वे यजत्राः ॥

[1] In सर्वस्य कर्मणो, only स्य and णो can be seen. ष्टारं is clear in the next line. The end of the line is completely damaged.

[2] Read पोषयेम.

[3] Read वसुर्जगम्यात. This is at the end of the line and much damaged.

[4] There is the figure 3 to mark the end of the sūkta.

पश्वा । शाक्त्य: पराशर: । द्वैपदानि षद्सूक्तानिष[1] । तत्र द्वे द्वे ऋचा लोके कां समामनामो युक्ष्वन्त्यामेवामेकामेव[2] । प्रायेण[3] द्वयोर्द्वयोरैकार्थ्यं दृश्यते । पशुनेव तायुं[4] स्तेनं देवेभ्योऽपक्रम्याप्सु गुहायां वर्तमानश्चमातृना[6] संयुञ्जानमन्नं वहन्तं संगता: प्राज्ञा देवा:[7] पदैरन्वगच्छन् । उपासीदंश्च त्वां विश्वे देवा: । अडागमाकरणे हेतु: समयानुक्रमण्यामस्माभिरुक्तमिति[8] ॥

पराशर: शाक्त्य: । द्विपदा विंशत्यक्षरा । प्रायेण द्वयोर्द्वयोरैकार्थ्यं दृश्यते । अग्नेस्त्रयो ज्यायांसो भ्रातर आसन् । ते देवेभ्यो हव्यं वहन्त: प्रामीयन्त । सोऽग्निरबिभेत् । इत्थं वाव स्य आर्तिमारिष्यतीति । स निलायत । सोऽप: प्राविशत् । तं देवा: प्रैषमैच्छन् (तै. सं. २. ६. ६. १) इति ब्राह्मणम् । तत्रेदमुच्यते । पशुनेव स्तेनं गुहायां गच्छन्तं अन्नमात्मना संयुञ्जानं संयुक्तं च अन्नं वहन्तं समादाय गच्छन्तं संगता: प्राज्ञा: पदै: अन्वगच्छन् । उपासीदंश्च त्वां विश्वे देवा: ॥ १ (१, २)

ऋतस्य॑ दे॒वा अनु॑ व्र॒ता गु॒र्भुव॒त् परि॑ष्टि॒र्द्यौर्न भूम॑ ।
वर्ध॑न्ती॒माप॑: प॒न्वा सुशि॑श्विमृ॒तस्य॒ योना॒ गर्भे॒ सुजा॑तम् ॥

ऋतस्य । ऋतस्याग्नेर्देवा अन्वगच्छन् कर्माणि । क्व गत: । क्व च वर्तते । किञ्च कुरुते इति भुवत् परिष्टिरभवदन्वेषणम् । द्यौरिव चाचासीत्[9]

[1] ष at the end not wanted.

[2] Passage not clear.

[3] The letters after प्राये and before यौरैकार्थ्यं much worm-eaten.

[4] पशु is in tact; नेव तायुं very much injured.

[5] न्द in स्तेनं देवेभ्यो completely lost.

[6] Read वर्तमानमात्मना.

[7] The आ mark and visarga in वा: completely lost.

[8] This is one of the twelve Anukramaṇis of the author.

[9] One चा is unnecessary.

भूम भूमिः अग्न्यन्वेषणार्थमागतैः[1] देवैः । वर्धन्त्यैनमापः[2] पन्वा स्तोत्रेण सुशिश्वि सुप्रवृद्धम् । ऋतस्य योनिरित्युदकनाम अन्नस्य योनिर्भवतीति । तत्र गर्भे अन्नस्सुजातं[3] सुष्ठु वर्तमानम् ॥

अग्नेर्देवा अन्वगच्छन् कर्माणि निलीनस्य । किं कृत्वा गच्छतीति तदाभवत् परिष्टिः पर्येषणम् । द्यौरिव चासीत् भूमिरग्न्यन्वेषणार्थमागतैः देवैः तं च । एनमग्निं वर्धयन्त्यापः स्तोत्रेण सुष्ठु वृद्धम् । उदकस्यान्तर्गर्भे सुष्ठु प्रादुर्भूतम् ॥ २ (३, ४)

**पुष्टिर्न रण्वा क्षितिर्न पृथ्वी गिरिर्न भुज्म क्षोदो न शंभु ।**
**अत्यो नाज्मन्त्सर्गप्रतक्तः सिन्धुर्न क्षोदः क ईं वराते ॥**

पुष्टिर्नि[4] । पुष्टिरिव रमणीया । क्षितिरिव विस्तीर्णा । गिरिरिव भुज्म भुञ्जानि[5] भाजको[6] रक्षकः । जलमिव सुखस्य भावकः । अत्य इव युद्धे सर्गप्रतक्तः सर्गे गमने उद्युक्तः । सिन्धुर्न क्षोदः स्यन्दमानमिवोन्मादकम् । क एनं वारयेत् ॥

हव्यवाहनाद्भीतोऽरण्यं प्राविशत् । तत् द्वाभ्यां स्तौति । पुष्टिरिव रमणीया । भूमिरिव विस्तीर्णा । गिरिरिव भोगसाधनम् । उदकमिव सुखभावयितृ । सोऽयं अश्व इव गमने भवति । गमनप्रवृत्तस्तमिमं को वारयति । यथा सिन्धुरुदकं कूलाभ्यां वारयति तद्वत् ॥ ३ (५, ६)

[1] न्य mostly damaged.

[2] Read वर्धयन्त्येनमापः

[3] Read अन्नं सुजातं.

[4] Read पुष्टिर्न. There is a stroke above न to indicate that the इ mark is to be deleted.

[5] Perhaps this word is not wanted.

[6] Perhaps to read भोजको.

**जामिः सिन्धूनां भ्रातेव स्वस्रामिभ्यान्न राजा वनान्यत्ति ।**
**यद्वातजूतो वना व्यस्थादग्निर्ह दाति रोमा पृथिव्याः ॥**

जामि । जामिबन्धूनां[1] सह वसन् । भ्रातेव स्वसृणां[2] इत्यौपमिकम् । स्वसादो[3] दुहितरः पितुः । सोऽयमिभ्वार्ति + + राजा[4] वनान्यत्ति । शत्रव[5] इभ्या भयमेति येभ्यः । यदा वातप्रेरितो वनानि वितिष्ठति तदानीमग्निः खलु दादि[6] छिनत्ति पृथिव्या लोमानि । पृथिव्या लोमान्योषधय इति ॥

बन्धुः सिन्धूनां स्यन्दमानानां नदीनाम् । भ्रातेव स्वसृणां इत्यौपमिकम् । सोऽयमिभस्थान् शत्रून् राजा इव काष्ठानि अत्ति । यदा वातप्रेरितः वृक्षानभिभवति तदानीं अग्निः खलु छिनत्ति लोमस्थानीयं तृणगुल्मादिकमपि दहति पृथिव्याः ॥ ४ (७, ८)

**श्वसित्यप्सु हंसो न सीदन् क्रत्वा चेतिष्ठो विशामुषर्भुत् ।**
**सोमो न वेधा ऋतप्रजातः पशुर्न शिश्वा विभुर्दूरेभाः ॥**

[1] Read जामिः बन्धुः सिन्धूनां.

[2] स्र portion in स्व completely lost.

[3] Read स्वसारो.

[4] Read सोऽयमिभ्यानिव राजा. The two letters after सोऽयमि very indistinct. The first can be made out as भ्वा and the next as र्ति. The letter र in रा is completely lost.

[5] The explanation is not found in N. This is not the meaning accepted usually.

[6] Read दाति.

श्वसिति । हंसो हन्यध्वानं[1] गच्छन् । श्वसित्यप्सु हन्स[2] इव सीदन् । केतुनौषसेन[3] प्रज्ञापको[4] लिशां[5] उषसि प्रबुद्धि:[6] । सोम इव विधाता । उदकाज्जातः पशुरिव शिश्वा[7] । यो नो विभुरेभाः[8] । दूरे यस्य दीप्तिः स दूरेभा इति ॥[9]

अनया पुनरप्सु प्रविष्टं स्तौति । श्वासशब्दं करोत्यप्सु हंस इव सीदन् प्रज्ञापितेनौषसेन तेजसा चेतयितृतमो मनुष्याणामुषसि प्रबुद्धः । सोम इव विधाता· उदकात् प्रजातः । पशुरिव शिशुना वत्सेन सह तेजसा प्रादुर्भवन् महान् दूरस्थः प्रकाशयति ॥ ५ (९, १०)

---

रयिर्न चित्रा सूरो न संदृगायुर्न प्राणो नित्यो न सूनुः ।
तक्वा न भूर्णिर्वना सिषक्ति पयो न धेनुः शुचिर्विभावा ॥

[1] Read हन्त्यध्वानं.

[2] Read हंस.

[3] The reading is only a conjecture. ष is quite clear with औ mark following. There is something before that; it looks like जि, but may be only ए mark to complete the औ in नौ. One letter before this is missing.

[4] This is not quite the meaning of चेतिष्ठ where there is the superlative.

[5] Read विशां.

[6] Read प्रबुद्धः

[7] After शिश्वा something begun, perhaps शि and deleted.

[8] Read विभुर्दूरेभाः

[9] Here there is the figure 4 to mark the end of the sūkta.

रयिर्न । रयिरिव चित्रा । सूर्य इव सदृष्टा[1] । सञ्चरन्निव प्राणः । औरस इव पुत्रः । अश्व इव भूर्णिर्भरन्[2] । भूर्णिमश्वं नयत्तुजा (ऋ. वे. ८. १७, १५)[3] वनानि सेवते । पय इव धेनुः प्रीणनः । शुचिर्दीप्तिमान् ॥

दावाग्निमनेन सूक्तेन स्तौति । रयिरिव चित्र इति प्रकाशादाह । सूर्य इव च सर्वैर्दृश्यमानः । आयुरिव प्राणनहेतुः । दग्धे ह्यरण्ये ओषधयः प्रादुर्भवन्ति । औरस इव पुत्रः । तस्कर इव हरणशीलः । अरण्यानि सेवते क्षीरमिव धेनुः दीप्तिमान ॥ १ (१, २)

**दाधार क्षेममोको न रण्वो यवो न पक्वो जेता जनानाम् ।**
**ऋषिर्न स्तुभ्वा विक्षु प्रशस्तो वाजी न प्रीतो वयो दधाति ॥**

दाधार । बिभर्ति रक्षां गृहमिव रमणीयः । यव इव पक्वः । जेता जनानाम् । ऋषिरिव स्तोदा[4] देवानाम् । विक्षु प्रशस्तः । अश्व इव सुहितः[5] प्रीतः । अन्नं दधाति ॥

करोति रक्षां गृहमिव रमणीयम् । यव इव पक्वः । जेता जनानाम् । सोऽयमग्निः अन्नं प्रयच्छति । यथा ऋषिः स्तोता मनुष्येषु प्रशस्तः अभिरक्षणकुशलः अन्नं प्रयच्छति । अश्व इव च घासेन प्रीयते ॥ २ (३, ४)

[1] Read संदृष्टा.
[2] Looks more like भृणिर्भरन्.
[3] There must be some words like इति यथा missing.
[4] Read स्तोता.
[5] There is no word in the text corresponding to this word.

**दुरोकशोचिः क्रतुर्न नित्यो जायेव योनावरं विश्वस्मै ।**
**चित्रो यदभ्राट् छ्वेतो न विक्षु रथो न रुक्मी त्वेषः समत्सु ॥**

दुरोकशोचिः । दुस्सेवतेजाः । तकर्म कर्मेर इव + कर इवासारणा धारणो वा[1] । जोयेव[2] गृहे वर्तमाना । अरं विश्वस्मै जनाय भवति । चित्रो यदासौ भ्राजते तदानीं विश्वेत[3] आदित्य आइव[4] भवति । मनुष्येषु रथो न रुक्मवान् सौवर्णः । दीप्तः समत्स्विति ॥

दुःसेवतेजाः प्रज्ञा इव अनुस्यूतः । जायेव गृहे वर्तमानः पर्याप्तो भवति विश्वस्मै जनाय । मित्रो यदा भ्राजते अरण्ये श्वेतवर्ण इवादित्यः विक्षु रथ इव च हिरण्मयो दीप्तः संग्रामेषु ॥ ३ (९, ६)

**सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत्त्वेषप्रतीका ।**
**यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम् ॥**

सेनेव । सेनेवोद्युक्ता भयं दधाति । क्षेप्तुरिव जेषुः[5] । दीप्तमुखी । यमोऽग्निर्नियमनात् । अन्तोदात्तो वैवस्वतश्चत् । अग्निरपि[6] यम उच्यते येन

[1] Read कर्मकर इवासाधारणः. After तकर्मक dots are put above all the letters र्मेर इव. Between र्म and र here there is a cross mark below the line and after इव some letter is written and scored off. The dot is over this also. Then कर इव etc. follow.

[2] Read जायेव.

[3] वि in the beginning not wanted.

[4] Read इव । आ in the beginning not wanted.

[5] Read इषुः

[6] What is written is वैवस्वतश्च + + रपि. It is a conjecture that the two letters that are completely lost are इग्नि. Read वैवस्वतश्चेत् । अग्निरपि.

यच्छति । स आयुदाता[1] । यम एव जातः । यम एव जनयितव्य[2] । जरो[3] जरयिता । पतिः कनीनां कन्यकानाम् । तृतीयो अग्निष्टे पतिः[4] । पालयिता जायानाम् । तत्प्रधाना हि यज्ञसंयोगेन भवति[5] । जनित्वशब्दो जायावचनोदात्तः[6] । पत्युर्जनित्वं[7] इति ॥

सेनेवोद्युक्ता बलं दधाति अस्तुरिवायुधं दीप्तमुखम् । यम एव जातः । अग्निरपि यम उच्यते यमनात् । यम एव जनिष्यमाणः । जरयिता कन्यकानाम् । तृतीयो अग्निष्टे पतिः इत्यपि निगमो भवति । पालयिता जायमानानाम् । तत्प्रधाना हि यज्ञसंयोगेन भवन्ति ॥ ४ (७, ८)

**तं वश्चराथा वयं वसत्यास्तं न गावो नक्षन्त इद्धम् ।**
**सिन्धुर्न क्षोदः प्र नीचीरैनोन्नवन्त गावः स्वर्दृशीके ॥**

तं वा[8] । तं यूयं चरात्या[9] पश्वा[10] आहुत्या नक्षते वयं निवसत्या[11] औषधाहुत्या नक्षामहे । गोष्ठमिव गावः समिद्धमेनं व्याप्नुवन्ति यजमानाः ।

[1] Read आयुदात्तः

[2] Read जनयितव्यः

[3] Read जारो.

[4] R. V. 10-85-40.

[5] N. 10-21. Read भवन्ति.

[6] Read जायावचनोऽन्तोदात्तः

[7] R. V. 10-18-8.

[8] Read वः

[9] Read चरन्त्या.

[10] Read पश्वा.

[11] Read निवसन्त्या.

सोऽयं स्यन्दमानमिवोदकं नीचीर्ज्वालाः प्रेरयति । तस्मिन् संगच्छन्ते रश्मयो नभसि वर्तमाने दर्शनीये इति[1] ॥

तमिमं यूयं चरन्त्या पश्वा आहुत्या वयं निवसन्ति औषधाहुत्या । गृहं यथा गावः आप्नुवन्ति तथाप्रवाम इद्धं समृद्धं भोगैः । सिन्धुरिव उदकं अधःस्थितं अग्निज्वालाः उद्गमयति । ते च रश्मयः संश्लिष्टा भवन्ति सर्वस्य दर्शनीये अग्नौ ॥ ५ (९, १०)

---

**वनेषु जायुर्मर्तेषु मित्रो वृणीते श्रुष्टिं राजेवाजुर्यम् ।**
**क्षेमो न साधुः क्रतुर्न भद्रो भुवत् स्वाधीर्होता हव्यवाट् ॥**

वनेषु । अरण्ये[2] जायमानः । मर्तेष्वपि च मित्रः स[3] । वृणीते श्रुष्टिं क्षिप्राषि एव[4] राजेवाजं[5] मित्रम् । क्षेमो रक्षक इव साधकः । कर्तेवभ्रजनीयो[6] भवति सुकर्मा होत[7] हव्यवाहनः ॥

काष्ठेषु जायमानः । मर्तेषु सखा वृणीते क्षिप्रकारिणं यजमानं राजेव अजरं मित्रम् । क्षेम इव साधुः । कर्म इव भजनीयो भवति सुकर्मा होता हव्यवाट् ॥ १ (१, २)

[1] There is the figure 5 here to mark the end of the sūkta.

[2] Perhaps to read अरण्येषु.

[3] Perhaps to read सखा.

[4] Reading very corrupt. Perhaps क्षिप्रमृषिं एव.

[5] Read राजेवाजरं.

[6] Read कर्तेव भजनीयो.

[7] Read होता.

हस्ते॒ दधा॑नो नृ॒म्णा विश्वा॒न्यमे॑ दे॒वान् धा॒द्गुहा॑ नि॒षीद॑न् ।
वि॒दन्ती॒मत्र॒ नरो॑ धियं॒धा हृ॒दा यत्त॒ष्टान् मन्त्रा॒ँ अशं॑सन् ॥

हस्ते । हस्ते धारयन् धनानि सर्वाणि भये[1] धाद्देवान् गुहायां निषीदन् । विदन्त्येनमत्र नरो देवा: कर्मणां धातारा:[2] । यदा हृदयेन तष्टान् अशंसन् मन्त्रान् ॥

हस्ते धारयन् सर्वाण्येव धनानि देवैर्निहितानि । भये देवान् धात् गुहायां निषीदन् । विदन्त्येनं अत्र देवा: कर्मणो धातार: । हृदयेन यदा कृतान् मन्त्रान् अशंसन ॥ २ (३, ४)

अ॒जो न क्षां दा॒धार॑ पृथि॒वीं त॒स्तम्भ॒ द्यां मन्त्रे॑भिः स॒त्यैः ।
प्रि॒या प॒दानि॑ प॒श्वो नि पा॑हि वि॒श्वायु॑रग्ने गु॒हा गुहं॑ गाः ॥

अज: । अजस्सूर्य: । वाजि:[3] प्रेरणार्थ: । सूर्य इव भूमिं धारयन्ति[4] पृथिवीमन्तरिक्षं च । मस्तम्भ[5] मन्त्रैस्सत्यै: स्तूयमान:[6] । यद्वा मन्त्रै:

[1] भ completely worm-eaten. Only a conjecture.

[2] Read धातार:

[3] Read अजि:. Perhaps it may be अज: सूर्यो वा । अजि: In this case another alternative meaning of अज is missing.

[4] Read धारयति.

[5] After अन्तरिक्षं च, the next letter seen is म. Then one letter is missing and what follows is त; perhaps both together form स्त. Then there is म and another letter is missing; perhaps both together form म्भ. Read तस्तम्भ.

[6] मान: quite clear. Two letters missing. Reading only a conjecture.

छन्दोभिरेव धारणं तस्यावाचोवपादादन्ति भयुः[1] इत्यध्वर्युब्राह्मणमिति ।
प्रियाणि स्थानानि पशोर्निवाभि[2] सर्वान्नस्त्वमग्ने गुहाया अपि गुहं गाः ॥

सूर्य इव भूमिं अन्तरिक्षं च धारयति । द्यां च तस्तम्भ मन्त्रैः सत्यैः स्तूयमानः । स त्वमग्ने अस्माकं पशोः प्रियाणि पदानि नितरां रक्ष । सर्वान्नस्त्वं अग्ने गुहाया अपि गूढं प्रदेशं गतवानसि ॥ ३ (५, ६)

**य ईं चिकेत गुहा भवन्तमा यः ससाद धारामृतस्य ।**
**वि ये चृतन्त्यृता सपन्त आदिद्वसूनि प्र ववाचास्मै ॥**

य ईम् । य एनं जानाति गुहायां + + + सीदति[3] यस्सत्यस्य धारकमग्निम् । वि ये व्रतन्त्येनम्[4] । विचृतिर्विहरणे । स्पृशन्तः सत्यानि । सोऽयमस्मै सर्वस्मै जनाय वसूनि प्रववाच वदन्ति[5] प्रयच्छतीति ॥

य एनं जानाति गुहायां भवन्तम् । यश्च आससाद सत्यभूतस्याग्नेर्मार्गम् । ये च विचृतन्ति मार्गस्थितानि तिरोधानानि सत्यानि स्पृशन्तः । अनन्तरमेव अस्मै हस्तस्थानि वसूनि अग्निः प्रोवाच ॥ ४ (७, ८)

**वि यो वीरुत्सु रोधन्महित्वोत प्रजा उत प्रसूष्वन्तः ।**
**चित्तिरपां दमे विश्वायुः सद्मेव धीराः संमाय चक्रुः ॥**

[1] Passage not clear.

[2] Read पशोर्निपाहि.

[3] After य एनं the line is mostly lost and the reading is only a conjecture from small bits that remain. After गुहायां and before सीदति a few letters are completely gone.

[4] Read चृतन्त्येनम्.

[5] Read वदति.

वि यः। विरुणद्धि यो वीरुत्स्वन्तर्महत्वानि। अपि च प्रजाः पुष्पफलादिरूपाः। प्रसूष्वोषधीष्वन्तः विरुणद्धि। द्वितीय उतः पूरकः। सोऽयं चेतदितोदघानां[1] गृहे वसति। सर्वान्नः। तमिमं परिचरन्ति धीराः यथा गृहं संमाय कुर्वन्तीति[2] ॥

योऽग्निः वीरुत्सु अन्तः माहात्म्येन रसं अरुणत्। अपिच प्रजाः पुष्पफलादिरूपाः ओषधीष्वन्तः। एक उतशब्दः पादपूरणः। सोऽयमन्तरिक्षे अपां चेतयिता गृहे च सर्वान्नः तमिममानीय गृहमिवोत्तरवेदिं चक्रुः ॥ ९ (९, १०)

---

**श्रीणन्नुप स्थाद्दिवं भुरण्युः स्थातुश्चरथमक्तून्व्यूर्णोत्।**
**परि यदेषामेको विश्वेषां भुवद्देवो देवानां महित्वा ॥**

श्रीणन्नुपतिष्ठति दिवं भर्ता स्थावरजङ्गमं[3] रात्रिश्च[4] वरुणोति[5] तेजसा। परिभवति यदैषां सर्वेषां देवो देवानां महित्वान्येकोऽयमग्निरिति ॥

हविर्भिमिश्रयन् उपतिष्ठति द्युलोकं हविषो भर्ता। स्थावरं जङ्गमं च तेजसा तमसः प्रकाशयति रात्रीश्च। परिभवति यदा सर्वान् इमान् देवान् एक एव महत्त्वेन ॥ १ (१, २)

[1] Perhaps to read चेतयितोदकानां.

[2] Here there is the figure 6 to mark the end of the Sūkta.

[3] Read स्थावरं जङ्गमं.

[4] Read रात्रीश्च.

[5] Read व्यूर्णोति.

आदित्ते विश्वे क्रतुं जुषन्त शुष्काद्यद्देव जीवो जनिष्ठाः ।
भजन्त विश्वे देवत्वं नाम ऋतं सपन्तो अमृतमेवैः ॥

आदिक्[1] । अनन्तरमेव तुभ्यं सर्वे कर्मादेवन्त[2] शुष्काद्यादा[3] काष्ठाद्देव जीवो जीवन् प्रज्वल[4] । भजन्ते सर्वे एव स्तोत्रत्वं तव नाम । महित्वान्येकं[5] सत्यश्रुतं त्वाममृतं स्पृशन्त एवैरङ्गैः । अपि वा स्तोत्रैः ॥

अनन्तरमेव तुभ्यं सर्वे कर्म अजुषन्त । शुष्कात् काष्ठाद्यदा जातस्त्वमजीवस्तदा सर्वे च तेन कर्मणा कामानां नामकं देवत्वं च अभजन्त ऋतं सत्यममृतं च त्वां गमनैः स्पृशन्तः ॥ २ (३, ४)

ऋतस्य प्रेषा ऋतस्य धीतिर्विश्वायुर्विश्वे अपांसि चक्रुः ।
यस्तुभ्यं दाशाद्यो वा ते शिक्षात्तस्मै चिकित्वान्रयिं दयस्व ॥

ऋतस्य । अग्नेरेव प्रेष्यमाणाः स्तुतयः अग्नेरेव कर्म । सोऽयं विश्वायुर्भवति । सर्वे चास्मै एव कर्माणि कुर्वन्ति । यस्तुभ्यमन्नं प्रयच्छति यो वा ते शिक्षति करोति कर्म । शक्नोत्येव यच्छिक्षति---इत्यध्वर्युर्ब्राह्मणम् । तस्मै जानं[6] स्वं धनं देहीति ॥

[1] Read आदित्.

[2] Perhaps to read कर्माभजन्त.

[3] Read शुष्काद्यदा.

[4] There is space for two syllables left blank after प्रज्वल. Perhaps to read जीवोऽजीवत् । प्रज्वलितोऽभूत्.

[5] Perhaps this portion महित्वान्येकं is a repetition of the words from the previous verse by oversight and hence to be deleted. Or perhaps to read महित्वान्यृतं, the word महित्वानि being the meaning of नाम.

[6] Read जानन्.

अग्नेरेव । होता यक्षत् इत्यादिकाः प्रैषाः । ऋतस्यैव कर्म सर्वहविष्कः विश्वे च तस्मै कर्माणि कुर्वन्ति यस्तुभ्यं प्रयच्छति यो वा तुभ्यमात्मानं नियच्छति तस्मै जानन् धनं धेहि ॥ ३ (५, ६)

**होता निषत्तो मनोरपत्ये स चिन्न्वासां पती रयीणाम् ।**
**इच्छन्त रेतो मिथस्तनूषु सं जानत स्वैर्दक्षैरमूराः ॥**

होता[1] निषण्णो मनोरपत्ये नव्यो भीमाः प्रजाः[2] । भावपरश्चेदन्तोदात्तः । निषत्तमस्य चरतः[3] इति । स एवासां पतिं रयीणां गवाम् । अपि वा दातॄणां प्रजानाम् । इच्छन्तेन्तच्छमिथ[4] संसृष्टमेकीभूतं तनूष्वङ्गेषु स्थितं रेतः । समजानत च ते स्वैः प्राणैः[5] मूळ्हाः[6] त्वया वैश्वानरेणोत्पादयन्ति पुत्रम् । स + + ते तेवेतरे तामिति[7] ॥

होता निषण्णः मनुष्येषु स खलु आसां रयीणां स्वामी तस्मिन्नेतस्मिन्नन्तः स्थिते मिथः संसर्गात् स्वेष्ववयवेषु पुत्रमैच्छत् समजानत चेतरे स्वैरिन्द्रियैरमूढाः ॥ ४ (७, ८)

**पितुर्न पुत्राः क्रतुं जुषन्त श्रोषन्ये अस्य शासं तुरासः ।**
**वि राय और्णोद्दुरः पुरुक्षुः पिपेश नाकं स्तृभिर्दमूनाः ॥**

[1] There is no pratīka.

[2] नव्यो भीमाः प्रजाः not clear.

[3] R. V. 1. 146. 1.

[4] Read इच्छन्ते मिथः

[5] After प्रा and the mark for ऐ in णै, a letter started and scored off; then ण written.

[6] Read अमूळ्हाः

[7] पुत्रम् । स ends a line. The first two letters in the next line are completely lost; only the end of the second letter is seen. Perhaps to read संजानते चेतरे तामिति.

पितुः । पितरिव[1] पुत्राः कर्माजुषन्त । अश्रोषने[2] अस्य शासनः[3] त्वरमाणम्[4] । सोऽयं विवृणोति धनानि द्वाराणि बहुन्नः । पिपेश नाकन्दिवं[5] त्रिभिर्नक्षत्रैः[6] दमूनाः[7] ॥

पितुर्न पुत्राः कर्माजुषन्त । अश्रौषन् ये अस्य शासनं वेदे त्वरमाणाः । सोऽयं धनानि द्वाराणि विवृणोति यजमानेभ्यो बहुशब्दः । आश्लेषयति दिवमाच्छादकैर्हविर्भिर्दमनाः—इति याज्ञिकस्याग्नेः स्तुतिः ॥ ५ (९, १०)

---

**शुक्रः शुशुक्वाँ उषो न जारः पप्रा समीची दिवो न ज्योतिः ।**
**परि प्रजातः क्रत्वा बभूथ भुवो देवानां पिता पुत्रः सन् ॥**

शुक्रः[8] । शुक्र श्वेतवर्णः[9] शोचनशीलः उषस इव जरयिता आदित्यः पूरयिता संगते द्यावापृथिव्यौ दिव इव ज्योतिरादित्यः यरिबभूथ प्रजातस्त्वं क्रत्वा तेज + सा[10] कर्मणा वा । भवतिसि[11] च देवानां

[1] Read पितुरिव.

[2] Read अश्रोषन् ये.

[3] Read शसनं.

[4] Read त्वरमाणः

[5] Read नाकं दिवं.

[6] Read स्तृभिर्नक्षत्रैः

[7] There is the figure 7 to mark the end of the sūkta.

[8] Page 53 *b* ends here.

[9] Read शुक्रः श्वेतवर्णः

[10] After तेज a letter is broken off; it looks like व. Then सा follows. Read only तेजसा.

[11] Read भवति.

स्तोत्राणां देवानामेव वा पिता पुत्रस्सन् कर्मभिः । शुक्रस्य शोचिषस्वते[1]—इत्याद्युदात्तत्वमामन्त्रितसम्बन्धादिति ॥

शुक्रवर्णः शोचनशीलः उषस इव जरयितादित्यः पूरयिता द्यावापृथिवी दिवि भवमिव ज्योतिः । प्रजातस्त्वं कर्मणा सर्वं परिबभूथ । भुवो देवानां कर्मतः पिता पुत्रोऽपि सन् ॥ १ (१, २)

**वेधा अदृप्तो अग्निर्विजानन्नूधर्न गोनां स्वाद्मा पितूनाम् ।**
**जने न शेवं आहूर्यः सन्मध्ये निषत्तो रण्वो दुरोणे ॥**

वेधाः । विधाता अदृप्तोऽग्निर्विजानन् ऊउततरः भवति[2]—इति निरुक्तम् । तदिव गवां स्वाद्मा स्वादुकर्तृभिः तूनाम्[3] । पितुरन्नं पातेः पिबतेर्वा[4] । पयश्चान्नं स्वादूकरोति । अग्निश्च जने जनपदे इव शेवः सुखकर उदारो जनं याचतामाभूर्य[5] आह्वातव्यः सर्वेषां मध्ये निषण्णो रमयिता गृहे ॥

विधाता अदृप्यन् अग्निः विजानन् गवामूध इव पयसा अन्नानि पचन् स्वादूकर्ता भवति । सार्थे इव सुखकरं मित्रमाह्वातव्यः सन् मध्ये निषण्णो रमयिता गृहे ॥ २, (३, ४)

**पुत्रो न जातो रण्वो दुरोणे वाजी न प्रीतो विशो वि तारीत् ।**
**विशो यदह्वे नृभिः सनीळा अग्निर्देवत्वा विश्वान्यश्याः ॥**

[1] R. V. 5. 6. 5. Read शोचिषस्पते.

[2] N. 6. 19. Read ऊधरुद्धततरं भवति.

[3] Read स्वादुकर्ता पितूनाम् । नां is mostly lost.

[4] See N. 9. 24.

[5] जनं याचतां not clear. Read जनं याचतामाहूर्य.

पुत्रेत्रा[1] । पुत्र इव जातो रमयिता गृहे वर्तमानोऽश्व इव सुहितोऽन्नं वर्धयति । विशो देवान् यदाह्वयामि मनुष्यैः समानस्थानात्[2] तदानीमग्निर्देवत्वानि विश्वान्याप्नोति । स्वयमेव देवो भवति । त्वमग्ने वरुणो जायसे यत्[3]—इति चोक्तमिति ॥

पुत्र इव जातो रमयिता गृहे वर्तमानोऽश्व इव सुहितो मनुष्यान् तारयति । यदाहं यज्ञार्थं देवैः समानस्थानानृत्विजो मनुष्यानाह्वयामि तदानीमग्निः स्वयमेव इन्द्रत्वं वरुणत्वं देवान्तरत्वं च प्राप्नोति ॥ ३, (५, ६)

**नकिष्ट एता व्रता मिनन्ति नृभ्यो यदेभ्यः श्रुष्टिं चकर्थ ।**
**तत्तु ते दंसो यदहन्त्समानैर्नृभिर्यद्युक्तो विवे रपांसि ॥**

नकिः[4] तनवैतानि[5] कर्माणि हिंसन्ति मायिनः[6] । यद्यस्त्वमेभ्यो नृभ्यरुष्टिं[7] सुखं करोषि । तत्तु तव कर्म यदहन् समानैस्त्वयैकीभूतेन नृभिर्मरुद्भिः[8] । विवेरभिगच्छसि च तानि रपांसि रक्षांसि ॥

न केचन तवैतानि कर्माणि हिंसन्ति यस्मात्त्वं नेतृभ्यो मनुष्येभ्य आशु प्राप्तिं करोषि । सन्निधानं करोषि । तत्तव कर्म यत् समानैर्मनुष्यैर्युक्तः सन् तेषां पापानि हंसि । यच्च जानासि तानित्यैकमत्यं गतः समानास्तैर्नियुक्तः ॥ ४ (७, ८)

[1] Read पुत्रो. One त्र is extra.
[2] Read समानस्थानान्.
[3] R. V. 5. 3. 1.
[4] Pratīka not given.
[5] Read तवैतानि.
[6] After कर्माणि letters are much injured.
[7] Read नृभ्यः श्रुष्टिं.
[8] Perhaps to read समानैस्त्वयैकीभूतैर्नृभिर्मरुद्भिः

उषो न जारो विभावोस्रः संज्ञातरूपश्चिकेतदस्मै ।
त्मना वहन्तो दुरो व्यृण्वन्नवन्त विश्वे स्व१र्दृशीके ॥

उषः आदित्य इव[1] दीप्तिमान् उत्सरणशीलः संज्ञातरूपः सर्वैर्जानात्विदं सूक्ष्मम् । आत्मनैव भविर्वहन्तो[2] द्वाराणि वृण्वन्ति[3] । तत्र स्थरिति[4] रश्मिवचनमव्ययं बहुवचनान्तं मन्यन्ते[5] इति ॥

उषस इव जरयिता आदित्यः दीप्तिमान् उत्सरणशीलः पुरुषेण संज्ञातरूपः सन् जानाति तं स्वयमेवास्मै हविर्वहन्तोऽभ्युदयानां द्वाराणि विवृण्वन्ति । सर्वेऽभ्युदयार्थिनोऽस्मिन् सर्वस्य दर्शनीये संश्लिष्टा भवन्ति ॥ ९ (९, १०)

---

वनेम पूर्वीरर्यो मनीषा अग्निः सुशोको विश्वान्यश्याः ।
आ दैव्यानि व्रता चिकित्वाना मानुषस्य जनस्य जन्म ॥

वनेम । भजेमहि बहून्यन्नानि अर्यः प्रेरकस्त्वमसि[6] मनिषया[7] ।

[1] Something seems left out. उषो न जारः must mean उषस इव जारः आदित्यः Perhaps to read उषसो जार आदित्य इव.

[2] Read हविर्वहन्तो.

[3] Better read विवृण्वन्ति.

[4] Perhaps to read स्वरिति.

[5] There is no figure or other mark to note the end of the Sūkta here.

[6] Read प्रेरकस्त्वमसि.

[7] Read मनीषया

उक्तोऽग्निः सुदीप्ति[1] विश्वान्याप्नोति दैव्यानि कर्माण्यजानन्[2] आजानंश्चा[3] मानुषस्य जनस्योत्पत्तिम् ॥

भजेमहि बहून्यन्नानि अग्निदग्धारण्याज्जातानि । स हि प्रज्ञायुक्तः प्रदाता भवति । सोऽयमग्निः सुदीप्तिः विश्वानि हवींषि व्याप्नोति । दैव्यानि कर्माणि आभिमुख्येन जानन् । आजानंश्चैव मानुषस्य जनस्योत्पत्तिम् ॥　　१ (१, २)

**गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां गर्भश्चरथाम् ।**
**अद्रौ चिदस्मा अन्तर्दुरोणे विशां न विश्वो अमृतः स्वाधीः ॥**

गर्भः । वनमरण्यं वनोतेर्भजनार्थात्[4] अपिव[5] च्छेदनार्थः[6] । कायमानो वना त्यम्[7]—इत्यन्तोदात्तः क + बन्तोपाङ्ग + न्तर्वर्तमानः[8] । तथा काष्ठानाम् । एवं स्थावराणां जङ्गमानां चाद्रन्त[9] पर्वते अन्तश्च गृहैः स्मै[10]

[1] Read सुदीप्तिः

[2] Read कर्माण्याजानन्.

[3] Read आजानंश्च.

[4] Cf. N. 6. 5.

[5] Read अपित्वा.

[6] The visarga in र्थः was originally begun as another letter; then it is converted into visarga.

[7] R. V. 3. 9. 2. Read त्वम् .

[8] The MS. is intact up to इत्यन्तोदात्तः Then क is clear, next letter is completely worm-eaten. पांग ends the line. The first letter in the next line completely worm-eaten. Perhaps to read इत्यन्तोदात्तः क्विबन्तोऽपां गर्भः अन्तर्वर्तमानः

[9] Read चान्तः

[10] Read गृहे अस्मै.

हविर्हरति । सोऽयं विशामिव विश्वो निवेशको पृपतिरमृत[1] स्वधीः[2] स्वकर्मा । विशां राजानाद्भुतम्[3]—इति ॥

पुत्रो य अपां पुत्रो वृक्षाणां गर्भश्च स्थावराणां गर्भो जङ्गमानामग्निः । तस्मै एवाद्राविव अन्तः गृहे च परिचरन्ति । सोऽयं विशां च निवेशको भवति अमृतः सुकर्मा । समुच्चये नकारः ॥ २ (३, ४)

**स हि क्षपावाँ अग्नी रयीणां दाशद्यो अस्मा अरं सूक्तैः ।**
**एता चिकित्वो भूमा नि पाहि देवानां जन्म मर्तांश्च विद्वान् ॥**

स हि । + + पावान्[4] रात्रिमान् आग्नेयी भि[5] रात्रिः । आद्युदात्तश्चेत् क्षपणवान् । स हि क्षपावां अहवद्रयीणाम्[6]—इति । स धनानि[7] प्रयच्छेति यो अस्मै पर्याप्तिं करोति सूक्तैः । स स्वमेतानि चिकित्वो[8] भूम भूतान[9] निपाहि देवानां जन्म मनुष्यांश्च[10] जानन् चिकित्वांश्चेतनावान्—इति यास्क[11] इति ॥

[1] Read नृपतिरमृतः

[2] Read स्वाधीः

[3] R. V. 8. 43. 24. Read राजानमद्भुतन्.

[4] Two letters completely worm-eaten. They must be स क्ष. Folio 54 *a* ends with क्षपावा; न्रात्रि is in the next page.

[5] भि partly worm-eaten. Read हि.

[6] R. V. 7. 10. 50. Read अभवद्रयीणाम्.

[7] After स there appears a bit which is worm-eaten.

[8] त्वो partly worm-eaten.

[9] The leaf is worm-eaten above न; it ought to be भूतानि. Perhaps इ mark is worm-eaten.

[10] In देवानां जन्म मनुष्यांश्च only व, ज, नुष्य and श्च are in tact. The rest are completely worm-eaten.

[11] Not seen in N.

स हि रात्रिमानग्निर्ददातु योऽस्मै पर्याप्तो भवति। सूक्तैरेभिरेतानि प्राज्ञ भूतानि निपाहि। देवानां मनुष्याणां च उत्पत्तिस्थानं जानन्॥ ३ (५, ६)

**वर्धान्यं पूर्वीः क्षपो विरूपा स्थातुश्च रथमृतप्रवीतम्।**
**अराधि होता स्व१र्निषत्तः कृण्वन्विश्वान्यपांसि सत्या॥**

वर्धान्। वर्धयन्ति यं पूरयित्र्यः उषसः क्षपो निशाश्च विरूपाः। स्थातुः स्थावरं जंगमं च यं वर्धयन्त्युदकेन प्रवीतम्। समुचयस्य[1] अपेक्षितत्वात् च रथं इति द्वे पदे चकार। सोऽयमरधि भवति[2] होता स्वर्यज्ञे निषण्णः कुर्वन् सर्वाणि कर्माणि सत्यानि॥

यर्धयन्ति यं यह्वयो रात्र्यो नानारूपाः स्थातुरोषध्यादेः अपि स्वर्गप्रापकं सत्येन परिवीतम्। अपि वा यज्ञेन निषिक्तम्। ऋद्धोऽभवत् होता अग्निः सर्वत्र निषण्णः कृण्वन् सर्वाणि कर्माणि सत्यानि॥ ४ (७, ८)

**गोषु प्रशस्तिं वनेषु धिषे भरन्त विश्वे बलिं स्वर्णः।**
**वि त्वा नरः पुरुत्रा सपर्यन्पितुर्न जिव्रेर्वि वेदो भरन्त॥**

गोषु। गोषु प्रशंसां वननीयेषु धिषे कनोषि प्रशंसनीश्रगावः[3]। भरन्तु सर्वे बलिमस्मभ्यं शोभनं विविधं त्वां नरं पुरुत्रा बहुषु देशेषु पूजयन्ति। किं च त्वत्तम[4] पितुरिव जीर्णाद्धनं विहरन्ति स्तोतारः॥

[1] Read समुच्चयस्य.

[2] Perhaps to read सोऽयमराधि आराधितो भवति.

[3] Perhaps to read करोषि प्रशंसनीया गावः

[4] Perhaps to read त्वत्तः

गोषु प्रशस्तं पयो धारयसि या गावो वनेषु चरन्ति। भरन्त च विश्वे बलि शोभनमस्मभ्यम्। विविधं त्वां नराः पूरयन्ति अनेकेषु गृहेषु पितुरिव जीर्णात् धनं त्वदीयं हरन्ति ॥ ५ (९, १०)

**साधुर्न गृध्नुरस्तेव शूरो यातेव भीमस्त्वेषः समत्सु ॥**

साधुः। साधक इव गृध्नुः। क + ष्ठानां[1] अस्तेव शूरो वृक्षाणाम्। शूरः शृणातेः[2]। यातेव भीमः। + तिहननार्थो[3]। दीप्तो[4] दीप्तस्सम-स्विति द्रावस्तुतिरिति[5] ॥

साधयितेव शत्रूणामभिकाङ्क्षितायुधानां क्षेप्तेव शूरः प्रहर्तेव भीमः दीप्तः संग्रामेषु अग्निः—इति धनमाशास्ते सूक्तेन ॥ ६ (११)

---

**उप प्र जिन्वन्नुशतीरुशन्तं पतिं न नित्यं जनयः सनीळाः।**
**स्वसारः श्यावीमरुषीमजुष्रञ्चित्रमुच्छन्तीमुषसं न गावः ॥**

उप प्र जिन्वन्। प्रीणयन्ति कामयानाः कामयानं पतिमिवास्त-धारणं[6] जयाः[7] सनीळा एकपाणिनिलयाः स्वसारोऽङ्गुलयः श्याववर्णा

[1] The first letter looks more like कु than mere क. Then one letter is completely gone. Perhaps to read काष्ठानाम्.

[2] Cf. N. 4. 13.

[3] Perhaps to read यातिर्हननार्थः

[4] दीप्तो not wanted.

[5] Read द्रव्यस्तुतिरिति. There is the figure 9 to mark the end of the Sūkta.

[6] Read कामयमानाः कामयमानं पतिमिवासाधारणं.

[7] Read जाया·

आरोचमाना[1] दीप्तिमसेवन्तेत्यग्निप्रायम् । तथाचैवाह । चित्रं चायनीयमग्नि-मजुषन् गच्छन्तमुषसमिव रश्मयः । कुर्वन्त्यङ्गुलयो मथनम् ॥

उपाचरन् कामयमानाः कामयमानं पतिमिवासाधारणं जाया एकपतिकाः अङ्गुलय एकस्मात् पाणेरुत्पन्नाः अञ्जलिकरणात् श्याववर्णा आरोचनशीलां अग्नेर्दीप्तिं चित्रमजुषन् सेवन्ते उच्छ्वसन्तीमुषसमिव रश्मयः ॥ (१)

**वीळु चिद्दृळ्हा पितरो न उक्थैरद्रिं रुजन्नङ्गिरसो रवेण ।**
**चक्रुर्दिवो बृहतो गातुमस्मे अहः स्वर्विविदुः केतुमुस्राः ॥**

विदुश्चित्[2] । वीळु निबन्धं[3] दृढं पितरोऽस्माकमुक्थैरद्रिं रुजन्नङ्गि-रसो रवेण । चक्रुर्द्युलोकान्महत आरभ्य गच्छंमनमार्गतस्माकम्[4] । अथ तत्र गत्वा वलेन[5] निरुद्धमहः शोभनं विविदुः केतुमादित्यमुस्रा गाश्च विदुरग्निना ॥

महान्तमपि पितरोऽस्माकं स्तोत्रैः शिलोच्चयमरुजन् महता शब्देन । चक्रुर्द्युलोकान्महतो गमनमस्माकं पितरस्तमसो विनाशेन शोभनमहः प्रज्ञां रश्मींश्च विविदुः ॥ (२)

**दधन्नृतं धनयन्नस्य धीतिमादिदर्यो दिधिष्वो३ विभृत्राः ।**
**अतृष्यन्तीरपसो यन्त्यच्छा देवाञ्जन्म प्रयसा वर्धयन्तीः ॥**

[1] Read आरोचमानां.
[2] Read वीळुचित्.
[3] Read निबद्धं.
[4] Read आरभ्य गमनमार्गमस्माकम्.
[5] ले mostly worm-eaten ; only a conjecture.

दधन् । अधारयन्नग्निं धनयन्नह्य[1] गच्छंश्चास्य कर्माङ्गिरसः । अनन्तरमेवार्यः प्रजा विभृधा अग्निं विहरन्त्यः । तत्प्रसादादमृष्यन्तः कर्मवत्यः तमग्निमभिगच्छन्ति । देवान् जन्म मनुष्यांश्चान्नेन वर्धयन्त्यः[2] ॥

धारयत्यग्निं पूरयति चास्य कर्म । अनन्तरमेवाग्निरुदारो धारयति विभृत्रा-स्ताः प्रजा अग्निप्रसादेन पूर्णकामाः कर्माणि अभिगच्छन्ति देवान् जायमाने हविषा वर्धयन्त्यः ॥ (३)

**मथीद्यदीं विभृतो मातरिश्वा गृहे गृहे श्येतो जेन्यो भूत् ।**
**आदीं राज्ञे न सहीयसे सचा सन्ना दूत्यं १ भृगवाणो विवाय ॥**

मथीत् । मथीद्यदेनं प्रजासु विभृतो मातरिश्वा जहारन्दिवो[3] मथीद्यदीं विष्टो मातरिश्वा[4]—इति । यदा चासौ नृणां गृहे गृहे श्येतः श्येतवर्णो[5] जेता अयमभवं[6] तदनन्तरमेव[7] राज्ञ इवाहि + + त्रे[8] सखा-भवन्नन्यो राजा भृगवाणो भृगुऋषिः देवेभ्यो + वर्त्यं + नम[9] .

[1] Read धनयन्नस्य.

[2] Read वर्धयन्त्यः

[3] The two letters after ज mostly worm-eaten; not clear; हार is the nearest conjecture.

[4] R. V. 1. 148. 1.

[5] Read श्वेतवर्णो.

[6] Read अभवत्.

[7] Folio 54*b* ends with मेव.

[8] This folio and the next broken in the middle and the second half is missing. र in रा is lost. After इवाहि two letters are lost; read इवाभिभवित्रे.

[9] Here the leaf breaks and it is only half of each line that is available for the whole leaf.

. . . . . . . . . .
ज्ञोपादो द्वादशकः तथाह्यर्थसामञ्जस्यं व्रजिश्चापि च उत्तरे पादे व्यूह्य[1]

बलेनाजहार यदैनं धारको मातरिश्वा द्युलोकात् । यदा च श्वेतवर्णः जेताग्निः अनुगृहमभवत् अनन्तरमेवैनं राज्ञे इव बलवते सखा सन् आविवाय । वेतिर्गतिकर्मा । आनयत् दूत्यं भृगवाणो दीप्तवर्णो वायुर्दूत्यं चाकरोत् ॥ (४)

**म॒हे यत्पि॒त्र ईं॒ रसं॑ दि॒वे कर॒व त्स॑रत्पृश॒न्यश्चि॑कि॒त्वान् ।**
**सृ॒जद॑स्ता॑ धृष॒ता दि॒द्युम॑स्मै॒ स्वायां॑ दे॒वो दु॑हि॒तरि॒ त्विषिं॑ धात् ॥**

. . . श्वेस्थितो . रतिप्रशनकुशलो
राक्षसस्त्वां गच्छन्तं जानन् स्रजसत्यस्तायष[2] . . . .

महते पित्रे द्युलोकाय देवेभ्यो यदा हविष्ट्वमापन्नं रसमग्निः करोति तदा गच्छन्तमेनं दृष्ट्वा हविःपरिमोक्षणाय स्पर्शने साधुर्दस्युर्जानन् । गच्छन्तमग्निं अवत्सरति मार्गपार्श्वात् कुटिलमवगच्छति । तं दृष्ट्वा अग्निश्च तस्मै धृष्टेन मनसा वज्रं सृजति असनशीलः । सोऽयं स्वायां दुहितरि ज्वालायां दीप्तिं दधाति ॥ (५)

**स्व आ यस्तुभ्यं॒ दम॒ आ वि॒भाति॒ नमो॑ वा॒ दाशा॑दुश॒तो अनु॒ द्यून् ।**
**वर्धो॑ अग्ने॒ वयो॑ अस्य द्वि॒बर्हा॒ यास॑द्रा॒या स॒रथं॒ यं जु॒नासि॑ ॥**

. . . आस्वे गृहे यस्तुभ्या . काष्ठैः
प्रज्वलनं कारयति हविर्वा प्रयच्छति कामयमा[3] . . .

[1] Here the 2nd line ends. The connection of this small portion to the text is not clear.

[2] This is a portion of the commentary on this verse ; so much is clear. This is line 3.

[3] This is line 4.

. . . . . . . . .

. . . सरथं युद्धे प्रेरयसि ॥

स्वे गृहे यस्त्वां काष्ठैः प्रज्वलयति यो वा अन्नमुशतः कामयमानस्य तव ददाति दिवसेषु । वर्धयाग्ने अन्नमस्य द्वयोः स्थानयोर्मध्यमोत्तमयोरपरिवृढः । यस्त्वमग्ने रथसहितं युद्धे प्रेरयसि धनेन सह युद्धात् आगच्छति ॥ (६)

**अ॒ग्निं विश्वा॑ अ॒भि पृक्षः॑ सचन्ते समु॒द्रं न स्र॒वतः॑ स॒प्त य॒ह्वीः ।**
**न जा॒मिभि॒र्वि चि॑किते॒ वयो॑ नो वि॒दा दे॒वेषु॒ प्रम॑तिं चिकि॒त्वान् ॥**

अग्निम् अग्निं सर्वाभ्यन्नान्यभिसेवन्ते समुद्रमिव नद्यः स[1] .

. . . . . . . . .

त् आभिमुख्येनाश्नोति ॥

अग्निं विश्वानि हवींषि अभिसचन्ते समुद्रमिव महत्यः सप्त नद्यः । न बुद्धिभिर्विज्ञायते अन्नमल्पत्वादस्माकम् । तथा सति अग्ने प्रज्ञापय देवेष्वस्माकं बह्वर्थाभिलाषिणीं बुद्धिं जानन् ॥ (७)

**आ यदि॒षे नृ॒पतिं॒ तेज॒ आन॒ट् शुचि॒ रेतो॒ निषि॑क्तं॒ द्यौर॒भीके॑ ।**
**अ॒ग्निः शर्ध॑मनव॒द्यं युवा॑नं स्वा॒ध्यं॑ जनयत्सू॒दय॑च्च ॥**

यत्तेजो नृपतिं धरपतिमन्नार्थं भिक्षमाणं तच्छुचिरेतोऽद्य[2] . .

. . . . . . .

जनयतु पुत्रं प्रेरयतु च तं भिक्षणाय ॥

[1] Line 5 breaks of here.
[2] Line 6 ends here.

आभिमुख्येनाश्नोति यत्तेजो नृपतिमन्नायान्नं जेतुं तादृशं शुचि रेतो मया निषिक्तं च निषिञ्चतश्च मम द्योतमानोऽग्निः समीपे आसीत् । अथाग्निः वेगवन्तमवद्यरहितं तरुणं सुकर्माणं पुत्रं जनयतु । सूदयतु च शत्रून् तन्मुखेन ॥ (८)

**मनो न योऽध्वनः सद्य एत्येकः सत्रा सूरो वस्व ईशे ।**
**राजाना मित्रावरुणा सुपाणी गोषु प्रियममृतं रक्षमाणा ॥**

मनः । शीघ्रगम्मनइव यो दिव्यान् मार्गान् शीघ्रं गच्छति स एकः स[1] . . . . . . . . .
त्वया प्रणीतास्त इमइति वाक्यशेषः ॥

शीघ्रगमन इव यो दिव्यान् मार्गान् शीघ्रं गच्छति स एकः स्वयमेव सूर्यो धनस्य सत्यमीश्वरो भवति । तथा राजानौ मित्रावरुणौ सुपाणी गोषु प्रियं पयः रक्षमाणौ भवतः प्रीणितावग्निना ॥ (९)

**मा नो अग्ने सख्या पित्र्याणि प्र मर्षिष्ठा अभि विदुष्कविः सन् ।**
**नभो न रूपं जरिमा मिनाति पुरा तस्या अभिशस्तेरधीहि ॥**

नामः । मास्माकमग्नेसख्यानि वसिष्ठमुपक्रम्यागतान्यन्यभिप्रमा[2] . . . . . . . . . . . .
. . शस्ते बाधिका . धीति हि बुध्यस्वेति[3] ॥

मास्माकं अग्ने सख्यानि वसिष्ठमुपक्रम्यागतानि अभिप्रमार्जीः वेत्ता कान्तः सन् । आदित्य इव कालात्मा रूपं जरिमा च हिनस्ति पुरा । तस्मादुपद्रवादस्मान् रक्षितुमधिगच्छ ॥ (१०)

---

[1] Line 7 breaks off here.
[2] Line 8 and the page 55*a* end here.
[3] Here there is the figure 10 to mark the end o lthe sūkta.

नि काव्या वेधसः शश्वतस्कर्हस्ते दधानो नर्या पुरूणि ।
अग्निर्भुवद्रयिपती रयीणां सत्रा चक्राणो अमृतानि विश्वा ॥

निका निकः निकरोष्यात्माभिमुखं करोषि काव्यानि[1] . .

. . . . . . . . .

वति रौद्रचः सत्रामहान्ति कुर्वाणोऽमृतानि हिरण्यानि व्याप्तानि स्तोतृभ्यः ॥

अभिमुखानि करोति स्तोतुर्बहोः स्तोत्राणि हस्ते प्रयच्छन् गृहीतानि बहूनि धनानि । अग्निरभवत् रयिपतिः । सत्यमेव कुर्वाणः अन्नानि सर्वाणि पृथूनि ॥ (१)

अस्मे वत्सं परि षन्तं न विन्दन्निच्छन्तो विश्वे अमृता अमूराः ।
श्रमयुवः पदव्यो धियंधास्तस्थुः पदे परमे चार्वग्नेः ॥

अस्मे अस्माकं वत्सभूतमिमं[2] . . . .

. . . . . . . .

न्तःकर्म . नास्तस्थुः । पदे पनमेवारुण्यग्नेः यत्राग्निर्निलीनस्तस्थौ तत्रेति ॥

अस्माकं वत्समग्निं परितः सन्तं इच्छन्तो विश्वे देवाः अमूढा अपि नाविन्दन् । श्रमवन्तः अग्नेः स्थानमन्वेषमाणाः कर्मणो धातारः तस्थुः पदे परमे चारुणि । यत्राग्निर्निलीनः तत्र तस्थुर्निलीनं दृष्ट्वेति ॥ (२)

तिस्रो यदग्ने शरदस्त्वामिच्छुचिं घृतेन शुचयः सपर्यान् ।
नामानि चिद्दधिरे यज्ञियान्यसूदयन्त तन्वः सुजाताः ॥

[1] First line breaks off here.
[2] 2nd line ends here.

तिस्रः तिस्राय[1] . . . . . . .
यो मरुतः पर्यचरन् । अथ त्वामविन्दन् नामानि च दधिरे यज्ञार्हाणि तानि चाध्वर्यु[2] . . .

तिस्रो यदा अग्ने शरदः त्वामेव शुचिं घृतेन शुचयः पर्यचरन् । अथ ते नामानि चित् दधिरे यज्ञार्हाणि इन्द्रो विष्णुर्वरुणो मित्रोऽर्यमेति । तथा शोभनजननाः तनूश्च बह्वीर्यज्ञभागार्थं प्रैरयन् ॥ (३)

**आ रोदसी बृहती वेविदानाः प्र रुद्रिया जभ्रिरे यज्ञियासः ।**
**विदन्मर्तो नेमधिता चिकित्वानग्निं पदे परमे तस्थिवांसम् ॥**

. . . . . . . .
जभ्रिरे रुद्रिया रुद्रार्हाणि स्तोत्राणि विदन्नविन्दं मर्तो मरुद्गणेनेमथितानभसिचिकि[3] . . . . . . .

प्राजभ्रिरे द्यावापृथिवी महती विन्दमानाः यज्ञार्हाः देवाः अस्मै अग्नये स्तोत्राणि । तथा उत्तमे स्थाने तस्थिवांसं अग्निं संग्रामार्थं प्राज्ञो मनुष्यः आश्रयति ॥ (४)

**संजानाना उप सीदन्नभिज्ञु पत्नीवन्तो नमस्यं नमस्यन् ।**
**रिरिक्वांसस्तन्वः कृण्वत स्वाः सखा सख्युर्निमिषि रक्षमाणाः ॥**

. . . . . . . .
कन्त्वामुपसर्पन्त पत्नीवन्तस्त्वान्नमस्कारार्हान्नमस्य रिरित्वांसस्तपसा कर्शयन्त

[1] 3rd line breaks off here.
[2] 4th line breaks off here.
[3] 5th line breaks off here.

स्व[1] . . . . . . . .
तत्रान्तरानुगुणोऽयमर्थ इति ॥

ऐकमत्यं गताः उपासीदन् अभिगतजानुकं पत्नीसहिताः नमस्कार्यमग्निं नमस्यन्ति । तथा रिक्ता भजन्तोऽग्नये स्वानि शरीराणि विधेयीकुर्वन्ति सखायः सख्युरनुग्रहोन्मुखे निमेषे अग्निं हविर्भि रक्षमाणाः ॥ (५)

त्रिः सप्त यद्गुह्यानि त्वे इत्पदाविदन्निहिता यज्ञियासः ।
तेभी रक्षन्ते अमृतं सजोषाः पशूञ्च स्थातॄञ्चरथं च पाहि ॥

त्रिस्सप्त त्रिस्सप्त यद्यानि गुह्यान्येकविंशतिस्त्वय्येव[2] . .
. . . . . . . . .
ञ्च पाहि ॥

त्रिः सप्त यद्गुहायां निहितानि त्वयि पदानि निवासस्थानानि धनानि अविदन् निहितानि देवाः । त्वया पुनः प्रत्तानि धनानि अलभन्त । तैर्लब्धैः अमृतमग्निं त्वामेव रक्षन्ते संगताः । स त्वं पशून् स्थावराणि जंगमं ज पाहि ॥ (६)

विद्वाँ अग्ने वयुनानि क्षितीनां व्यानुषक्छुरुधो जीवसे धाः ।
अन्तर्विद्वाँ अध्वनो देवयानानतन्द्रो दूतो अभवो हविर्वाट् ॥

विद्वान् । जानन्नेव गन्तव्यानि मनुष्याणां विधेह्यनुषक्तं शुचो[3]
. . . . . . . . .
भवो हविर्वोढा ॥

[1] 6th line ends here.
[2] 7th line breaks off here.
[3] 8th line and folio 55*b* end here.

प्रज्ञानानि मनुष्याणां विधेहि । तथा शुचो रोधयित्रीरपश्च जीवनाय अनुषक्तं कुरु । देवयानान् मार्गान् अन्तर्जानन् यत्र यत्र रक्षांसि चरन्ति तं तं देशं जानन् अनलसो दूतोऽभवः हविषां वोढा ॥ (७)

**स्वाध्यो दिव आ सप्त यह्वी रायो दुरो व्यृतज्ञा अजानन् ।**
**विदद्गव्यं सरमा दृळ्हमूर्वं येना नु कं मानुषी भोजते विट् ॥**

स्वाध्यः । सुकर्मणो दिव आपतन्ति सप्तन्त्य[1] नद्यस्त्वया प्रहिताः । अपिच व + नापिहितस्य[2]धनस्य द्वाराण्य + रसो[3]ऽजानन् । अपि च अविदन् गव्यं सरमा वलेन द्रहितमूर्वम् । संसमूर्वं ब्रुवते येनानुक्तमङ्गिरोभिराहूतेन मानुषी विडियं भुङ्क्ते इति[4] ॥

सुकर्माणो दिवः सकाशादसुरपुरं प्रत्यागताः सप्त महतीः गोधनस्य दुरोऽङ्गिरसो व्यजानन् । पणिभिरपहृतानां गवामानयनाय सप्त मार्गानजानन् । तथा लब्धवती सरमा नाम देवशुनी दृढं महान्तं गोसंघं येन संघेन मानुषी विट् उपभुङ्क्ते अग्नेः कर्मणा तथाकुर्वन् ॥ (८)

**आ ये विश्वा स्वपत्यानि तस्थुः कृण्वानासो अमृतत्वाय गातुम् ॥**
**मह्ना महद्भिः पृथिवी वि तस्थे माता पुत्रैरदितिर्धायसे वेः ॥**

आ ये । आतिष्ठन्ति ये विश्वानि शोभनानि कर्माण्यादित्याः कुर्वाणा अमृतत्वसिध्यर्थमात्मनो गातुमुपायम् । मह्ना महद्भिरत्यन्तमहद्भिः पृथिवीयं

[1] Read सर्पन्त्यः

[2] On this page, the leaf is cut into two and at the place where it is cut in each line, a small bit is lost ; here the reading must be वलेनापि हितस्य.

[3] Read द्वाराण्यङ्गिरसो.

[4] Not clear.

वितिष्ठते तैः मा + ता[1] पुत्रैरदितिर्धारणार्थं वेरन्नमग्निरिति । नि गव्यता मनसा सेदुः[2]—इत्यत्र यच्छब्दानुप्रसृष्टत्वात् गातुशब्दार्थभेदाद्वा न सक्रु +[3] न इति न सृष्टः पाद[4] इति ॥

आतस्थुर्ये विश्वानि स्वपतननिमित्तानि कर्माणि कुर्वन्तः अमृतत्वसिद्ध्यर्थं मार्गम् । अत्यन्तं महद्भिस्तैरियं पृथिवी ध्रियमाणा वितिष्ठते माता पुत्रैर्मनुष्यै-रदीना गमनशीलस्याग्नेः पानाय तं सोमं पाययितुम् ॥ (९)

अधि श्रियं नि दधुश्चारुमस्मिन्दिवो यदक्षी अमृता अकृण्वन् ।
अध क्षरन्ति सिन्धवो न सृष्टाः प्र नीचीरग्ने अरुषीरजानन् ॥

अधि । अधिनिदधुः प्रज्वलनेन यजमानाः श्रियं कल्याणीमस्मिन् दिवो यदा चक्षुषी कुर्वन्ति यज्ञं प्रागन्तुं देवाः । अथ त्वत्तः क्षरन्ति सिन्धव इव सृष्टा ज्वालाः प्रजानन्नग्ने नीचीना आरोचमानास्ताः सख्ये नर इति[5] ॥

अधिनिदधुः प्रज्वलनेन शोभां कल्याणीं अग्नौ दिवो यदा चक्षुषी हविर्जिघृक्षया देवा अकृण्वन् प्रज्वलितेऽग्नौ पृथिव्याम् । क्षरन्ति सिन्धव इव उद्युक्ता देवाः । ततो ज्वलितोपशान्तस्य अग्ने तव न्यग्भूता लोलायमाना ज्वालाः जानन्ति निरूपणीयं सूक्तम् ॥ (१०)

---

[1] वितिष्ठते तैर्मा; then there is some letter which cannot be deciphered and ता follows: this undeciphered letter is not wanted.

[2] R. V. 3. 31. 9.

[3] On account of the cut in the leaf, a letter is missing; the आ mark following it is clear.

[4] Not clear.

[5] Here there is the figure 11 to mark the end of the sūkta.

र॒यिर्न यः पि॑तृवि॒त्तो व॑यो॒धाः सु॒प्रणी॑तिश्चिकि॒तुषो॒ न शासुः॑ ।
स्यो॒न॒शीरति॑थि॒र्न प्री॑णा॒नो होते॑व॒ सद्म॑ विध॒तो वि ता॑रीत् ॥

रयिर्न[1] । धनमिव यः पितृतो लब्धं अन्नस्य प्रदाता[2] संप्रणयनश्च[3] भवति । विदुष इव शासनम् । यश्च सुखे शाययस्यति[4] थिरव[5] सन्तप्यमाणो[6] होतेच[7] गृहं यजमानस्य वितरति वर्धयन्ति ॥

धनमिव यः पितृतो लब्धं अन्नस्य दाता सुप्रणयनश्च भवति । विदुष इव शासनं स सुखेषु शाययति । अतिथिरिव तृप्यन् होतेव यजमानस्य यज्ञगृहं वितरति हविर्वहनेन ॥ (१)

दे॒वो न यः स॑वि॒ता स॒त्यम॑न्मा क्रत्वा॑ नि॒पाति॑ वृ॒जना॑नि॒ विश्वा॑ ।
पु॒रु॒प्र॒श॒स्तो अ॒मति॒र्न स॒त्य आ॒त्मेव॒ शेवो॑ दिधि॒षाय्यो॑ भूत् ॥

देवः । देव इव यस्सविता सत्यस्तोत्रः क्रत्वा सुष्ठु निरक्षति वृजनानि रक्षांसि सर्वाणि । निपातनं परिरक्षणम् । बहुभिः प्रशस्तोऽमतिरिव सत्यभूतः । रूपाहि सत्यं दारिद्र्येत्वाद्युदात्तमदुर्वात्तमससे मतये सोमयः[8] ।

[1] The first letter not clear ; perhaps first written न and corrected into र.

[2] The आ mark of दा and ता mostly worm eaten.

[3] After संप्रण, the next letter is completely lost ; प्रण also half lost ; better read सुप्रणयनश्च.

[4] Read शाययति.

[5] Read अतिथिरिव.

[6] Read संतृप्यमाणो.

[7] Read होतेव.

[8] Not clear.

शेवस्सुखकर[1] पुरुषस्यात्मेव दिधिषाय्यो भरणीयो भवति । देवो न यस्सविता—इति पादः पावमाने[2] न सृज्यते । तत्र क्रियापदमध्याहार्यमिति ।

देव इव सविता सत्यमनाः कर्मणा निरक्षति विश्वानि उपद्रवाणि । बहुभिः प्रशस्तः रूपमिव सत्यम् । तद्धि चक्षुर्ग्राह्यं श्रद्धेयं सत्यं भवति । शरीरमिव भरणीयो भवति सुखकरम् ॥ (२)

**दे॒वो न यः पृ॑थि॒वीं वि॒श्वधा॑या उप॒क्षेति॑ हि॒तमि॑त्रो॒ न राजा॑ ।**
**पु॒रः॒सदः॑ शर्म॒सदो॒ न वी॒रा अ॑नव॒द्या पति॑जुष्टेव॒ नारी॑ ॥**

देवः । देव इव यस्सविता पृथिवीं विश्वधर्ता उपनिवसति हितमित्रश्च राजा । सुखं य पुरस्सीदन्तः शर्मसद[3] इव वीरा भवन्ति पुत्रा इव पितुर्गृहे वर्तमानाः । अनवद्या शोभनाङ्गी पतिसेवितेव च भवति नारीति ॥

देव इव सविता पृथिवीं विश्वस्य धर्ता उपेत्य वसति अनुकूल इव राजा । स यदा सर्वां पृथिवीमधितिष्ठति यस्य चाग्नेः पुरः सीदन्तः दुर्गगृहस्थितः वीरा इव अप्रधृष्या भवन्ति । अवद्यरहिता रूपिणी पत्या सेविता स्त्री इव ॥ (३)

**तं त्वा॒ नरो॒ दम॒ आ नित्य॑मि॒द्धम॑ग्ने॒ सच॑न्त क्षि॒तिषु॑ ध्रु॒वासु॑ ।**
**अधि॑ द्यु॒म्नं नि द॑धु॒र्भूर्य॑स्मि॒न्भवा॑ वि॒श्वायु॑र्ध॒रुणो॑ रयी॒णाम् ॥**

[1] Read सुखकरः. The leaf is broken across in the middle after र; but there is no sign of a visarga.

[2] R. V. 9. 27. 48.

[3] After सुखं there is the cut across in the middle and a small portion is broken off. य is partly seen; रस्सीदन्त is also intact; द इव is also clear; other letters completely lost; only a conjectural reading. Read स यदा for सुखं य.

तं त्वा। तं त्वा नरो गृहे नित्यं समिद्धमग्ने सेवन्ते क्षितिक्षु धूवामु[1]। ध्रुवा: क्षितयो ग्रामा + + घिष्ण्या:[2]। अधिनिदधुश्चान्नं यस्मिंस्वधि[3]। स त्वमस्माकं सत्वमस्माकं[4] सर्वतो भव रयीणाम्॥

तं त्वां नर: गृहे नित्यं समिद्धं अग्ने सेवन्ते अग्निनिधानयोग्यासु दृढासु भूमिषु। तथास्मिन्नधिनिदधुश्चान्नं बहु। स त्वं भव सर्वान्नो धनानां धारक:॥ (४)

वि पृक्षो अग्ने मघवानो अश्युर्वि सूरयो ददतो विश्वमायुः।
सनेम वाजं समिथेष्वर्यो भागं देवेषु श्रवसे दधानाः॥

वि[5] प्रक्ष: व्यश्युरग्नेऽन्नं धनवन्त:[6] व्यश्युश्चोदारा[7] ददतो धनानि विश्वं जीवितम्। लभेमह्यन्नं युद्धेषु वयं शर्धो हविर्देवे + + न्निदधाना[8] इति॥

व्यश्यु: अग्ने अन्नं धनवन्त:। व्यश्यु: प्राज्ञा: ददतो विश्वमन्नं दरिद्रेभ्य:। वयं च लभेमहि अन्नं संग्रामेषु शत्रोर्भागं देवेष्वन्नार्थं निदधाना:॥ (५)

ऋतस्य हि धेनवो वावशानाः स्मदूध्नीः पीपयन्त द्युभक्ताः।
परावतः सुमतिं भिक्षमाणा वि सिन्धवः समया सस्रुरद्रिम्॥

[1] Read क्षितिषु ध्रुवासु.

[2] After ग्रामा there is the cut across the leaf and two letters are lost.

[3] Read यस्मिंस्त्वयि.

[4] The repetition of स त्वमस्माकं not wanted.

[5] वि completely worm-eaten.

[6] Folio 56*a* ends here.

[7] व्य completely lost as corner is broken.

[8] After देवे there is the cut across the leaf and 2 letters are missing. Perhaps the letters are ष्वन्न.

ऋतस्य । अग्निं हि धेनवः कामयमानाः प्रशस्तोधस्का वृद्धपय + + + दीप्तियुक्ताः[1] अदिद्र अधारयन्त[2] द्युभक्तम् । दूरादग्नेः सुमतिं भिक्षमाणा विसरन्ति नद्यः पर्वतस्य समीपे वसन्त्ये + प्रीतान्[3] कामानभिवाञ्छन्त्यो वहन्ति तेनानुशिष्टाः पर्वतेभ्यो दूरं नन्नः ॥

अग्नेर्हि धेनवः कामयमानाः प्रशस्तोध्न्यः अवृद्धवयस्का आसन् संभक्तस्वर्गाः । तदेवाह—दूरात् सुमतिमग्निमिवेक्षितं भिक्षमाणा विसस्रुः सिन्धवः अद्रिं अग्निं समया अग्निसमीपे । अद्रिरादृणात्यमित्रान्—इति । स्वर्गस्था आपः अग्निं प्रत्यागच्छन्ति ॥ (६)

त्वे अ॑ग्ने सु॒म॒तिं भिक्ष॑माणा दि॒वि श्रवो॑ दधिरे य॒ज्ञिया॑सः ।
नक्ता॑ च च॒क्रुरु॒षसा॒ विरू॑पे कृ॒ष्णं च॒ वर्ण॑मरु॒णं च॒ सं धुः ॥

त्वे अग्ने । अ + ग्ने[4] सुमतिं भिक्षमाणा दीप्ते हविर्दधिरे देवाः । त्वत्प्रणीताश्चाहोरात्रे अकुर्वन् विरूपे तत्र कृष्णं वर्णानिशाया + + रहन्यारोचमानं[5] श्वेतमिति ॥

[1] After वृद्धपय the leaf is worm-eaten ; one letter is completely lost and three letters made too illegible ; दीप्तियुक्ताः is fairly clear ; read अवृद्धवयस्काः स्वर्गभक्ता दीप्तियुक्ताः

[2] After युक्ताः three letters again very illegible ; look like अद्रिद्र ; then अधारयन्त in the next line clear.

[3] After वसन्त्ये there is the cut across ; one letter missing ; perhaps वसन्त्योऽप्रीतान्.

[4] Between अ and ग्ने one letter is completely worm-eaten.

[5] After वर्णानिशाया there is the cut across the leaf and three letters missing. Read वर्णं निशायामवश्चुरहन्यारोचमानं,

त्वयि अग्ने सुमतिं त्वदीयां भिक्षमाणाः दीप्तं हविर्निदधिरे यजमानाय यज्ञार्हाः । अहोरात्रे विरूपे चक्रुः । कृष्णमरुणं च वर्णमहोरात्रयोश्चक्रुः ॥ (७)

यान् राये मर्तान्त्सुषूदो अग्ने ते स्याम मघवानो वयं च ।
छायेव विश्वं भुवनं सिसक्ष्यापप्रिवान् रोदसी अन्तरिक्षम् ॥

यान् । यांस्त्वमग्ने धनाय मनुष्यान् प्रेरयस्य[1] ते स्याम सधं च[2] मघवानो धनवन्तः सन्तः । त्वं छायेव विश्वं भूतं सेवसे लोकानापूरयन्निति । नृचक्षा एव दिवो मध्य आस्ते[3]—इत्यस्यां आपप्रिवान्[4]—इति पादो न स्पृष्टः । तत्र ह्यापूरयन्नास्त इति भवन्ति[5] । इह पुनरापप्रिवांश्च भवसीति ॥

यांस्त्वं अग्ने धनाय मनुष्यान् प्रैरयः ते वयं स्याम । तदेवाह—धनवन्तो वयं च—इति । छायेव विश्वं भूयजातं सेवसे पूरयन् त्रीन् लोकान् ॥ (८)

अर्वद्भिरग्ने अर्वतो नृभिर्नॄन्वीरैर्वीरान्वनुयामा त्वोताः ।
ईशानासः पितृवित्तस्य रायो वि सूरयः शतहिमा नो अश्युः ॥

अर्वद्भिः । अस्मदीयैरश्वैरग्ने परेषामश्वानभिभवेम । नृभिः शासनमिति[6] ॥

[1] Read प्रयति.
[2] Perhaps it is स्वयं च.
[3] R. V. 10. 139. 2. Read एष for एव.
[4] Second pāda in R. V. 10. 139. 2.
[5] Read भवति.
[6] The rest of the commentary missing for this verse.

अग्ने त्वया रक्षिताः सन्तो वयं अश्वादिभिः सह अनुस्यूतान् अश्वादीन् भजेमहि। ईश्वराः पितृलब्धस्य धनस्य अस्माकं पुत्राः शतं संवत्सरान् व्यश्नुवीरन् पितृलब्धं धनम्॥ (९)

**एता ते अग्न उचथानि वेधो जुष्टानि सन्तु मनसे हृदे च।**
**शकेम रायः सुधुरो यमं तेऽधि श्रवो देवभक्तं दधानाः॥**

एता। एतानि ते अग्ने सूक्तानि वेधः पर्याप्तानि सन्तिन्तु[1] हृदे मनसे च। शकेम रायो दातुस्सुधुरो वोढुस्तव यमनं कर्तुं देवभक्तमन्नमधिन्निदधाना इति[2]॥

एतानि ते अग्ने वचनानि सूक्तानि विधातः पर्याप्तानि भवन्तु मनसे हृदयाय च। तव धनस्य यमनं कर्तुं सुधुरो वयं शकेम त्वया दत्तां लक्ष्मीं नियन्तुं समर्था भवेम देवैर्भक्तं अन्नं हविः अग्नौ अधिदधानाः॥ (१०)

---

**उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये। आरे अस्मे च शृण्वते॥**

उपप्रयन्तः। राहूगणो गौतमः। तथा स्वयं वक्ष्यति वाजसनेयकम्[3]। उपप्रयन्तो यज्ञमित्येतत् मन्त्रं ह्यस्मै यक्ष्यन् वक्ष्यन् भवति। आरे अस्मे च शृण्वते इति। यद्यप्यस्माद्दूरमस्य धनमिदमेव शृणु। इत्थमेवेदमस्त्वित्येवैतदाहेति॥

[1] Read सन्तु.

[2] Perhaps to read अधिदधाना इति or अधिनिदधाना इति. Here there is the figure 12 to mark the end of the sūkta.

[3] The allusion to Vājasaneyaka not clear.

गोतमो राहूगणः । उपप्रयच्छन्तो यज्ञं मन्त्रं वोचेमान्वहं अग्नये । दूरेऽपि स्थित्वा ,अस्माकं वचनं शृण्वते । अपेक्षिते धने दूरे स्थितेऽपि स्तोतुर्वचनं शृणोति इति वाजसनेयके उक्तम् ॥ (१)

**यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु । अरक्षद्दाशुषे गयम् ॥**

यः[1] स्नीहीतिर्वेधर्मायो + त्रिषु[2] संगच्छमानासु प्रजासु प्रत्नो[3] रक्षति यजमानाय धत्नम्[4] ॥

यो हन्त्रीषु संगच्छमानासु शत्रुभूतासु प्रजासु पुराणो रक्षन् यजमानाय गृहं मह्यम् । तस्मै मन्त्रं वोचेम ॥ (२)

**उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाजनि । धनंजयो रणे रणे ॥**

उत् । कामं स्तुवौवृत्विज[5] उदजनि अग्निर्मथितो वृत्रहा धनानां जेता समत्सु[6] ॥

काममेवं स्तुवन्तु मनुष्याः । उदजनि अरण्योरग्निः वृत्रहा युद्धे युद्धे धनस्य जेता ॥ (३)

[1] Pratika not separately given.

[2] After र्मायो there is the cut across the leaf and one letter is lost.

[3] प्र broken ; only the top portion of प seen ; र mark completely lost.

[4] The word is given with त् and न separately and not as a single letter. Read धनम्.

[5] Perhaps to read कामं स्तुवन्तु ऋत्विज.

[6] The repetition of रणे not noticed in commentary ; perhaps to read सर्वेषु समत्सु.

यस्यं दूतो असि क्षये वेषि हव्यानि वीतये । दस्मत्कृणोष्यध्वरम् ॥

यस्य । द्रुच एकार्थः । यस्य वसि[1] गृहे दूतस्त्वं यस्य च हवींषि इच्छसि भक्षणाय यस्य च दर्शनीयं करोषि यज्ञम् ॥

यस्य दूतो भवसि गृहे कामयसे च हव्यानि अशनाय यस्य च यज्ञं दर्शनीयं करोषि ॥ (४)

तमित्सुंहव्यमङ्गिरः सुदेवं संहसो यहो । जनां आहुः सुबर्हिषम् ॥

तमेव सुहव्यमङ्गिरः सुदेवं च सहसस्सूनो जना आहुः सुस्तीर्णबर्हिषं च ॥

तमेव शोभनहविष्कं अङ्गिरः जनाः आहुः सुदेवं च सहसः पुत्र शोभनयज्ञं च ॥ (५)

आ च वहांसि तां इह देवां उप प्रशस्तये । हव्या सुश्चन्द्र वीतये ॥

आ व[2] । आवहासि[3] चैतानिह देवान् प्रशस्तये स्तुवते मह्यं हव्यानीमानित्रे[4] सुकान्त तेषामशनाय भवेयुः ॥

उपावहसि च तान् इह देवान् प्रशंसनाय इमानि हव्यानि सुकान्त देवानामशनाय भवेयुः ॥ (६)

[1] Read भमसि.

[2] Read आ च. Folio *56b* ends here.

[3] Although there is वहासि in the text, perhaps to read only वहसि in the commentary.

[4] After हव्यानीमानि there is a letter partly worm-eaten; ए mark is clear: the letter appears to be श्रे.

न योरुपब्दिरश्व्यः शृण्वे रथस्य कच्चन । यदग्ने यासि दूत्यम् ॥

न योः । न गच्छतस्तव रथस्याश्वैरुत्पादित उपब्दः[1] शब्दः कदाचित् श्रूयते तदानीयं[2] यदाग्ने यासि दूत्यम् । ऋषिवचनोन्तोदात्तः । नूनं श्रुधि स्तुवतो म[3] अश्वस्य[4] ॥

न गच्छतः शब्दः अश्वेषु भवः श्रूयते कदाचिदपि रथस्य यदाग्ने गच्छसि दूत्यम् । रक्षसामनन्वचाराय निःशब्दं गच्छसि ॥ (७)

त्वोतो वाज्यह्रयोऽभि पूर्वस्मादपरः । प्र दाश्वाँ अग्ने अस्थात् ॥

त्वोतः । त्वया रक्षितो बलवानजन्ममानोऽभिप्रतिष्ठति[5] पूर्वस्मादपरः यः पूर्वो भवति ततोऽन्योऽत्यन्तं बलयुतो[6] यजमानोऽग्ने इति ॥

त्वया रक्षितः अन्नवान् अलज्जन् पूर्वस्मादपरः यादृगाकारः पूर्वस्तादृगाकारः अभिप्रतिष्ठति उच्छ्रिते पदे यजमानः ॥ (८)

उत द्युमत्सुवीर्यं बृहदग्ने विवाससि । देवेभ्यो देव दाशुषे ॥

उत । अपि च दीप्तिमत् शोभनं बलं बृहदग्ने प्रेरयसि वेदेभ्यो[7] देव दाशुषे यजमानायेति[8] ॥

[1] Read उपब्दिः ; I am not sure if there was an इ mark above ब्द ; some colouring matter on the top of the letter has disfigured it.

[2] Read तदानीं.

[3] म unnecessary ; to be deleted.

[4] R. V. 8. 24. 14.

[5] Read बलवानलज्जमानो.

[6] Read बलयुक्तो.

[7] Read देवेभ्यो.

[8] Here there is the figure 13 to mark the end of the sūkta,

अपि च दीप्तिमत् शोभनवीर्यं बृहदन्नं गमय प्रयच्छ देवेभ्यो देव दाशुषे ॥ (१०)

---

## जुषस्व सप्रथस्तमं वचो देवप्सरस्तमम् । हव्या जुह्वान आसनि ॥

जुषस्व । जुषस्व सर्वतः पृथातमं[1] अत्यन्तं दीप्यरूपं[2] वचो हवींषि निक्षिपन्नास्ये ॥

सेवस्व सर्वतः पृथुतमं वचः अतिशयेन दीप्तरूपम् । प्स इति रूपनाम । रो मत्वर्थीयः । हव्यान्यास्ये प्रक्षिपन् ॥ (१)

## अथा ते अङ्गिरस्तमाग्ने वेधस्तम प्रियम् । वोचेम ब्रह्म सानसि ॥

अथ । अथ तेऽङ्गिरसां वरिष्ठाग्ने प्राज्ञतम प्रियं वोचेम स्तोत्रं भजनीयम् ॥

अथ ते अङ्गिरसां वरिष्ठ अग्ने प्राज्ञतम प्रियं वोचेम स्तोत्रं भजनीयम् ॥ (२)

## कस्ते जामिर्जनानामग्ने को दाश्वध्वरः । को ह कस्मिन्नसि श्रितः ॥

कस्ते । कस्ते बन्धुर्जनेष्वग्ने । कीदृशो वा तव दत्तयज्ञः । कीदृशशीलः त्वं कस्मिंश्चासि श्रित इति ॥

कस्ते बन्धुर्जनेषु । कीदृशो वा तव दत्तयज्ञः । कीदृशशीलः त्वमसि । कीदृशशीले वा आश्रितो भवसि ॥ (३)

[1] Read पृथुतमं.

[2] Read दीप्तिरूपं.

**त्वं जा॒मिर्जना॑ना॒मग्ने॑ मि॒त्रो अ॑सि प्रि॒यः । सखा॒ सखि॑भ्य॒ ईड्यः॑ ॥**

षस्पष्ट उत्तरो द्वृचः[1] ॥

त्वं बन्धुर्जनानां अग्ने प्रियं मित्रं च भवसि सखा सखिभ्यः स्तोतव्यः ॥ (४)

**यजा॑ नो मि॒त्रावरु॑णा॒ यजा॑ दे॒वाँ ऋ॒तं बृ॒हत् । अग्ने॒ यक्षि॒ स्वं दम॑म् ॥**

यजा[2] देवान् ऋतं बृहत् इति । बृहद्धचेतद्रतः[3] तद्देवाः । स्वं च धाम यजेति[4] ॥

यजास्माकं मित्रादीन् बृहद्दतमादित्यम् । स्वो दमः स्वशरीरम् । तं च यज । अग्निमग्न आवह—इति मन्त्रः । सूक्ते मित्रादीनां यागमाशास्ते ॥ (५)

---

**का त॒ उपे॑ति॒र्मन॑सो॒ वरा॑य॒ भुव॑दग्ने॒ शंत॑मा॒ का म॑नी॒षा ।**
**को वा॑ य॒ज्ञैः परि॒ दक्षं॑ त आ॒प केन॑ वा ते॒ मन॑सा दाशेम ॥**

का ते । कीदृशमुपगमनं तव मनसो निवारणाय भवन्ति[5] । भवति चाग्ने सुखतमा तव का स्तुतिः । को वा यज्ञैस्वक्तो[6] वृद्धिं बलं वा प्राप्नोति । केन वा मनसा युक्ता ददामः ॥

[1] Read only स्पष्ट उत्तरो द्वृचः

[2] Pratika not separately given.

[3] Read बृहद्धयेतद्दतम्.

[4] There is the figure 14 to mark the end of the sūkta.

[5] Read भवति.

[6] Read यज्ञैस्त्वक्तो.

कीदृशं तव उपगमनं मनसो वरणाय । का वा भवति तव स्तुतिः । को वा यज्ञैः त्वत्तो वृद्धिं आप । कीदृशेन वा मनसा युक्ताः तुभ्यं ददामः ॥ (१)

एह्य॑ग्न इ॒ह होता॒ नि षी॒दाद॑ब्धः॒ सु पु॑रए॒ता भ॑वा नः ।
अव॑तां त्वा॒ रोद॑सी विश्व॒मि॒न्वे यजा॑ म॒हे सौ॑मन॒साय॑ दे॒वान् ॥

स्पष्टोत्तरा । विश्वमिन्वे ये सर्वं प्रीणयतः इति ॥

आगच्छाग्ने । अत्र होता सन् निषीद अहिंसितस्त्वम् । सुष्ठ्वस्माकमग्रतो गन्ता भव । हौत्रं कुर्वाणं त्वां सर्वव्यापिन्यौ द्यावापृथिव्यौ रक्षताम् । अथ महते सौमनसाय यज देवान् ॥ (२)

प्र सु विश्वा॑न् र॒क्षसो॒ धक्ष्य॑ग्ने॒ भवा॑ य॒ज्ञाना॑मभिशस्ति॒पावा॑ ।
अथा॑ वह॒ सोम॑पतिं॒ हरि॑भ्यामाति॒थ्यम॑स्मै चकृमा सु॒दाव्ने॑ ॥

स्पष्टैवोत्तरा । अभिशस्तिपापा[1] रक्षकोऽभिशस्तिर्बाधक इति ॥

प्रदह सुष्ठु विश्वान् राक्षसान् अग्ने । भव त्वं यज्ञानां उपद्रवस्य रक्षकः । तत इन्द्रं तदीयाभ्यां अश्वाभ्यां सह आवह । आतिथ्यमस्मै इन्द्राय वयं कुर्मः शोभनदानाय ॥ (३)

प्र॒जाव॑ता॒ वच॑सा॒ वह्नि॑रा॒सा च॑ हु॒वे नि च॑ सत्सी॒ह दे॒वैः ।
वेषि॑ हो॒त्रमु॒त पो॒त्रं य॑जत्र बो॒धि प्र॑यन्तर्जनित॒र्वसू॑नाम् ॥

प्रज्ञावा[2] । प्रजाप्रदेन वचसा युक्तस्त्वमास्येन वह्निर्वोढा भवसि तेज

[1] Read अभिशस्तिपावा.

[2] Read प्रजावता.

आढ्यम्[1] । अपि वा आसेति परशेषम्[2] । तं त्वां आ च हुवे । निषीद चेह देवैः । कामयसे होतृकर्म पोतृकर्म युवतम[3] । स त्वं बुध्यस्वास्मान् वसूनां प्रदातर्जनयितः । अग्निर्हि वसूनि प्रयच्छति जनयति चेति ॥

प्रजननवता प्रादुर्भवता वचसा वोढा अहमास्येन आहुवे त्वाम् । त्वं च निषीद यज्ञे देवैः सह । कामयसे होतृकर्म पोतृकर्म च यष्टव्य । बुद्ध्यस्व प्रदातः जनयितः । धनानां दाता भवामि ॥ (४)

**यथा विप्रस्य मनुषो हविर्भिर्देवाँ अयजः कविभिः कविः सन् ।**
**एवा होतः सत्यतर त्वमद्याग्ने मन्द्रया जुह्वा यजस्व ॥**

स्पष्टोत्तरा । कविभिः कविः कविभ्योऽपि कविरिति[4] ॥

यथा मेधाविनः मनोः प्रजापतेर्हविर्भिः देवानयजः कविभ्योऽपि कविः सन् । एवं होतः अतिशयेन सत्य अद्य त्वं अग्ने मन्द्रया ज्वालया देवान् यजस्व ॥ (५)

---

**कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः ।**
**यो मर्त्येष्वमृत ऋतावा होता यजिष्ठ इत्कृणोति देवान् ॥**

[1] Word not clear.
[2] Passage not clear.
[3] युवतम cannot be the meaning of यजत्र.
[4] Here there is the figure 15 to mark the end of the sūkta.

कथा । स्पष्टा । देवजुष्टा कल्याणी । भामो रश्मिरिति । यो मर्त्येष्वमृत[1] ऋतावा[2]—इति पादो वामदेवे[3] न सृज्यते । अत्र हि मर्त्यानामन्तः इति सप्तम्यर्थः । यदि वा मर्त्येष्वमृत[4] इति ॥

कथमग्नये हविर्दाशेम । का वास्मै देवैर्जुष्टा कल्याणी उच्यते शत्रुषु क्रोधवते स्तुतिः । यः अमृतः मनुष्येषु देवान् कृणोति सत्यवान् होता यष्टृतमः ॥ (१)

**यो अध्वरेषु शंतम ऋतावा होता तमू नमोभिरा कृणुध्वम् ।**
**अग्निर्यद्वेर्मर्ताय देवान्त्स चा बोधाति मनसा यजाति ॥**

यः । यो यज्ञेष्वत्यन्तं सुखकृत् सत्यवान् होता भवति तं यूयं स्तुतिभिराकुरुत । अग्निर्यदा[5] गच्छति मर्त्यार्थे देवान् स चेत् बुध्यते यजामि[6] देवानिति स्तोत्रेण तान् यजति ॥

यो यज्ञेषु सुखतमः ऋतावा होता भवति तं यूयं नमस्कारैः आत्माभिमुखं कुरुत । अग्निर्यस्मान्मनुष्यार्थं देवान् गच्छति स चेत् बुध्यते यक्ष्यामीति ततो बुद्धिपूर्वमेव यजति ॥ (२)

[1] Reed मर्त्येष्वमृतो.

[2] R. V. 4. 2. 1.

[3] In the fourth maṇḍala.

[4] Read मर्त्येष्वमृत.

[5] Folio 57*a* ends here.

[6] After बु five letters are badly injured. ध्य can be made out. The next letter seems to have an ए mark preceding. The next two letters are completely gone. आ mark after the second is in tact, and so is मि.

**स हि क्रतुः स मर्यः स साधुर्मित्रो न भूदद्भुतस्य रथीः ।**
**तं मेधेषु प्रथमं देवयन्तीर्विश उप ब्रुवते दस्ममारीः ॥**

स हि । स हि कर्ता । स मारकः । स साधकः । स वै भवत्यद्भुतस्य नेता[1] । अद्भुतमभूतमलब्धम् । महदप्यद्भुतमम्[2] । तदन्तोदात्तम् । षवषट्कृतं[3] स्यात् एतस्येति[4] । तं यज्ञेषु प्रथमं देवकामा विश उपब्रूवते[5] दर्शनीयं आरीः । आर्यस्त्रैवर्णिक्यः ॥

स हि कर्ता । स मारकः । स साधयिता । सखा इवाभूत् महतो नेता । तं यज्ञेषु प्रथमं देवयन्त्यः प्रजाः उपस्तुवन्ति दर्शनीयं अर्यः ॥ (३)

**स नो नृणां नृतमो रिशादा अग्निर्गिरोऽवसा वेतु धीतिम् ।**
**तना च ये मघवानः शविष्ठा वाजप्रसूता इषयन्त मन्म ॥**

स नः । सोऽस्माकं नेतृणां नेतृतमो रिशतामसिता अग्निः स्तुतिरन्नेति[6] कामयतां कर्म च । तनमिति धननाम । वनेन[7] च ये मघवानोऽत्यन्तं बलिनो वाजप्रसूताः प्रेरितहविष्का ऐच्छन्नग्नेः स्तोत्रं तेषामन्येषामपीति ॥

सोऽस्माकं नेतृणां वरिष्ठः रिशतामसिता अग्निः स्तुतीः रक्षणार्थं कामयतां कर्म च । धनेन ये धनवन्तः अतिशयेन बलिनः प्रेरितहविष्काः ऐच्छन्नग्नेः स्तोत्रं तेषां अस्माकमपि ॥ (४)

[1] मित्रो न omitted.

[2] Read महदप्यद्भुतम्.

[3] Read वषट्कृतं.

[4] स्यात एतस्येति mostly worm-eaten. Only a conjecture ; not clear.

[5] Read उपब्रुवंते.

[6] Read स्तुतीरक्षार्थं.

[7] Read धनेन.

एवाग्निर्गोतमेभिर्ऋतावा विप्रेभिरस्तोष्ट जातवेदाः ।
स एषु द्युम्नं पीपयत्स वाजं स पुष्टिं याति जोषमा चिकित्वान् ॥

एव । एवमग्निर्गौतमैर्यज्ञवान् विप्रैः स्तुतो जातयनः[1] स एषु गोतमेषु अन्नं बलं च वर्धयतु स वोषामायाति[2] पर्याप्तं चिकित्वानिति[3] ॥

एवमग्निः गोतमैः सत्यवान् ब्राह्मणैः अस्तोष्ट जातप्रज्ञः । स गोतमेषु अन्नं बलं च वर्धयतु सः पोषं गमयति अभिलषितं जानन् ॥ (५)

---

अभि त्वा गोतमा गिरा जातवेदो विचर्षणे । द्युम्नैरभि प्र णोनुमः ॥

अहि[4] त्वा । स्पष्टं पञ्चर्चं सूक्तत्[5] ॥

आभिमुख्येन प्रकर्षेण स्तुमः त्वां गोतमा वयं गिरा ज्ञातवेदः विद्रष्टः अन्नानि । अभिः द्वितीयास्मारकः ॥ (१)

तमु त्वा गोतमो गिरा रायस्कामो दुवस्यति । द्युम्नैरभि प्र णोनुमः ॥

तं त्वां गोतमः स्तुत्या धनकामः परिचरति । वचनयोरुक्त्या संगतिः ॥ (२)

[1] Read जातप्रज्ञः or जातज्ञानः

[2] Read पोषमायाति.

[3] Here there is the figure 16 to mark the end of the sūkta.

[4] Read अभि.

[5] There is the figure 17 to mark the end of the sūkta.

**तमु॑ त्वा वाज॒सात॑मम॒ङ्गि॒र॒स्वद्ध॑वामहे । द्यु॒म्नैर॒भि प्र णो॑नुमः ॥**

तं त्वां अतिशयेनान्नानां दातारं अङ्गिरस्वत् हवामहे ॥ (३)

**तमु॑ त्वा वृत्र॒हन्त॑म॒ं यो दस्यूँ॑रवधू॒नु॒षे । द्यु॒म्नैर॒भि प्र णो॑नुमः ॥**

तमेव त्वामतिशयेनोपद्रवाणां हन्तारं यस्त्वं राक्षसान् अवधूनोषि ॥ (४)

**अवो॑चाम॒ रहू॑गणा अ॒ग्नये॒ मधु॑म॒द्वचः॑ । द्यु॒म्नैर॒भि प्र णो॑नुमः ॥**

उक्तवन्तो राहूगणपुत्रा अग्नये रसवत् स्तोत्रम् । द्युम्नैश्च अभिप्रणोनुमः ॥ (५)

---

**हिर॑ण्यकेशो॒ रज॑सो विसा॒रेऽहि॒र्धुनि॒र्वात॑ इ॒व ध्रजी॑मान् ।**
**शुचि॑भ्राजा उ॒षसो॒ नवे॑दा यश॑स्वतीरप॒स्युवो॒ न स॒त्याः ॥**

हिरण्यकेशः । हिरण्यसदृशरश्मिदेकस्य[1] विसारे रभसि[2] वर्तमान आहन्ता कम्पयिता वात इव गतिमान् वेगवान् वा । ध्राजिरेकस्य ददृशे न रूपम्[3]—इति उज्ज्वलदीप्तिरुषसोऽजानन्नवती:[4] कर्मेच्छतीरिव[5] विशः सत्यभूता भवन्तीति क्रियेति[6] ॥

[1] Read हिरण्यसदृशरश्मिरुदकस्य. The letter before द is distinctly an ए mark and not रु.

[2] Read नभसि.

[3] RV. 1. 164. 44.

[4] Read जानन्नन्नवतीः

[5] Read कर्मेच्छन्तीरिव.

[6] Perhaps to read भवन्ति क्रियेति.

हिरण्यसदृशरश्मिः उदकस्य विसारेऽन्तरिक्षे आहन्ता कम्पयिता वात इव गमनवान् । निर्मलदीप्तिरुषसः अजानन् अन्नवतीः कर्मेच्छव इव सत्यभूताः । यथा कर्मणः कर्तारः फलेन युज्यते ॥ (१)

**आ ते॑ सु॒प॒र्णा अ॑मिनन्तँ॒ एवै॑ः कृ॒ष्णो नो॑नाव वृ॒ष॒भो यदी॒दम् ।**
**शि॒वाभि॒र्न स्मय॑माना॒भि॒रागा॒त्पत॑न्ति॒ मिह॑ः स्त॒नय॑न्त्य॒भ्रा ॥**

आ ते: । आमिनन्त श्लथीकुर्वन्ति । तव सुपतना रश्मयः एवैनं[1] मरुद्भिस्सहिता मेघम् । कृष्णवर्णो वृषभो मेघो यदीदमयन्तोनाव[2] कुर्याच्छब्दम् । शिवाभिरस्मभिरनयमग्निः[3] स्मयमानाभिर्विद्युद्भिरागतः । तत्र पतन्त्यापः[4] स्तनयन्त्यभ्राणि ॥

अग्ने तव रश्मयो मरुद्भिः सह प्रक्षिपन्ति । कृष्णवर्णो मेघश्च शब्दं करोति । यदि भवत्युदकम् । इदमित्युदकनाम । कल्याणीभिः स्मयमानाभिरिव स्त्रीभिः नदीभिः सहाग्निरस्मानिहागच्छति । पतन्ति च सेक्तारो मरुतः । स्तनयन्ति च अभ्राणि ॥ (२)

**यदी॑मृ॒तस्य॒ पय॑सा॒ पिया॑नो॒ नय॑न्नृ॒तस्य॑ प॒थिभि॒ रजि॑ष्ठैः ।**
**अ॒र्य॒मा मि॒त्रो वरु॑णः॒ परि॑ज्मा॒ त्वचं॑ पृ॒ञ्चन्त्युप॑रस्य॒ योनौ॑ ॥**

यदयमुदकस्य[5] स्यारेण[6] जगदाप्याययन् नयन् उदकस्य मार्गैर्ऋजुतमैः इदं जगत् भवेदिति वाक्यशेषः । तदानीमर्यमा मित्रो वरुणः

[1] Read एवैः

[2] Perhaps to read यदीदमयं नोनाव.

[3] Read only शिवाभिरिव.

[4] Read पतन्त्यापः

[5] Pratika not separately given.

[6] Read सारेण.

परितो गन्ता मरुद्गणश्च वर्षस्येश्वरास्त्वचं पृञ्चन्ति मेघस्य योनौ । यन[1] उदकं निर्गच्छति सा योनिः । पृञ्चनं श्लथकरणम्[2] । सन्दिग्धार्थैष[3] ॥

यद्येनमुदकस्य सारेण प्रत्यक्षोदकेन प्यायमानः नयन् उदकस्य पथिभिः ऋजुतमैः । अर्यमा मित्रो वरुणो वायुश्च मेघस्य योनावुदकनिर्गमनमार्गे स्थितां उदकनिरोद्ध्रीं त्वचं रश्मिभिः संपृञ्चन्ति । अग्निना सहिता वर्षस्य ईशते एते देवाः ॥ (३)

अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
अस्मे धेहि जातवेदो महि श्रवः ॥

स्पष्टोत्तराततः[4] परा च ॥

अग्ने अन्नस्य पशुमतः ईश्वरः सहसः पुत्र अस्मासु धेहि जातवेदः महद्धनम् ॥ (४)

स इधानो वसुष्कविरग्निरीळेन्यो गिरा ।
रेवदस्मभ्यं पुर्वणीक दीदिहि ॥

सोऽग्निरीड्यमानो भवति । गिरा च स्तुत्यश्चेति ॥

स दीप्यमानो वासयिता कविः अग्निः स्तुत्यः स्तोत्रेण । धनयुक्तं अस्मभ्यं दीप्यस्व बहुज्वाल ॥ (५)

[1] Read येन.

[2] Read श्लथीकरणम् .

[3] Read सन्दिग्धार्थैषा.

[4] Read स्पष्टोत्तरा ततः

क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः ।
स तिग्मजम्भ रक्षसो दह प्रति ॥

पक्षः[1] । क्षपयानं[2] उषसषश्च[3] सकाशात् । प्रतिसह[4] रक्षसो यातुधानादिति ॥

क्षपय राजन् अग्ने त्वमात्मनैव रक्षसः अह्नो रात्रेश्च । स त्वमग्ने तीक्ष्णदंष्ट्र रक्षांसि प्रतिदह । यद्वा क्षपाया उषसोऽह्नश्च रक्षांसि प्रतिदह ॥ (६)

अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि । विश्वासु धीषु वन्द्य ॥

अव । रक्षास्मानग्ने रक्षणैर्गायत्रस्य साम्नः सूक्तस्य वा वा[5] प्रहरणे सर्वेषु कर्मसु स्तुत्य ॥

रक्षास्मानग्ने ऊतिभिर्गायत्रसाम्नः प्रभर्मणि सर्वेषु कर्मसु स्तुत्य ॥ (७)

आ नो अग्ने रयिं भर सत्रासाहं वरेण्यम् । विश्वासु पृत्सु दुष्टरम् ॥

स्पष्ट उत्तरस्तृचः ॥

आभरास्मभ्यमग्ने रयिं बहुसहं वरणीयं सर्वेषु संग्रामेषु तरितुमशक्यम् ॥ (८)

आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसम् । मार्डीकं धेहि जीवसे ॥

[1] Read क्षपः

[2] Perhaps to read क्षपय अह्नः ; evidently many words are missing corresponding to राजन्नुत त्मनाग्ने.

[3] Read उषसश्च.

[4] Read प्रतिदह.

[5] One वा is extra.

आ धेह्यस्मभ्यमग्ने शोभनज्ञानेन मनसा धनं सर्वमनुष्याणां पोषकं सुखयितृ जीवनाय ॥ (९)

प्र पू॒ताास्ति॒ग्मशो॑चिषे॒ वाचो॑ गोतमा॒ग्नये॑ । भर॑स्व सुम्न॒युर्गिरः॑ ॥

प्रभरस्वोग्रतेजसे शुद्धा वाचः गोतम अग्नये सुम्नमिच्छन् गरणीया वचनीयाः ॥ (१०)

यो नो॑ अग्नेऽभि॒दास॒त्यन्ति॑ दू॒रे प॑दी॒ष्ट सः ।
अ॒स्माक॒मिद्वृ॒धे भ॑व ॥

यो नः । योऽस्मानग्ने अभिहिनस्त्यन्तिके[1] दूरे च वर्तमानः । पततु सः । भवास्माकमेव त्वं वर्धनाय ॥

योऽस्मानग्ने अभिहिनस्त्यन्तिके दूरे वा नश्यतु सः । अस्माकमेव भव वर्धनाय ॥ (११)

स॒ह॒स्रा॒क्षो विच॑र्षणिर॒ग्नी रक्षां॑सि सेधति ।
होता॑ गृणीत उ॒क्थ्यः॑ ॥

सहस्राक्षः । बहुज्वालो विद्रष्टाग्निः रक्षांसि सेधति । होता सन् स्तौति च देवान् स्वयमुक्थ्य इति[2] ॥

अनेकज्वालो विद्रष्टा अग्निः रक्षांसि निरुणद्धि । होता स्तौति च देवान् प्रशस्यः ॥ (१२)

---

[1] Folio 57*b* ends with हिनस्त्य.

[2] There is no figure to mark the end of the sūkta.

**इत्था हि सोम इन्मदे ब्रह्मा चकार वर्धनम् ।**
**शविष्ठ वज्रिन्नोजसा पृथिव्या निः शशा अहिमर्चन्ननु स्वराज्यम् ॥**

इत्था । इत्थं हि सोमे मदकरे त्वया पीते सति[1] ब्राह्मणश्चकार[2] स्तोत्रम्[3] । अथ त्वं बलवत्तम[4] वज्रिन् बलेन पृथिव्या नस्यहितम्[5] । अत्यर्थं चात्मनः स्वराज्यं स्वरान्[6] त्वमनुपालयन्[7] । यास्कास्त्वाह[8] अर्चिन्यो[9]ऽनूपास्ते स्वराज्यम्[10] इति ॥

इत्थं हि सोमे मदकरे त्वया पीते सति ब्राह्मणस्तव वर्धनं स्तोत्रं चकार । बलवत्तम वज्रिन् बलेन स्तुतिजनितेन पृथिव्या निःशंसितवानसि अहिम् । अत्र यास्कः—अर्चन्योऽनूपास्ते स्वराज्यम्—इति ॥ (१)

**स त्वामदद्वृषा मदः सोमः श्येनाभृतः सुतः ।**
**येना वृत्रं निरद्भ्यो जघन्थ वज्रिन्नोजसार्चन्ननु स्वराज्यम् ॥**

[1] स in सति completely worm-eaten.

[2] ब्रा is completely worm-eaten.

[3] वर्धनम् not explained. Perhaps to read वर्धनं स्तोत्रम्.

[4] Read बलवत्तम.

[5] This must be the explanation of निःशशा अहिम् । Perhaps to read निःशंस्यहिम्.

[6] This word not wanted.

[7] Perhaps to read त्वमन्वपालयत्.

[8] Read यास्कस्त्वाह.

[9] Read अर्चन्यो.

[10] N. 12, 34.

स त्वा । स त्वामद्वृषा[1] मदकरः सोमः श्येनेन दिव आहृतोऽभिषुः[2] येन पीतेन वृत्रमन्तरिक्षादपि निर्जगन्थेति[3] ॥

स त्वा अमदद्वृषा सोमो मदकरः श्येनेनाहृतः येन वृत्रं अन्तरिक्षादपि बलेन निर्जघन्थ वज्रिन् बलेन ॥ (२)

**प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यंसते ।**
**इन्द्र नृम्णं हि ते शवो हनो वृत्रं जया अपोऽर्चन्ननु स्वराज्यम् ॥**

स्पष्टोत्तरा । नियंसते नियम्यते परैः । नृम्णं बलिनां नृणां नामकम् । प्रेह्यभीहीत्यौसकावेव लोकटौ[4] । समुच्चये नितरस्याम्[5] । इति लोवित्यपरमिति[6] ॥

समुच्चयेऽन्यतरस्याम्—इति लोट् । तव वज्रः प्रैति अभ्येति धर्षयति च । न कचिन्नियम्यते तव वज्रः । इन्द्रस्यैवानुशासनम् । इन्द्र नृम्णं हि तव बलम् । नॄन् नमयति । जहि वृत्रम् । उदकानि च जय ॥ (३)

**निरिन्द्र भूम्या अधि वृत्रं जघन्थ निर्दिवः ।**
**सृजा मरुत्वतीरव जीवधन्या इमा अपोऽर्चन्ननु स्वराज्यम् ॥**

[1] Read त्वा अमदद्वृषा.

[2] आहृतोऽभिषुतः

[3] वज्रिन्नोजसा left out.

[4] Not at all clear. It must be some explanation for the imperative mood.

[5] P. 3. 4. 3. Read समुच्चयेऽन्यतरस्याम् ।

[6] Perhaps to read इति लोट् इत्यपरम्.

निः । निरिन्द्रम्[1] । स्पष्टार्थम् । अद्भ्यो मरुतः प्रादुर्भवन्तीति मरुत्वत्य आपः । वा[2] जीवांस्तर्पयन्ति ता जीवधन्या इति ॥

द्यावापृथिव्योर्वृत्रं निर्जघन्थ । स त्वं मरुत्वतीरपः अवसृज याभिर्जीवा धन्या भवन्ति ॥ (४)

**इन्द्रो वृत्रस्य दोधतः सानुं वज्रेण हीळितः ।**
**अभिक्रम्याव जिघ्नतेऽपः सर्माय चोदयन्नर्चन्ननु स्वराज्यम् ॥**

इन्द्रः । इन्द्रो वृत्रस्य धून्वत[3] सानुमुच्छ्रितं हनुं वज्रेण क्रुद्धः सन्नभिक्रम्य अवहन्त्यपः सरणार्थं चोदयन् ॥

इन्द्रो वृत्रस्य धून्वतः समुच्छ्रितं प्रदेशं वज्रेण क्रुद्धः सन् अभिक्रम्याव-हन्त्युदकानि सरणार्थं चोदयन् ॥ (५)

**अधि सानौ नि जिघ्नते वज्रेण शतपर्वणा ।**
**मन्दान इन्द्रो अन्धसः सखिभ्यो गातुमिच्छत्यर्चन्ननु स्वराज्यम् ॥**

स्पष्टोत्तरा । गातुं भद्रमिति ॥

समुच्छ्रिते देशे निहन्ति वज्रेण पर्वशतोपेतेन मोदमान इन्द्रः सोमेन सखिभ्यो गमनं इच्छत्यात्मानं प्रति ॥ (६)

[1] Read निरिन्द्र.

[2] Read या.

[3] Read धून्वतः

**इन्द्र॒ तुभ्य॒मिद॑द्रि॒वोऽनु॑त्तं वज्रिन्वी॒र्य॑म् ।**
**यद्ध॒ त्यं मा॒यिनं॑ मृ॒गं तमु॒ त्वं मा॒यया॑वधी॒रर्च॒न्ननु॑ स्व॒राज्य॑म् ॥**

इन्द्र । इन्द्र तवैव केनचिदनुत्तं अनुन्नं वज्रिन्वीर्यं भवति । यद्ध त्यं मायिनं मृगं त्वमपि तं माययैव वधीरिति[1] वाक्यार्थः ॥

इन्द्र तवैव केनचिदहिंसितं वीर्यं वज्रिन् । अद्रिरादृणाति अमित्रानिति वज्र एवोक्तः । यत् खलु तं मायाविन् मृगासुरमपश्यत् तं त्वं माययैव हतवान् ॥ (७)

**वि ते॒ वज्रा॑सो अस्थिरन्नव॒तिं ना॒व्या॒३॒॑ अनु॑ ।**
**म॒हत्त॑ इन्द्र वी॒र्यं॑ बा॒ह्वोस्ते॒ बलं॑ हि॒तमर्च॒न्ननु॑ स्व॒राज्य॑म् ॥**

वि ते । विनिर्गतास्त्वत्तो वज्रा नवतिसंख्याका ननदीरनु[2] वृत्रेण निरुद्धाः । महत्ते इन्द्र वीर्यम् । बाह्वोश्च ते निहितं बलमिति ॥

तव आयुधानि व्यतिष्ठन्त नवतिसंख्या नदीरनु । महत्ते इन्द्र वीर्यम् । बाह्वोश्च तव बलं निहितम् ॥ (८)

**स॒हस्रं॑ सा॒कम॑र्चत॒ परि॑ ष्टोभत विंश॒तिः ।**
**श॒तैन॒मन्व॑नोनवु॒रिन्द्रा॑य ब्र॒ह्मोद्य॑त॒मर्च॒न्ननु॑ स्व॒राज्य॑म् ॥**

सहस्रम् । सहस्रं भूत्वा मनुष्याः सहेन्द्रमर्चेता[3] अपूजयत्[4] । अपि

[1] Read अवधीरिति.
[2] Read नदीरनु.
[3] Read सहेन्द्रमर्चत.
[4] Read पूजयत.

च परिष्टोभत विंशतिः । स्तोभनं कर्मभिर्विलोभनम् । शतानि[1] च ऋष-यस्तमनुतेनपुः[2] । इन्द्रायै+ ब्रह्म[3] हविरुद्यतम् । अपि वा स्तोत्रमेव नाना-विधं ब्रह्म । अव स्वराति गर्गरः[4] इत्यत्र तु नानाविश्शब्द[5] इति तत्र पादो न सृष्टः ॥

इन्द्रं सहस्रसंख्याकाः सह स्तुत । परिगायत विंशतिसंख्याकाः । शतानि स्तोतॄणां एनमिन्द्रं अतिशयेनान्वस्तुवन् । इन्द्राय सर्वं स्तोत्रं स्तोतृभि-रुद्यतम् ॥ (९)

**इन्द्रो॑ वृ॒त्रस्य॒ तवि॑षीं॒ निर॑ह॒न्त्सह॑सा॒ सहः॑ ।**
**म॒हत्तद॑स्य॒ पौंस्यं॑ वृ॒त्रं ज॑घ॒न्वाँ अ॑सृज॒द्वि सिन्धू॒न्॥**

इन्द्रः । इन्द्रो वृत्रस्य तविषीं तविष्या[6] निरहन् सहसा च सहः । महत्तदस्य[7] पौंस्यं हि भवति । वृत्रं जघ्निवानसृजन्[8] । यत् सिन्धूनिति गम्यते ॥

इन्द्रो वृत्रस्य बलं निरहन् सहसा सहः । येन सहते परं तत् सहः । महत् तदस्य पुंस्त्वं वृत्रं घ्नन् प्रकाशितवानिन्द्रः ॥ (१०)

[1] श mostly worm-eaten.

[2] Read ऋषयस्तमनुनोनवुः

[3] A letter completely worm-eaten between इन्द्रायै and ब्रह्म. Perhaps to read इन्द्रायैतत् ब्रह्म.

[4] RV. 8. 69-9.

[5] Perhaps to read नानाविधश्शब्द.

[6] Perhaps तविष्या not wanted ; or read तवींषि.

[7] महत्तद् ends the line. स्य starts the next and last line about 2 inches from the margin, as the leaf has become very narrow.

[8] Read जघ्निवानसृजत.

**इमे चित्तवं मन्यवे वेपेते भियसा मही ।**
**यदिन्द्र वज्रिन्नोजसा वृत्रं मरुत्वाँ अवधी रर्चन्ननु स्वराज्यम् ॥**

इमे । इमे चित्तव क्रोधाय कमपेते[1] भयेन द्यावापृथिव्यौ । यदिति स्पष्टम् ॥

द्यावापृथिव्यौ तव क्रोधाय भयेन कम्पेते । यत् त्वमिन्द्र वज्रिन् बलेन वृत्रमसुरं मरुद्भिः सह अवधीः ॥ (११)

**न वेपसा न तन्यतेन्द्रं वृत्रो वि बीभयत् ।**
**अभ्येनं वज्र आयसः सहस्रभृष्टिरायतार्चन्ननु स्वराज्यम् ॥**

न वेपसा । न वेपनेन[2] गर्जितेनेन्द्रं[3] वृत्रो विबीभयर्त[4] भीतमकरोत् । अपि तर्हि इन्द्रोण[5] विसृष्टो वज्र आयसोऽभ्यागच्छत्तं वृत्रम् । सहस्यधारः[6] ।

न वेपेन न च गर्जितशब्देन इन्द्रं वृत्रो विभीतमकरोत् । वृत्रं तु वज्रः इन्द्रविसृष्टः सहस्रधारोऽभ्यगच्छदयोमयः ॥ (१२)

[1] Read कम्पेते. The two letters म and प are written separately as two distinct letters.

[2] Read वेपेन न.

[3] Folio 58*a* ends with गर्जितेने. The letter न्द्रं in the next page starts about 4 inches from the margin as the leaf is narrow.

[4] Read विबीभयत्.

[5] Read इन्द्रेण.

[6] Read सहस्रधारः

यद्वृत्रं तव चाशनिं वज्रेण समयोधयः ।
अहिमिन्द्र जिघांसतो दिवि ते बद्बधे शवोऽर्चन्ननु स्वराज्यम् ॥

यद्वृत्रम् । यद्वृत्रेण तव हननार्थं विसृष्टामशनिं च त्वं वज्रेणायोधयः । तस्य धेहिमाहन्तारं[1] वृत्रं जिघांसतः शवो दिवि बद्बधेऽनुबद्धमासीत् ॥

यद्वृत्रं वृत्रेण त्वदर्थं विसृष्टामशनिं च तव वज्रेण सहायोधयः तदा अहिं हन्तुमिच्छतस्तवान्तरिक्षे बद्धमासीद्बलम् । प्रसिद्धमभूत् ॥ (१३)

अभिष्टने ते अद्रिवो यत्स्था जगच्च रेजते ।
त्वष्टा चित्तव मन्यव इन्द्र वेविज्यते भियार्चन्ननु स्वराज्यम् ॥

अभिष्टने[2] । सिंहनादे ते वज्रिन् यत् सर्पणशीलं स्थावरं जङ्गमं च कम्पते । त्वष्टा चासुरस्तव मन्यवे इन्द्र वेविज्यते । विजिश्चलनार्थ इति ॥

सिंहनादे ते वज्रिन् यत् स्थावरं तद्रेजते । जङ्गमं च कम्पते । त्वष्टा च तव क्रोधाय कम्पते भयेन अनिन्द्रं सोममाहरन् ॥ (१४)

नहि नु यादधीमसीन्द्रं को वीर्या परः ।
तस्मिन्नृम्णमुत क्रतुं देवा ओजांसि संदधुरर्चन्ननु स्वराज्यम् ॥

ननिहि[3] । नहि नु यादितस्ततो यान्तोऽधिगच्छामो वयमिन्द्रं को वीर्येण स्पृणोति[4] । तस्मिन्निन्द्रे बलं कर्म चोजांसि च देवाः सन्दधुरिति ॥

[1] Read तस्य तेऽहिमाहन्तारं.

[2] Read अभिष्टने.

[3] Read नहि.

[4] must be the meaning of परः

न हि वयमितस्ततो यान्त अधिगच्छामो जानीमः । इन्द्रं को वीर्येण तरति इति । तस्मिन्निन्द्रे धनं अपि च प्रज्ञानं देवा बलानि च सह निहितवन्तः ॥

**यामथर्वा मनुष्पिता दध्यङ् धियमत्नत ।**
**तस्मिन्ब्रह्माणि पूर्वथेन्द्र उक्था समग्मतार्चन्ननु स्वराज्यम् ॥**

याम । यां अथर्वा मनुश्च पिता मानवानां दध्याद्[1] च धियमतरिषत[2] तस्यां सर्वस्यां ब्रह्माण्युक्थानि च पूर्वेषामिव यज्ञेषु तस्मिन्निन्द्रे एव समगच्छन्तेति ॥

इत्यध्यायो व्याकृतो दाशतय्याः शक्त्या सोऽयं[3] पञ्चमो माधवेन ।
भूयंसो[4]ऽस्मिन् संशयश्छेदनीवास्ते[5] निर्णयाः पण्डितैर्वाक्यविद्भिः ॥

यामथर्वा मनुश्च पिता मानवानां दध्यङ् च धियं अतनिषत तस्मिन् सर्वस्मिन् कर्मणि पूर्वेषामिव यज्ञेषु इन्द्रे स्तोत्रशस्त्राणि समगच्छन्त । अर्चन् योऽनूपास्ते स्वराज्यम् ॥　　　　(१६)

पञ्चमोऽध्यायः

---

[1] Read दध्यङ्.

[2] Read धियमतनिषत.

[3] य in यं seems to have been crossed. There is a line across.

[4] Read भूयांसो

[5] Read संशयाश्छेदनीयास्ते.

# षष्ठोऽध्यायः[1]

इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
तमिन्महत्स्वाजिषूतेमर्भे हवामहे
स वाजेषु प्र नोऽविषत् ॥

इन्द्रो मदाय । इन्द्रस्समत्सु मदाय बलकरणाय च वर्धते शत्रुहा नृभिः स्तोतृभिः । तमेव महत्सु सङ्ग्रामेषु हवामहे । अपिचैनमल्पे । सोऽस्मान् युद्धे प्ररक्षन्तु[2] ॥

इन्द्रो मदाय । गोतमः । इन्द्रः सोमाय ववृधे बलाय च शत्रुहा मरुद्भिः । तमेव महत्सु संग्रामेषु अपिचाल्पे संग्रामे हवामहे । सः अस्मान् युद्धेषु प्ररक्षतु ॥ (१)

असि हि वीर सेन्योऽसि भूरि परादृदिः ।
असि दभ्रस्य चिद्वृधो यजमानाय शिक्षसि
सुन्वते भूरि ते वसु ॥

असि । असि हि वीर सेन + + + सि[3] च भूरि धनं परिदाता । असि च क्षुद्रस्य वर्धकः । यजमानाय पृच्छसि । वसु सुन्वते । भूरि च ते वसु ॥

[1] This heading is not in the MS.

[2] Read प्ररक्षतु.

[3] The MS. is worm-eaten after सेन up to सि. The letters are completely lost. The reading should be सेनार्हः । असि.

असि हि वीर सेनार्हः। असि च भूरेर्धनस्य परादाता। असि क्षुद्रस्य वर्धयिता। यजमानाय वसु प्रयच्छसि सुन्वते। भूरि च ते धनम्॥ (२)

यदुदीरत आजयो धृष्णवे धीयते धना।
युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधो
ऽस्माँ इन्द्र वसौ दधः॥

यदुदीरते। यदोत्तिष्ठन्ति सङ्ग्रामाः तदानीं धृष्णवे योद्ध्रे निधीयते धनम्। स त्वमस्मिन्नवसरे योजय शत्रुमन्दस्य[1] च्यावकावश्वौ। युक्त्वा च कंचन जहि। कंचनार्थे स्थापय। तत्रास्मानिन्द्र वसो[2] स्थापय। पनान्[3] जहीति। गौतमो राहूगण उभयेषां कुरुसृञ्जयानां पुरोहित आसीदिति वाजसनेयकम्[4]। तत्र कस्मिंश्चिद्युद्धे उपस्थिते सूक्तमिदं दृष्टमिति॥

यदोत्तिष्ठन्ति संग्रामास्तदानीं धृष्णवे योद्ध्रे धनानि दीयन्ते तुभ्यं हवींषि। स त्वं योजय सोमं प्रति गन्तारौ स्वाश्वौ। योजयित्वा च कंचन जहि। कंचनार्थे स्थापय। तत्रास्मानिन्द्र धने स्थापय॥ (३)

क्रत्वा महाँ अनुष्वधं भीम आ वावृधे शवः।
श्रिय ऋष्व उपाकयोर्नि शिप्री हरिवान्दधे
हस्तयोर्वज्रमायसम्॥

[1] Read शत्रुमदस्य.
[2] Read वसौ.
[3] Read परान्.
[4] See S'. B. Kāṇva. 1. 3. 4. 3.

क्त्वा । क्त्वा शोभनमेवाथवा शोभनोमेवाथवा शोभनो[1] महान् सोमपानानन्तरं भीमो वर्धयति बलम् । श्रियर्थे[2] दर्शनीय उपाकुयोः[3] पार्श्वस्थयोर्निदधे हनुमत्[4] हस्तयोर्वज्रमायसम् ॥

कर्मणा महान् सोमपानानन्तरं भीमो वर्धयति बलम् । श्र्यर्थे दर्शनीयः अन्तिकयोरुभयोः पार्श्वस्थयोः हस्तयोरायसमायुधं निदधे हनुमान् हरिवान् ॥ (४)

आ प॑प्रौ पार्थि॑वं रजो॑ बद्ब॒धे रो॑च॒ना दि॒वि ।
न त्वावाँ॑ इन्द्र॒ कश्च॒न न जा॒तो न ज॑निष्य॒ते
ऽति॒ विश्वं॑ ववक्षिथ ॥

आपप्रौ । आपूरयति पाथिवं रजो नभः । तेजसा बबन्ध च दिवि नक्षत्राणि । न त्वत्सदृश इन्द्र कश्चन विद्यते । न च जातः कश्चित् । नापि जनिष्यते[5] । स त्वमतिवहसि सर्वम् । न जातो न जनिष्यते इति पादो राथन्तरे प्रागये[6] न सृज्यते । स हि प्रगाथः प्रत्यक्षकृतः । अत्र तु परोक्षः पूर्वार्धः । किंच तत्र न त्वावाँ इन्द्र दिव्योऽस्ति नापि पार्थिवोऽस्ति न च जातो नापि जनिष्यते इति वचनव्यक्तिः । इह तु न तथेति ॥

आपूरयामास पार्थिवं लोकं कामैः । बबन्ध दिवि नक्षत्राणि । न त्वत्सदृशः इन्द्र न कश्चिदपि जातः । नापि जनिष्यते । अतिवहसि स त्वं सर्वम् ॥ (५)

[1] The portion up to this not wanted after क्त्वा.

[2] Read श्र्यर्थे.

[3] Folio 58*b* ends with उपा. Read उपाकयोः

[4] Read हनुमान्. The word हरिवान् not explained.

[5] जनि mostly worm-eaten.

[6] Read प्रगाथे. See Sāma Veda 2. 31.

योऽअर्यो मर्तभोजनं परादृदाति दाशुषे ।
इन्द्रो अस्मभ्यं शिक्षतु वि भंजा भूरिं ते वसुं
भक्षीय तव राधसः ॥

यो अर्यः । य उदारो मर्तभोजनं कल्याणमन्नं परादृदाति दाशुषे स इन्द्रोऽस्मभ्यमपि ददातु । प्रत्यक्षः शिष्टः । विभजेन्द्र । बहु हि ते धनम् । अहं तव राधो भजेय ॥

य उदारो मनुष्याणां भोजनमन्नं प्रयच्छति यजमानाय स इन्द्रः अस्मभ्यं ददातु । विभजेन्द्र । बहु हि ते धनम् । अहं तव धनं भजेय ॥ (६)

मदेमदे हि नो दृदिर्यूथा गवामृजुक्रतुः ।
सं गृभाय पुरू शतोभयाहस्त्या वसुं
शिशीहि राय आ भर ॥

मदे मदे[1] ह्यस्मभ्यं दाता गोयूथानामृजुकर्मा स त्वं सङ्गृहाण[2] पुरूणि शतानि वसूनि । यानि महान्ति भवन्ति तान्युभयाहस्त्यानि तु तीक्ष्णीकुरु । अस्मान् धनमाहरेति ॥

सोमस्य मदे मदे हि अस्मभ्यं दाता गोयूथानां ऋजुकर्मा । स त्वं पुरूणि शतानि धनानि संगृहाण । संगृह्य च उभाभ्यां हस्ताभ्यां आभर वसूनि । धनेन चास्मान् तीक्ष्णीकुरु ॥ (७)

[1] Pratika not separately given.
[2] Read संगृहाण.

मादयस्व सुते सचा शवसे शूर राधसे ।
विद्मा हि त्वा पुरुवसुमुप कामान्त्ससृज्महे
ऽथा नोऽविता भव ॥

मादयस्व । माद्य[1] सुते सोमेऽस्माकं सहायभूमो[2] बलायास्माकं शूर । सेनाय[3] च । विन्म[4] हि त्वा बहुधनम् । तेन त्वयास्मदीयान् कामानुपसृजामो वत्सानीव तृभिः[5] । अथास्माकमविता भव ॥

मादयस्वास्मान् सुते सोमे सहायभूतः बलेन च धनेन च । विद्म हि त्वां बहुधनम् । अतः त्वयि कामानभिलषितान् उपसृजामः । अथास्माकं अविता भव ॥ (८)

एते त इन्द्र जन्तवो विश्वं पुष्यन्ति वार्यम् ।
अन्तर्हि ख्यो जनानामर्यो वेदो अदाशुषां
तेषां नो वेद आ भर ॥

एते । एते व[6] स्वभूता जन्तवो विश्वं पुष्यन्ति धनम् । त्वं ह्मन्तर[7] रव्यो गूढं स्थापयसि । पश्यसि वा जनानां धनमयजमानानाम् । स्वामी त्वं तेषां धनमस्मभ्यमाहरेति[8] ॥

[1] Read मादय.

[2] Read सहायभूतो.

[3] Read धनाय.

[4] Read विद्म.

[5] not clear.

[6] Read एते तव.

[7] Read ह्यन्तः

[8] Here there is the figure 1 to mark the end of the Sūkta.

अमी तव स्वभूता मनुष्या विश्वं धनं पुष्यन्ति । त्वं हि अयजमानानां धनं ईश्वर: अन्त: ख्य· । अन्त:पूर्व: ख्याति: तिरोधानार्थ: । तेषां धनमस्मभ्य-माभर ॥ (९)

---

उपो षु शृणुही गिरो मघवन्मातथा इव ।
यदा नः सूनृतावतः कर आदर्थयास इ-
योजा न्विन्द्र ते हरी ॥

उपो षु । उपोषु शृणुहि स्तुतीममघवं[1] । माभूस्त्वमतथा इव । यादृशस्त्वं पूर्वं तादृश एवेदानीमपि स्याः । यदास्मान् स्तुतिमत: करोति[2] त्वं तदानीमेव ता: स्तुतीरर्थयसे । योजय शीघ्रं तवाश्वौ रथे ॥

उपैव श्रृणुहि स्तुती: । मघवन् माभूस्त्वमसत्य इव । यदा त्वमस्मान् स्तुतिमत: करोषि अनन्तरमेव त्वं स्तुती: प्रार्थयसे । एवं तत्तव व्रतं नेदानी-मतथा इव भू: । योजय शीघ्रमश्वौ इह आगमनाय ॥ (१)

अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती
योजा न्विन्द्र ते हरी ॥

[1] Read स्तुतीर्मघवन्. Perhaps the double म is a part of र्म, written र्म्म always in Grantha script.

[2] Read करोषि.

अक्षन् । भुवन्तः[1] तृप्ताश्चासन् भुक्तशिष्टाश्च प्रिया इषोऽवधूतवन्तः । अस्तुवंश्च त्वां स्वभानवः प्राप्तदीप्तयो विप्रा तवतस्या[2] स्तुत्या ॥

भुक्तवन्तः तृप्ताश्चासन् । भुक्तशिष्टाश्च इषः अवधूतवन्तः । अस्तोषत त्वां च स्वदीप्तयो मेधाविनः नवतरया स्तुत्या तव स्तोतारः ॥ (२)

**सुसंदृशं त्वा वयं मघवन्मन्दिषीमहि ।**
**प्र नूनं पूर्णवन्धुरः स्तुतो याहि वशाँ अनु**
**योजा न्विन्द्र ते हरी ॥**

सुसदृशम्[3] । यस्वं[4] सम्यक् पश्यसि तं त्वां वयं मघवन् स्तुमः । प्रयभि[5] क्षिप्रं पूर्णवन्धुरः । संयोजितरथमुद्युक्तं पूर्णवन्धुरं ब्रुवते । कामयमानान् प्रति स्तुतिः ॥

सुष्ठु स्तोतॄन् संपश्यन्तं त्वा वयं मघवन् स्तुमः । प्रयाहि क्षिप्रं पूर्णबन्धुरः स्तुतः स्तोतृभिः मनुष्यान् प्रति । रथः पूर्णबन्धुरो भवति स्थितः ॥ (३)

**स घा तं वृषणं रथमधि तिष्ठाति गोविदम् ।**
**यः पात्रं हारियोजनं पूर्णमिन्द्र चिकेतति**
**योजा न्विन्द्र ते हरी ॥**

[1] Read भुक्तवन्तः

[2] Read नवतरया.

[3] Read सुसन्दृशम् .

[4] Read यस्त्वं.

[5] Read प्रयाहि.

स घ । स खलु त्वदीयं रथं कामानां वर्षितारमधितिष्ठति । पशूनां लभकं[1] यः पात्रं हारियोजनाख्यं धानाभिश्रितं सोमपूर्णमिन्द्र प्रज्ञापयन्ति[2] हिवतस्ते[3] ॥

स खलु त्वं त्वदीयं रथं कामानां वर्षितारं पशूनां लम्भयितारं अधितिष्ठति । यः पात्रं हरियोजनाख्यं सोमपूर्णं तव हरिवतः प्रज्ञापयति ॥ (४)

**युक्तस्ते॑ अस्तु दक्षि॑ण उ॒त स॒व्यः श॑तक्रतो ।**
**तेन॑ जा॒याम॒प॑ प्रि॒यां म॑न्दा॒नो या॒ह्यन्ध॑सो**
**योजा॒ न्वि॑न्द्र ते॒ हरी॑ ॥**

स्पष्ट उत्तरो द्वृचः पीतसोमस्येन्द्रस्य प्रवाहणार्थः ॥

युक्तस्ते अस्तु दक्षिणपार्श्वस्थोऽश्वः । अपिच सव्यपार्श्वस्थः । तेन रथेन इहागतः पीतसोमः सन् अभिमतामिन्द्राणीं सोमेन तृप्यन् उपगच्छ ॥ (५)

**यु॒नज्मि॑ ते॒ ब्रह्म॑णा के॒शिना॒ हरी॒ उप॒ प्र या॑हि दधि॒षे गभ॑स्त्योः ।**
**उत्त्वा॑ सु॒तासो॑ रभ॒सा अ॑मन्दिषुः पूष॒ण्वान् व॑ज्रि॒न्त्सम् पत्न्या॑मदः ॥**

दधिषे रश्मीन् । अपि वा स्तोतृभ्यो धनमिति । त्वामुदमन्दिषुः अध्वरेष्वभिषुताः सोमाः । ततः त्वं[4] निशासु पत्नीमुपेत्य पूष्णा युक्तस्तया सममदः । तस्मादिदश्व तं यथा दूरमुपप्रयासीति[5] ॥

[1] Folio 59*a* ends with लं. Read लम्भकं.

[2] Read प्रज्ञापयति.

[3] Read हरिवतस्ते.

[4] It appears that there is only ततस्त्वं. The portion स्त्वं is worm-eaten.

[5] Passage not clear. There is the figure 2 here to mark the end of the Sūkta.

उपोषु शृणुहि—इत्यादिना मन्त्रेण तवाश्वौ रथे योजयामि प्रशस्तकेशौ। ताभ्यां त्वं उपप्रयाहि। त्वं हि हस्तयोः धारयति धनम्। त्वां सुताः सोमाः तीव्राः उदमन्दिषुः। स त्वं पूष्णा पत्न्या सह मादय॥ (६)

---

**अश्वावति प्रथमो गोषु गच्छति सुप्रावीरिन्द्र मर्त्यस्तवोतिभिः।**
**तमित्पृणक्षि वसुना भवीयसा सिन्धुमापो यथाभितो विचेतसः॥**

अश्वावति। अश्ववति गृहे वर्तमानः प्रथमेव[1] स गोषु गच्छति। परेभ्यः सुप्रक्ष्यमाण इन्द्रः[2] मर्त्यस्तव रक्षणैः। तमेव पूरयसि वसुना बहुतरेण सिन्धुं आपो यथासितः[3] प्रज्ञायमाना महत्यः॥

अश्ववति गृहे प्रथममेव गोषु गच्छति सुष्ठु प्ररक्ष्यमाणः इन्द मर्त्यस्तव रक्षणैः। तमेव त्वं पूरयसि धनेन बहुतरेण सिन्धुं आपो यथा। विविधं ज्ञायमाना नानादिग्भ्यः समागता अभितः पूरयन्ति॥ (१)

**आपो न देवीरुप यन्ति होत्रियमवः पश्यन्ति विततं यथा रजः।**
**प्राचैर्देवासः प्र णयन्ति देवयुं ब्रह्मप्रियं जोषयन्ते वरा इव॥**

आपः। आप इव देव्यः प्रवणं होत्रियं धिष्ण्यमुपगच्छंति देवाः। तव स्तोत्रं शुश्रूषमाणाः अवस्तात् पश्यन्ति विततं यथा रजस्तेजो दिवो यः[4]

[1] Read **प्रथममेव.**

[2] Read **इन्द्र.**

[3] Read **यथाभितः**

[4] Read **यत्.**

पतति तद्वत्तेषां चक्षुर्भवति । प्राचीन[1] प्रणयन्ति देवा देवकामं स्तोत्रप्रियं त्वां शंसन्तं होतारं सेवन्ते वरा इव कन्यका: ॥

आप इव देव्य: प्रवणं होत्रियं । धिष्ण्यं देवा: स्तोत्रश्रवणार्थं उपगच्छन्ति । अधस्तात् पश्यन्ति विततं यथा तेजोऽधोमुखं भवति । प्राचीनं च प्रणयन्ति देवकामं देवा: स्तोत्रप्रियम । मनुष्यं । तं सेवन्ते वरा इव कन्या: ॥

**अधि द्वयोरदधा उक्थ्यं१ वचो यतस्रुचा मिथुना या सपर्यतः ।**
**असंयत्तो व्रते ते क्षेति पुष्यति भद्रा शक्तिर्यजमानाय सुन्वते ॥**

अधिद्वयो: । अध्येदया[2] उकृथ्यं प्रतिगरार्हे[3] वचश्शस्त्रं यथा स्रुचौ मिथुनभूतौ यौ त्वां परिचरत: । शत्रुभिर्युद्धार्थसंयत्तो[4] प्रत्ते[5] तव निवसति पुष्यति च प्रजया पशुभि: । भजनीयं च बलं तरोस्म[6] सुन्वते यजमानाय ॥

द्यावापृथिव्यो: प्रशस्यं वच: अध्यदधा: । यतस्रुचौ ये मिथुनभूते त्वां पूजयतो यज्ञप्रवर्तनात् । तव व्रते शत्रुभिरसंयत्त: सुखमेव निवसति । पुष्यति च प्रजया पशुभि: । कल्याणं भवति बलं सुन्वते यजमानाय ॥ (३)

**आदङ्गिरा: प्रथमं दधिरे वय इद्धाग्नय: शम्या ये सुकृत्यया ।**
**सर्वं पणे: समविन्दन्त भोजनमश्वावन्तं गोमन्तमा पशुं नर: ॥**

[1] Read प्राचीनं.
[2] Read अध्यदधा.
[3] Not clear.
[4] Read शत्रुभिर्युद्धार्थमसंयत्तो.
[5] Read व्रते.
[6] Not clear.

आत् । अनन्तरमेवाङ्गिरसः प्रथमं प्रथितं वयो दधिरे अन्नं समिद्धाग्नयः । कर्मणा ये शोभनकरणेनासन् । तेऽङ्गिरसस्सर्वमेव पणेरपहृतं समविन्दन्त भोजनम् । तदेवोक्तम्—अश्ववन्तं गोमन्तं च पशुमजाविकं समविन्दन्त ॥

आदधिरे अङ्गिरसः प्रथमं हविः समिद्धाग्नयः कर्मणा ये शोभनकरणेन । ते सर्वमेवासुरात् भोजनं त्वया सहायेन अविन्दन्त । अश्ववन्तं गोमन्तं च पशुसङ्घं नेतारः अङ्गिरसः ॥ (४)

**यज्ञैरथर्वा प्रथमः पथस्तते ततः सूर्यो व्रतपा वेन आजनि ।**
**आ गा आजदुशना काव्यः सचा यमस्य जातममृतं यजामहे ॥**

यज्ञे[1] । पणिभिरपहृतासु गोषु यज्ञैरनुष्ठितैरथर्वा प्रथमः पूमध्वनस्तते[2] कृतवान् । ततस्सूर्यः कर्मणां पालयिता कान्तः[3] ॥

पणिभिरपहृतासु गोषु यज्ञैः कृतैरथर्वा पूर्वं मार्गान् कृतवान् । ततोऽन्धकारविनाशार्थं कर्मणां पालयिता कान्तः सूर्यः प्रादुरभूत् । ततोऽन्धकारे विनष्टे कविपुत्र उशनाः सह सर्वा एव गाः आजत् । असुरनियमनार्थं प्रादुर्भूतं इन्द्रं यजामहे ॥ (५)

**बर्हिर्वा यत्स्वपत्याय वृज्यतेऽर्को वा श्लोकमाघोषते दिवि ।**
**ग्रावा यत्र वदति कारुरुक्थ्यस्तस्येदिन्द्रो अभिपित्वेषु रण्यति ॥**

[1] Read यज्ञैः

[2] Read पूर्वमध्वनस्तते.

[3] Here there is a break in the commentary. But there is no indication of it in the MS.

यस्मिन्[1] यज्ञार्थे व्रज्यते । होता चोच्चैः श्लोकमुच्चारयति । दिवि दीप्ते यज्ञे । अपि वा नभसि । ग्रावाभिषवप्रवृत्तो यत्र वदति कारुकृथ्य[2] इत्यौपमिकम् । तस्यैवेन्द्रोऽभिप्राप्तिषु रमते । तमेवाभिगच्छतीति[3] ॥

यस्मिन् मनुष्ये शोभनाय कर्मणे बर्हिर्वा वृज्यते । होता वा स्तुतिशब्दैः उच्चैर्घोषयति अन्तरिक्षे । तत्र हि वाचमुच्चारयति । यत्र वा सोमाभिषवकृत् ग्रावा प्रशस्यः शब्दं करोति तस्यैव वाभिगमनेषु इन्द्रो रमते ॥　　(६)

---

**असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि ।**
**आ त्वा पृणक्त्विन्द्रियं रजः सूर्यो न रश्मिभिः ॥**

असावि । सुतस्सोम इन्द्र तुभ्यं शविष्ठ धृष्णवागहि । आपूरयतु त्वामिन्द्रियं बलकरमन्धः । अन्तरिकःमिव[4] सूर्यो रश्मिभिः ॥

सुतः सोम इन्द्र तुभ्यं बलवत्तम अभिभवितः । आगच्छ । आपूरयतु त्वां बलं अन्तरिक्षमिव सूर्यो बलैः ॥　　(१)

**इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम् ।**
**ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम् ॥**

[1] Here also the earlier portion is missing. But the MS. is continuous.

[2] Read कारुकृथ्य.

[3] Here there is the figure 3 to mark the end of the Sūkta,

[4] Read अन्तरिक्षमिव,

स्पष्टोत्तरेति[1] ॥

इन्द्रमश्वौ वहतः अप्रत्यभिभूतबलं ऋषीणां च स्तुतीः मनुष्याणां च यज्ञं प्रति ॥ (२)

**आ तिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी ।**
**अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥**

आतिष्ठ । स्पष्टार्थैव । वक्तुशब्दो[2] वचेः । अभिषग्रावघोषेण[3] तव मनोऽभिमुखं करोतु । अर्वाचीनं सु ते मन उत चक्षुः[4] इत्यत्र[5] समुच्चयस्य प्रतीतेस्तत्र न सृष्टः । यत्र क्वचर्वाचीनत्वमविवेधं[6] तत्र त्वन्तोदात्त[7] । अर्वाचीनं सु ते मनः[8] इति ॥

आतिष्ठ वृत्रहन् रथम् । युक्तौ ते ब्रह्मणा अश्वौ । तव मनः अभिषवग्रावा घोषशब्देन अस्मदभिमुखं सुष्ठु करोतु ॥ (३)

**इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम् ।**
**शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥**

[1] Folio 59*b* ends with स्पष्टो.

[2] Read वग्नुशब्दो.

[3] Read अभिषवग्रावघोषेण.

[4] R. V. 3. 37. 2.

[5] The इ mark of रि in चक्षुरित्यत्र worm eaten.

[6] The व of वे partly worn-eaten. Not quite sure. Similarly ध following it is also partly worm-eaten and is not sure. Passage not clear. Perhaps to read क्वचार्वाचीनत्वमविधेयं.

[7] Read त्वन्तोदात्तः

[8] In the present verse तं, न and इ mostly worm-eaten.

इमम् । इममिन्द्र सुतं पिब प्रशस्यममारकं मदम् । अन्योऽभिमदो मारयोदपि[1] । सोमस्य त्वाभ्यक्षरन् धारा यज्ञन्वे[2] इति ॥

इदमिन्द्र सुतं पिब प्रशस्यं अमरणसाधनं सोमम् । सोमस्य धारास्त्वां अभ्यक्षरन् यज्ञगृहे ॥ (४)

**इन्द्राय नूनमर्चतोक्थानि च ब्रवीतन ।**
**सुता अमत्सुरिन्दवो ज्येष्ठं नमस्यता सहः ॥**

इन्द्राय । इन्द्राय क्षिप्रमर्चनं कुरुत । शस्त्राणि ब्रवीतन । सुता अमत्सुस्तमिमं सोमाः । ज्येष्ठं नमस्यत सहस्वन्तः । ज्येष्ठः प्रशस्यः[3] । यः पुनर्वयसा ज्येष्ठः सोऽन्तोदात्तः । ज्येष्ठ आह चमसा[4] ॥

इन्द्राय क्षिप्रं स्तुत । शस्त्राणि च ब्रूत । सुताः सोमा एनममत्सुः । तमिमं मत्तो ज्येष्ठं सहस्वन्तं स्तोत्रशस्त्रैर्नमस्यत ॥ (५)

**नकिष्ट्वद्रथीतरो हरी यदिन्द्र यच्छसे ।**
**नकिष्ट्वानु मज्मना नकिः स्वश्व आनशे ॥**

न कः[5] । न त्वतोऽन्यो[6] रथीतरोऽस्ति । यस्त्वमश्वौ नियच्छसि ।

[1] Read मारयेदपि.

[2] There is something missing. It must be the meaning of ऋतस्य सादने. Perhaps to read यज्ञस्य गृहे.

[3] प्रश completely worm-eaten.

[4] R. V. 4. 33. 5.

[5] Read न किः

[6] Read त्वत्तो.

यदिति लुप्तविभक्तिकम् । न त्वामन्वन्यो बलेन भवति । सादृश्येऽनुः । न त्वामन्यः स्वश्च आप्नोति ॥

न कश्चित्त्वत्तो रथीतरो भवति यदि त्वमिन्द्राश्वौ नियच्छसि । न कश्चित्त्वामनु बलेन अभिभवति । न कश्चन स्वश्वो गच्छन्तं व्याप्नोति ॥ (६)

**य एक इद्विदयते वसु मर्ताय दाशुषे ।**
**ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥**

यः । य एक एव विदयते प्रथते प्रथते[1] प्रयच्छन्ति[2] धनं मर्त्याय दाशुषे । स ईशानोऽप्रतिशब्दितः परैरिन्द्रः । अंगेति परं संबोधयति ॥

य एक एव विविधं प्रयच्छति धनं मर्ताय दाशुषे । ईश्वरः शत्रुभिरप्रतिशब्दितः स इन्द्रः । अङ्ग इति कंचन संबोधयति ॥ (७)

**कदा मर्तमराधसं पदा क्षुम्पमिव स्फुरत् ।**
**कदा नः शुश्रवद्गिर इन्द्रो अङ्ग ॥**

कदा । कदा । ममर्त्यमहविष्करमामययन्तं[3] वा देवा पादेन क्षुम्पं अहिच्छत्राकं इवानायासेनावस्फुरत । स्फुरतिः पेषणकर्मा । कदा चास्माकं स्तुतिरिन्द्रः[4] । अत्र निरुक्तम् । क्षुम्पमहिच्छत्राकं भवति यत् क्षुभ्यते—इति[5] ॥

[1] One प्रथते not wanted.

[2] Read प्रयच्छति.

[3] Read मर्त्यमहविष्कमनाराधयन्तं.

[4] Read स्तुतीरिन्द्रः

[5] N. 15. 16. Text reads अहिच्छत्रकम्.

कदा मनुष्यमनाराधयन्तं पादेन अहिच्छत्रमिवानायासेन अवस्फुरति। वधकर्मा स्फुरतिः। कदा नः शृणोति गिरः॥ (८)

यश्चिद्धि त्वा बहुभ्य आ सुतावाँ आविवासति।
उग्रं तत्पत्यते शव इन्द्रो अङ्ग॥

यश्चित्। यश्चिचि[1] त्वा बहुभ्योऽन्येभ्यः मनुष्येभ्यः सुन्वानः परिचरतेऽस्मै उद्गूर्णं बलं पत्यते पातयति प्रापयतीन्द्रः॥

यश्चिद्धि त्वा बहुभ्यो मनुष्येभ्य एकः सुतसोमः परिचरति तस्योद्गूर्णं बलं सर्वेषां ईष्टे स इन्द्र इति अवगच्छ॥ (९)

स्वादोरित्था विषूवतो मध्वः पिबन्ति गौर्यः।
या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभसे
वस्वीरनु स्वराज्यम्॥

स्वादोः। स्वादोरित्थं व्याप्तिमतः सोमस्य पिबति गौर्यो गावः। या इन्द्रेण सह गच्छन्त्यो वृष्णा मदन्ति शोभसे शोभमानाः। वस्वीर्वेस्यस्ता[2] अन्वासते स्वराज्यं स्वराजमिन्द्रम्॥

स्वादुरसस्येत्थं व्याप्तिमतः सोमस्य पिबन्ति गौरवर्णा गावः या इन्द्रेण वृष्णा सहागच्छन्त्यः पीत्वा सोमं मदन्ति शोभार्थम्। ता वसुमत्यः अन्वासते स्वराज्यम्॥ (१०)

[1] Read यश्चिद्धि.

[2] Read वस्वीर्वस्व्यस्ता.

**ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः ।**
**प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं**
**वस्वीरनु स्वराज्यम् ॥**

ता अस्य । ता धेनव इन्द्रस्य स्पर्शनकामाः पयसा सोमं श्रीणन्ति पृश्नयो नानावर्णाः । प्रिया इन्द्रस्य धेनवो वज्रं प्रेरयन्ति सायकं शत्रूणामन्त-रकरम्[1] । ता अस्य सुददोसहः[2]—इत्यत्र सोमं श्रीणन्ति पृश्नयः—इति[3] न सृष्टः । तत्र श्वापः पृश्नयः । यदि वा गोनां पृश्नय इति ॥

ता धेनवः इन्द्रस्य स्पर्शनकामाः स्वपयसा सोमं श्रीणन्ति गावः । प्रिया इन्द्रस्य धेनवः शत्रूणामन्तकरमायुधं च प्रेरयति ॥ (११)

**ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः ।**
**व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये**
**वस्वीरनु स्वराज्यम् ॥**

ता अस्य । ता गावोऽन्नेनास्य बलं परिचरन्ति प्रचेतसः । व्रतानि चास्य वृत्रवधादीनि सिषेविरे बहूनि पूर्वचित्तये पूर्वमेव तानि परान् प्रज्ञापयितुम् ॥

ता अस्यान्नेन बलं परिचरन्ति प्रचेतसः । व्रतानि चास्य वृत्रवधादीनि बहूनि अभ्यगच्छन् पूर्वमेव ज्ञातुम् ॥ (१२)

[1] Read शत्रूणामन्तकरम्.
[2] R. V. 8. 69. 3. Read सुददोहसः
[3] The second pāda in R. V. 8. 69. 3.

इन्द्रो॑ द॒धीचो॑ अ॒स्थभि॑र्वृ॒त्राण्यप्र॑तिष्कुतः ।
ज॒घान॑ न॒वती॒र्नव॑ ॥

इन्द्रः[1] । इन्द्र आथर्वणस्य दधीचोऽस्थिभिर्वृत्राण्यप्रतिशब्दितो जघन[2] नवतीर्नव ॥

इन्द्रो दधीच ऋषेरस्थिभिः जघान नवतीर्नव चासुरान् अप्रतिकृतः ॥ (१३)

इ॒च्छन्नश्व॑स्य॒ यच्छिरः॒ पर्व॑ते॒ष्वप॑श्रितम् ।
तद्वि॑दच्छर्य॒णाव॑ति ॥

इच्छन् । आथर्वणस्य दधीचो जीवतो दर्शनेनासुराः पराबभूवुः । अथ तस्मिन् स्वर्गतेऽसुरेः[3] पूर्णा पृथिव्यभवत् । अथेन्द्रंस्तमन्विच्छन्[4] . . . . हे[5] किमस्य किञ्चिन्न परिशिष्टमसीति[6] । तस्मै होचुरासीतेदाश्वं[7] शीर्षं येनाश्विभ्यां वेदं प्राब्रवीत् । तत्तु न विद्म यत्राभवदिति । तद्वा अन्विच्छतेति । युद्धान्वेषिषु[8] । तच्छर्यणावत्यनुविद्याजह्वः[9] । शर्यणाव-

[1] Folio 60*a* ends here.

[2] Read जघान.

[3] Read स्वर्गतेऽसुरैः

[4] Read अथेन्द्रस्तमन्विच्छन्.

[5] After अन्विच्छन् about 12 letters are worm-eaten. The first is स; after 2 or 3 letters, तइ + शश्र + प्र can be made out. The next must be च्छ usually written छश. The श below is clear. Perhaps स्वर्ग गत इति शुश्राव । सोऽपृच्छत्.

[6] Read परिशिष्टमस्तीति.

[7] Read होचुरासीदेतदाश्वं.

[8] Read यद्वान्वेषिषु:

[9] Read तच्छर्यणावत्यनुविद्याजह्रु:

द्वै[1] नाम कुरुक्षेत्रस्य जघनार्धे[2] सरस्कन्दते। तस्य गिरसोऽस्तिभि-रिन्द्रो[3]ऽसुरान् जघान इति शाट्यायनकोक्त इतिहासोऽस्माभिरितिहासानु-क्रमण्यां प्रपञ्चेनानुवर्णित इति ॥

अन्विच्छन्नभवत्। यदश्वस्य शिरः पर्वतेषु अवगूढं तदविन्दत् शर्यणावति सरसि। अत्र शाट्यायनकम्—दध्यङ् ह वा आथर्वणः तेजस्वी ब्रह्मवर्चस्यास। तं ह स्म यावन्तोऽसुराः परापश्यन्ति ते ह स्म तदैव विशीर्षाणः शेरते। स ह स्वर्गं लोकमुच्चक्राम। स हेन्द्रोऽसुरैः अभिभूत उवाच। क्व नु स दध्यङ्ङभवदिति। तस्मै होचुः। स्वर्गं वै भगवः स लोकमुदक्रामदिति। स होवाच। न ह्यस्येह किञ्चित् परिशिष्टमस्तीति। तस्मै होचुः। आसीदेतदाश्वं शीर्षं येनाश्विभ्यां देव वेदं प्राब्रवीत्। तत्तु न वि[illegible] यत्राभवदिति। तद्वा अन्विच्छतेति। तद्वान्वैषिषुः। इच्छन्नश्वस्य इत्यादिकमुक्त्वाह। शर्यणावद्ध नाम कुरुक्षेत्रस्य जघनार्धे सरः स्कन्दते। तदनुविद्याजह्रुः। तदस्मै प्रायच्छत्। तद्ध स्मासुराणां प्रकाशेऽधारयत्। तद्ध स्म यावन्तोऽसुराः परापश्यन्ति ते ह स्म तदैव विशीर्षाणः शेरते। स ह तैरेवास्थिभिः नव नवतीर्जघान असु-राणाम्—इति ॥ (१४)

अत्राह् गोरमन्वत् नाम् त्वष्टुरपीच्यम्।
इ॒त्था च॒न्द्रम॑सो गृ॒हे ॥

अत्र। अत्रास्मिंश्चन्द्रमसो गृहे गोर्गन्तुरादित्यस्यामनुत प्रज्ञायत[4] नामकं तेजस्त्वष्टुः दीप्तस्यापीमन्तर्हितम्[5]। आदित्यस्य तेजसा चन्द्रमसो

[1] व in वै worm-eaten.

[2] स्य जघ completely worm-eaten.

[3] Read शिरसोऽस्थिभिरिन्द्रो.

[4] Read प्राज्ञायत.

[5] Read दीप्तस्यापीच्यमन्तर्हितम्.

मण्डलमाप्यायितम् । आदित्यश्चेन्द्र इति । तत्र निरुक्तम् । अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रदीप्यते[1] । तदेतेनोपेक्षितम्[2] । आदित्यतोऽस्य दीप्तिर्भवतीति । सुषुमुस्सूर्यरश्मिश्चन्द्रमा[3] गन्धर्वः—इत्यपि[4] निगमो भवति । सोऽपि तु गौरुच्यते । अत्राह गोरमन्वत इति[5] । अत्र गोस्समंवतादित्यरश्मयस्सन्नाम[6] । अपीच्यमपचितमपगतं अपद्रूतमन्तर्हितं[7] वा । अत्र चन्द्रमसो गृहेह[8] ॥

अत्र यास्कः । अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते तदेतेनोपेक्षितव्यं आदित्यतोऽस्य दीप्तिर्भवतीति । सुषुम्नः सूर्यरश्मिश्चन्द्रमा गन्धर्व इत्यपि निगमो भवति । सोऽपि गौरुच्यते । अत्राह गोरमन्वत इति । अत्र ह गोः सममंसत आदित्यरश्मयः स्वं नाम । अपीच्यमपचितं अपगतं अपिहितं अन्तर्हितं वा । अमुत्र चन्द्रमसो गृहे इति । अत्र चन्द्रमसो गृहे मण्डले गोः सुषुम्नाख्यादित्यरश्मेः सकाशात् तदेकदेशभूता रश्मयः अन्तर्हितं नमनं कर्तुं अमन्वत गूढं तत्र वसति । त्वष्टा त्विषेर्दीप्तिकर्मण इति । तच्चैतदिन्द्रकृत इत्यैन्द्रत्वम् ॥ (१९)

**को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।**
**आसन्निषून् हृत्स्वसो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥**

[1] Read प्रति दीप्यते.

[2] Read तदेतेनोपेक्षितव्यम्.

[3] Read सुषुम्नस्सूर्यरस्मिश्चन्द्रमा.

[4] V. S. 18. 40.

[5] N. 2. 6.

[6] After गोस्समं a letter is mostly worm-eaten. It looks like ब. Read गोस्सममंसतादित्यरश्मयः स्वं नाम.

[7] Read मपिहितमन्तर्हितं.

[8] N. 4. 25. Read only गृहे or गृहे इति.

को अद्य । को अद्य युङ्क्ते[1] इन्द्रस्य धुरि गा अश्वान् कर्मवतो दीप्तिमतो दुर्हृणायून् । हिंसाकामाः सपत्नानां दुर्हृणायवः । संग्राममुखे प्रेर्यमाणः[2] आसन्निषवः । तानासन्निषून् । हृत्सु ये पादमध्यन्ति[3] ते हृत्स्वसः । सुखं ये भावयन्ति । यद्वास्यै[4] येषामिट् घासस्ते आसन्निषवः । ये एषामश्वानां भृत्यां भरणमृणधत् समर्धयति स जीवति लब्धान्नः ॥

क इदानीं युङ्क्ते इन्द्रस्य रथधुरि अश्वान् कर्मवतः क्रोधवतः हिंसामिच्छन्तः निरस्यमानेषून् हृदयेषु च विध्यतः सुखस्य भावयितॄन् । य एषामश्वानां यवसैर्भरणं समर्धयति स जीवति लब्धान्नः ॥ (१६)

**क ईषते तुज्यते को बिभाय को मंसते सन्तमिन्द्रं को अन्ति ।**
**कस्तोकाय क इभायोत रायेऽधि ब्रवत्तन्वे३ को जनाय ॥**

कन्तिष्वन्तमिन्द्रं[5] युध्यते त्रातारम् । एकः कः पूरकः । क इह बुद्धैः[6] पुत्रार्थं को वा धनार्थम् । अपि वा ह्रियमाणाय धनाय । असिवचनं[7] करोति । तेकमिन्द्र[8] रक्षेभमिरेक्षेति[9] । को वा शरीरार्थं को वा जनाय

[1] Between यु and ङ्क्ते there is a letter not clear and partly worm-eaten. Perhaps another यु.

[2] Read प्रेर्यमाणाः

[3] Not clear. Perhaps to read only विध्यन्ति for पादमध्यन्ति.

[4] Read यद्वास्ये.

[5] A portion in the beginning is missing. The MS. notes no break. Read के तिष्ठन्तमिन्द्रं. This is the end of the first half.

[6] This word not clear. Perhaps युद्धे.

[7] Read अधिवचनं.

[8] Read तोकमिन्द्र.

[9] Read रक्षेभमिन्द्र रक्षेति.

भटभूताय । अगते इन्द्रे युध्यतां यजमानानां विवादा भवन्ति । किमिहेन्द्र आगत इति प्रश्न इति ॥

क इह भीतः पलायते । को वा हिंस्यते । को बिभेति । को वा अन्तिके तिष्ठन्तमिन्द्रं भीतो जानाति । पूरण एकः किंशब्दः । कः पुत्रार्थे को गजार्थे को वा धनार्थे अधिब्रवीति । पुत्रादिकं मदीयं रक्षेति वचनमधिवचनम् । को वा शरीरार्थे भटार्थे च । आगते सतीन्द्रे एतानि चिह्नानि भवन्ति । आगतः किमिहेन्द्र इति प्रश्नः ॥ (१७)

**को अ॒ग्निमी॑ट्टे ह॒विषा॑ घृ॒तेन॑ स्रु॒चा य॑जाता ऋ॒तुभि॑र्ध्रु॒वेभिः॑ ।**
**कस्मै॑ दे॒वा आ व॑हाना॒शु होम॒ को मं॑सते वी॒तिहो॑त्रः सुदे॒वः ॥**

को अग्निः । हविः संभृत्येन्द्रस्य[1] यज्ञार्थे को अग्निं स्तौति हविषा घृतेन च युक्तः । को वा स्रुचा यजतेऽग्निमृतुभिर्ध्रुवैः कालैः । अपि वा प्रयाजदेवता ऋतवः । ताभिः सह । कस्मै देवाः शीघ्रमावहन्ति होम ह्वातव्यं धनम् । को वा मंसते स्तैतीन्द्रं[2] वीतिहोत्रं प्रिययज्ञः सुदेवः ॥

हविः संभृत्य इन्द्रयागार्थे कोऽग्निं सामिधेनीभिः स्तौति । को वा घृतेन हविषा स्रुचा करणभूतया ध्रुवैर्ऋतुभिः सह प्रयाजदेवताभिः अग्निं यजते । कस्मै देवाः शीघ्रमावहन्ति हूयमानं हविः । को वा प्रियमन्त्रः कल्याणदेवः देवेभ्यः कामान् वाञ्छति ॥ (१८)

**त्वम॒ङ्ग प्र शं॑सिषो दे॒वः श॑विष्ठ॒ मर्त्य॑म् ।**
**न त्वद॒न्यो म॑घवन्नस्ति मर्डि॒तेन्द्र॒ ब्रवी॑मि ते॒ वचः॑ ॥**

[1] Folio 60*b* ends here.
[2] Read स्तौतीन्द्रं.

त्वमङ्ग । त्वमाङ्ग[1] प्रशंसिषः प्रशंस सुष्टुतमिति । देवो बलवत्तम मर्त्यम्। न त्वदन्यो मघवन्नस्ति सुखयिता । ततस्तुभ्यमिन्द्रेदं ब्रवीमि वच इति ॥

त्वमङ्ग प्रशंसिषः सुष्टुतमिति देवो बलवत्तम मनुष्यम् । न त्वत्तोऽन्यः सुखयिता मघवन्नस्ति । ततस्तुभ्यमहं ब्रवीमि स्तोत्रम् ॥ (१९)

**मा ते राधांसि मा त ऊतयो वसोऽस्मान् कदा चना दभन् ।**
**विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ ॥**

मा ते । मास्मांस्तव राधांसि भूतानि । मा च मरुतः कदाचिदपि दभन् । विश्वानौनि[2] चोपमिमीह्यस्मभ्यं वसूनि द्रष्टाभ्यो मनुष्य[3] इति[4] ॥

वासयितरिन्द्र तव धनानि पालनानि च कदाचिदपि मास्मान् दभन् । विश्वानि उपमिमीहि अस्मभ्यं मनुष्यहित वसूनि द्रष्टृभ्यः ॥ (२०)

---

**प्र ये शुम्भन्ते जनयो न सप्तयो यामन् रुद्रस्य सूनवः सुदंससः ।**
**रोदसी हि मरुतश्चक्रिरे वृधे मदन्ति वीरा विदथेषु घृष्वयः ॥**

प्र ये । ये प्रशुम्भन्तेऽलंकुर्वन्ति स्वाङ्गानि चा[5] जाया इव सप्तयः

[1] Read त्वमङ्ग.
[2] Read विश्वानि.
[3] Read द्रष्टृभ्यो मनुष्येभ्य.
[4] Here there is the figure 4 to mark the end of the sūkta.
[5] चा not wanted.

सरणशीलाः । यामन् गमनोद्योगे रुद्रस्य सूनवः सुकर्माणः । रोदसी मरुतश्चक्रिरे वर्धनाय । मदन्ति च वीरा यज्ञेषु घर्षणशीलाः ॥

प्रकर्षेणालंकुर्वते ये जाया इव अश्वा इव च गमने रुद्रस्य पुत्राः सुकर्माणः । द्यावापृथिव्योर्हि मरुतश्चक्रिरे वर्धनाय । मदन्ति च वीरा यज्ञेषु घर्षणशीला वृक्षाणाम् ॥ (१)

**त उ॑क्षि॒तासो॑ महि॒मान॑माशत दि॒वि रु॒द्रासो॒ अधि॑ चक्रिरे॒ सदः॑ ।**
**अर्च॑न्तो अ॒र्कं ज॒नय॑न्त इन्द्रि॒यमधि॒ श्रियो॑ दधिरे॒ पृश्नि॑मातरः ॥**

त उक्षितासः । ते पृथिवीमुक्षमाणाः यदि वोरक्षिताः[1] अद्भिः महिमानं प्राप्नुवन्ति । नभसि च सदनं चक्रिरे रुद्रपुत्राः । प्रयच्छन्तोऽन्नं जलं वा जनयन्त इन्द्रियं श्रियोऽधिधारयन्ति गोमातरः ॥

ते वर्षबिन्दुभिः सिक्ता महत्वं प्रापन् । दिवि चाधि सदनमकुर्वन् । अर्चन्तोऽर्चनीयमिन्द्रं जनयन्तश्च बलं श्रियोऽधिदधिरे ॥ (२)

**गोमा॑तरो॒ यच्छु॒भय॑न्ते अ॒ञ्जिभि॑स्त॒नूषु॑ शु॒भ्रा द॑धिरे वि॒रुक्म॑तः ।**
**बाध॑न्ते॒ विश्व॑मभिमा॒तिन॒मप॒ वर्त्मा॑न्येषा॒मनु॑ रीयते घृ॒तम् ॥**

गोमातरो[2] यदा शोभयन्त्यङ्गान्याभरणैः तदानीं तनूषु शोभमानां पिरुक्मतो[3] धारयन्त्यलंकारान् । अपबाधन्ते च विश्वमभिमातिनम् । अनुगच्छति सैषां मार्गानुदकम् ॥

[1] Read वोक्षिताः

[2] There is no pratika separately given. गोमातरः as the meaning of पृश्निमातरः ended the last verse. This verse begins with गोमातरः There should be one more गोमातरः for pratika.

[3] Read विरुक्मतो.

पृश्नेर्ह वै पयसो मरुतो जातः इति ब्राह्मणम्। यदा ते आत्मानं मरुत आभरणैरलंकुरुते तदाङ्गेषु कल्याणा मरुतः विशिष्टदीप्तिमतः सुवर्णमयान् कवचान् दधिरे। सर्वं शत्रुं अपबाधन्ते। तथा एषां मार्गानुदकमनुगच्छति। यत्र गच्छति भवति तत्रोदकम्॥ (३)

**वि ये भ्राजन्ते सुमखास ऋष्टिभिः प्रच्यावयन्तो अच्युता चिदोजसा।**
**मनोजुवो यन्मरुतो रथेष्वा वृषव्रातासः पृषतीरयुग्ध्वम्॥**

वि ये। विभ्राजन्ते ये सुमखा ऋषिभिः[1]। अच्युतान्यपि प्रच्युतावयन्तो[2] बलेन ते भवन्ति। प्रत्यक्षमुत्तरार्धः। मनोवेगा यदा मरुतो रथेषु यं[3] वर्षणशीलसंघाः पृषतीरयुङ्ध्वम्॥

विभ्राजन्ते ये सुयज्ञाः आयुधैः प्रच्यावयन्तः अच्युतान्यपि पर्वतादीनि बलेन। मनोवेगा यदा यूयं पृषद्वर्णा अश्वा रथेष्वयुङ्ध्वम्। वर्षिता गणो येषां ते वृषव्राताः। तदा तेषां मार्गमनुगच्छति॥ (४)

**प्र यद्रथेषु पृषतीरयुग्ध्वं वाजे अद्रिं मरुतो रंहयन्तः।**
**उतारुषस्य वि ष्यन्ति धाराश्चर्मेवोदभिर्व्युन्दन्ति भूम॥**

प्र यत्। प्रयुङ्ध्वं यथा[4] रथेषु पृषतीः संग्रामे आयुधं मरुतः प्रेरयन्तः तदानीमारोचमानस्यादित्यस्य वैद्युतस्य वा विष्यन्ति विस्यन्दते।

[1] Read ऋष्टिभिः

[2] Read प्रच्यावयन्तो.

[3] Read यूयं.

[4] Better read यदा.

धाराः चर्मेव[1] परिमितं सर्वां भूमिं सुन्दन्ति[2] । चर्म चरतेरिति[3] ॥

प्रायुङ्ध्वं यदा रथेषु अश्वा बले सति अद्रिमपि मरुतः उत्क्षिपन्तः तदानीं दीप्तस्य मारुतस्य गणस्य सकाशात् धाराः पतन्ति । तेऽमी सर्वां भूमिं खल्वल्पपरिमाणं चर्मेव उदकैर्विविधं क्लेदयन्ति ॥ (५)

**आ वो॑ वह॒न्तु सप्त॑यो रघु॒ष्यदो॑ रघु॒पत्वा॑नः॒ प्र जि॑गात बा॒हुभिः॑ ।**
**सीद॒ता ब॒र्हिरु॒रु वः॒ सद॑स्कृ॒तं मा॒दय॑ध्वं मरुतो॒ मध्वो॒ अन्ध॑सः ॥**

आ वः । आवहन्तु युष्मान् सप्तयो लघुगामिनो लघुपादाः । यूयं प्रगच्छत बाहुभिन्नभोघ्नन्तः[4] । आसीदन्त बर्हिरुरु युष्माकमासनं कृतम् । मादयध्वं मरुतो मादकेन सोमेन[5] ॥

आवहन्तु युष्मानश्वा लघुगामिनो लघुपातिनः । प्रजिगात च शत्रून् बाहुभिः । आसीदत च बर्हिर्विस्तीर्णं स्थानं युष्माकं कृतम् । मधुसदृशेन सोमेन मादयध्वम् ॥ (६)

**तेऽव॑र्धन्त॒ स्वत॑वसो महित्व॒ना नाकं॑ त॒स्थुरु॒रु च॑क्रिरे॒ सदः॑ ।**
**विष्णु॒र्यद्धाव॒द्वृष॑णं मद॒च्युतं॒ वयो॒ न सीद॒न्नधि॑ ब॒र्हिषि॑ प्रि॒ये ॥**

[1] Really written चम्मेव, with no ् mark above.

[2] Read वुन्दन्ति.

[3] After चर there are two letters with इ mark above. The second must be ति. Both are worm-eaten. Only इ marks remain. The other must be रि.

[4] Read only बाहुभिः The rest not wanted.

[5] मेन in सोमेन completely worm-eaten.

+ + + न्त स्वबला[1] महत्वेन । आतस्थुश्च नाकम् । उरुश्च नभश्चसदाश्चक्रिरे[2] । विष्णुर्यज्ञो यदा यावदधितिष्ठति[3] वृषणं मारुतं गणम्[4] । तदानीं तेन सहिताः पक्षिण इव प्रिये बहिष्यसीदन्ति[5] ॥

तेऽवर्धन्त स्वबलाः माहात्म्येन दिवं चास्थिता विस्तीर्णमासनं चक्रिरे । यज्ञो यदा रक्षति वर्षितारं शत्रुमदस्य च्यावकं मरुद्गणं तदा सोमं पातुं मरुतः प्रिये बर्हिषि पक्षिण इव शीघ्रमागत्य सीदन्ति ॥ (७)

**शूरा॑ इ॒वेद्युयु॑धयो॒ न जग्म॑यः श्र॒व॒स्यवो॒ न पृत॑नासु येतिरे ।**
**भय॑न्ते॒ विश्वा॒ भुव॑ना म॒रुद्भ्यो॒ राजा॑न इव त्वे॒षसं॑दृशो॒ नरः॑ ॥**

शूरइय[6] । शूरा इव योद्धारो + + + + + + + प्युपमार्थीयाभ्यां[7] एक एवार्थे उक्तः । अन्नार्थिक[8] इव पूतनासु यतन्ते । बिभ्यति च

[1] After सोमेन mostly worm-eaten, in the last verse, a few letters more are completely worm-eaten and at the end of the line, न्त is quite legible and स्व can just be made out. Here folio 61*a* ends. The lost portion can be only तेऽवर्ध. Perhaps there was also the pratika ते before तेऽवर्धन्त. There is no space for तेऽवर्धन्त for pratika separately.

[2] Read only उरु च सद्श्चक्रिरे. The letters सदाश्च are found deleted with dots above.

[3] There is a dot above द् after याव.

[4] मदच्युतं not commented.

[5] Read बर्हिष्यासीदन्ति.

[6] Read शूरा इव.

[7] After योद्धारो the corner is completely worm-eaten and about seven or eight letters lost. The first of them ग is partly clear. This most be गच्छन्तः. Perhaps what is lost is उभाभ्याम्.

[8] Read अन्नार्थिन.

विश्वानि भुवनानि मरुद्भ्यः । राजान इव तेऽमी दीप्तरूपा नोतार[1] इव ॥

शूरा इव योद्धारो गच्छन्तः शत्रुभ्यः अन्नमिच्छमाना इव युद्धेषु गच्छन्ति । द्वितीयो नकारः पूरणः । बिभ्यति च विश्वानि भुवनानि मरुद्भ्यो राजान इवालंकृता दीप्तसंदर्शना नेतारः ॥ (८)

**त्वष्टा यद्वज्रं सुकृतं हिरण्ययं सहस्रभृष्टिं स्वपा अवर्तयत् ।**
**धत्त इन्द्रो नर्यपांसि कर्तवेऽहन् वृत्रं निरपामौब्जदर्णवम् ॥**

त्वष्टा । त्वष्ट[2] यदा वज्रं स्तुसंकृतः[3] हिरण्मय + + + + + + + धारं[4] सुकर्मा प्रैरयत ददानीमिन्द्रो[5] धत्ते स्म[6] नरि कर्माणि कर्तुम् । नृशब्द[7] संग्रामवचनश्चास्ति । य एक इन्नर्यपांसि कर्ता इति[8] । चतुर्थः पादो गतः[9] । सुकृतमिति निष्ठान्तमाद्युदात्तम् । सुकृते सुकृ[10] + इति । क्लीबन्तं[11] मध्योदात्तम् । सुकृता तच्छमितारः[12] इति । भावे निष्ठायां बहुव्रीहावन्तोदात्तत्वमिति ॥

[1] Read नेतार.

[2] Read त्वष्टा.

[3] Read सुसंस्कृतं.

[4] The end of the line is lost as the corner is broken. The lost letters must be the anusvāra after य and सहस्र. Only four letters are missing in this line.

[5] Read तदानीमिन्द्रो.

[6] स्म perhaps not wanted.

[7] Read नृशब्दः

[8] R. V. 8. 96. 19.

[9] R. V. 1. 56. 5 above.

[10] Perhaps R. V. 6. 62. 1. where there is सुकृतः कर्तृभिः

[11] Read क्लीबान्तं.

[12] R. V. 1. 162. 10.

त्वष्टा यत् आयुधं सुकृतं हिरण्यालंकृतं सहस्रधारं सुकर्मेन्द्राय समर्पयामास तं वज्रमधारयदिन्द्रः नेतरि मरुद्गणे सहायभूते सति कर्माणि कर्तुम्। अथ वृत्रमहन्। हत्वा च अपां अर्णवं मेघं निर्जघान ॥ (९)

**ऊर्ध्वं नुनुद्रेऽवतं त ओजसा दादृहाणं चिद्बिभिदुर्वि पर्वतम्।**
**धमन्तो वाणं मरुतः सुदानवो मदे सोमस्य रण्यानि चक्रिरे ॥**

ऊर्ध्वम्। अवतं कूपोऽवस्तात्ततो भवति[1]। गोतमो मरुत उदकं ययाचे। तस्मै मरुतो दूरस्थं कूपमुद्धृत्य यक्र[2] गोमयः[3] तया दिशा नीत्वा तत्र तं कूपं निधाय तत्समीप आहावं च कृत्वा तदेत्रादकमिमुत्सिच्य[4] न्तन्तपयन्तो[5] जन्मः[6]। तदेतद्वचोनोच्यते। ऊर्ध्वं नुनुद्रे अवतं मरुत ओजसा। अथ तमवतं गोमतस्याश्रमं प्रत्यन्तरिक्षेण जिह्मन्तिर्यञ्चन्नुदन्तो मध्येऽवस्थित[7] दाद्रहाणामगमन्नन्निरुद्धन्तं[8] पर्वन्तं[9] विहिभिःदुः[10]। आत्मीयं वाणं वीणा[11] शब्दापयन्तो मरुतस्सुदानास्सोमस्य मदे रमणीन्ति[12] चक्रिरे ॥

[1] Not traced.

[2] Read यत्र.

[3] Read गोतमः

[4] Read तत्रोदकमुत्सिच्य.

[5] Read तं तर्पयन्तो.

[6] Read जग्मुः

[7] The passage from अथ तमवतं belongs to the next verse and not wanted here.

[8] This must be the explanation of दादृहाणाम्. Perhaps to read दादृहाणं गमनं निरुन्धन्तं.

[9] Read पर्वतं ; or is it पर्ववन्तं ?

[10] Read विभिदुः

[11] Read वीणां.

[12] Read रमणीयानि.

गोतमो मरुभूमिष्ठस्तुष्टाव मरुतस्तृषा ।
तस्मा उच्चिक्षिपुः कूपं दूरस्थं मरुतो बलात् ॥
शिलोच्चयं च बिभिदुर्यो मार्गस्य निरोधकः ।
आत्मीयं वाणवाद्यं च धमन्तो मरुतस्त्वमी ॥
सुदानाः सोममत्ताश्च रमणीयानि चक्रिरे ।
एवंविधानि कर्माणि शेषमुत्तरयावदत् ॥ (१०)

**जि॒ह्मं नु॑नुद्रेऽव॒तं तया॑ दि॒शासि॑ञ्च॒न्नुत्स॑ं॒ गोत॑माय तृ॒ष्णजे॑ ।**
**आ ग॑च्छन्तीमव॑सा चि॒त्रभा॑नवः॒ काम॑ं॒ विप्र॑स्य तर्पयन्त॒ धाम॑भिः ॥**

जिह्मंतिर्यञ्चं[1] प्रेरितवन्तं रूपं[2] तया दिशा । अथ तमुत्समाश्रमे स्थापयित्वासिञ्चन् गोतमाय जाततृष्णायेति नैरुक्तकाः शाकल्यश्च । स्ववितृषोर्नजिङिति वैय्याकरणः[3] । आगच्छन्त्येनमवसान्नेन रक्षणेन वा चित्रदीप्तयः । कामं विप्रस्य पूर्वमकुर्वन्नुदकैः ॥

जिह्मं तिर्यञ्चमित्यर्थो नोदनं प्रेरणं स्मृतम् ।
कूपं तया दिशा यस्यां स्तोता वसति गोतमः ॥
स्थापयित्वाथ तं कूपं कृत्वाहावं समीपतः ।
उदसिञ्चंश्च तं कूपं गोतमाय पिपासवे ॥
आगच्छन्त्येनमवसा मरुतश्चित्रदीप्तयः ।
पुरस्तात् प्रादुरभवन् रक्षणार्थमथ स्वयम् ॥
अथ मेधाविनस्तस्य कामं तैर्धारकैर्जलैः ।
अतर्पयन्नृचोरर्थः श्लोकैरित्थमुदीरितः ॥ (११)

[1] Pratīka not separately given.
[2] Read कूपं.
[3] Perhaps to read वैयाकरणाः. The sūtra is स्वपितृषोर्नजिङ् 3. 2. 172.

**या वः शर्म शशमानाय सन्ति त्रिधातूनि दाशुषे यच्छताधि ।**
**अस्मभ्यं तानि मरुतो वि यन्त रयिं नो धत्त वृषणः सुवीरम् ॥**

याचः[1] । यानि वश्शर्म शशमानाय[2] युष्मान् प्रत्यक्[3] गच्छते देयानि भवन्ति तानि त्रिधातूनि दृढानि दाशुषे[4] यूयमधियच्छत । तदेवाह[5] । अस्मभ्यं तानि मरुतो वियच्छतेति । रयिमस्मभ्यं धत्त वृषणः शोभनेन पुत्रेण युमिति[6] ॥

यानि युष्माकं गृहाणि स्तुवते सन्ति तानि त्रिच्छदिष्काणि यजमानायाधिगच्छत । अस्मभ्यं तानि मरुतः विविधं यच्छत । रयिं च नो धत्त वृषणः सुपुत्रम् ॥ (१२)

---

**मरुतो यस्य हि क्षये पाथा दिवो विमहसः ।**
**स सुगोपातमो जनः ॥**

मरुतो[7] यस्य गृहे पिबथ सोमं दिवः स्तोतुः दिवो वागत्य विशिष्टदीप्तयः शोभनगोपृगो[8] जनोऽत्यन्तम् ॥

[1] Read या वः

[2] Part of ना and whole of य worm-eaten.

[3] Perhaps to read only प्रति or प्रत्युद्गच्छते along with the next word.

[4] Folio 61*b* ends with दाशु.

[5] दे partly and वा mostly worm-eaten.

[6] Read युतमिति. Here there is the figure 5 to mark the end of the sūkta.

[7] There is no pratika separately given.

[8] Perhaps to read शोभनगोप्तारो. The word सः is left off.

मरुतो यस्य गृहे पिबथ सोमं दिव आगत्य विशिष्टदीप्तयः स अत्यन्तं गोप्ता जनः ॥ (१)

**यज्ञैर्वा यज्ञवाहसो विप्रस्य वा मतीनाम् ।**
**मरुतः शृणुता हवम् ॥**

वज्ञंहज्ञैर्हविर्भिश्च[1] सह यज्ञस्य वोढारो विप्रस्य स्तोतुर्मतीनां स्तुतीनां च श्रवणं कुरुत । वाशब्दः समुच्चये । हवींषि विभजत । स्तुतीश्च शृणुत । तदेवाह—मरुतः शृणुताह्वानमिति ॥

यज्ञैर्वा हेतुभिः यज्ञस्य वोढारः अथवा विप्रस्य स्तुतिभिः तच्छुश्रूषया मरुतः शृणुत ह्वानम् ॥ (२)

**उत वा यस्य वाजिनोऽनु विप्रमतक्षत ।**
**स गन्ता गोमति व्रजे ॥**

उत वा । अपि च यस्य वाजिनो हविष्मन्त ऋत्विजो विप्रं मेधाविनं मरुद्गणमन्वतक्षत संस्कुर्वन्ति । स गन्ता[2] गोमन्तं व्रजम् । सप्तम्यत्र दृष्टेति ॥

अपि च यस्य हविष्मन्त ऋत्विजः मेधाविनं मरुद्गणं अन्वतक्षत संस्कुर्वन्ति संपदं निधत्ते गोमति व्रजे सर्वदा ॥ (३)

[1] There is no pratika separately given. ज्ञंह deleted with dots above.

[2] न्त mostly worm-eaten.

अस्य वीरस्य बर्हिषि सुतः सोमो दिविष्टिषु ।
उक्थं मदश्च शस्यते ॥

अस्य । अवीरस्य[1] स्तोतुर्यजमानस्य वा मम बर्हिष्यास्ते सुतः सोमो दिवसेषु । तथोक्तं[2] शस्य[3] मारुतम् । तथा दशस्ते[4] । निविद्वनः[5] इदम् । इदं वामास्ये--इत्यत्र[6] उक्थं मदश्च शस्यते इति पादो[7] न सृष्टः । तत्र हि चकारः पूर्वार्धेन समुच्चयार्थः । हुत[8] सुत इति पादं[9] क्रियापरमिति[10] । नन्वत्राप्यास्ते इत्यध्याहर्तव्यम् । निरूपणीयमिदमिति ॥

अस्य वीरस्य मम यज्ञे सुतः सोमः दिवसागमनेषु शस्त्रं च मदकरं शस्यते ॥ (४)

अस्य श्रोषन्त्वा भुवो विश्वा यश्चर्षणीरभि ।
सूरं चित्सस्रुषीरिषः ॥

अस्य । अस्य स्तुतिं शृण्वन्त्वा भुवो मरुतो विश्वा यश्चर्षणीरभि-

[1] Read अस्य वीरस्य for अवीरस्य.

[2] Read तथा उक्थं.

[3] Read शस्यते.

[4] Read मदश्च शस्यते for दशस्ते.

[5] Read निविद्वचनं.

[6] R. V. 4. 49. 1.

[7] The last pāda in R. V. 4. 49. 1.

[8] Read इह तु.

[9] Read पादः

[10] Read क्रियापर इति.

भवतीति गणाभिप्रायम् । सूरस्सर्तेः स्तोता । इतमपि[1] सम्रषीरभिस्रता[2] भवन्तिषो[3] मरुत्प्रेरिताः । आशुन्दूतं विवस्वतः—इत्यत्र[4] विश्वा यश्चर्षणी-रभि इत्यविसृष्टः[5] । तत्र ह्येकः प्रकृतस्तस्मिन् यच्छब्दः । इह तु बहुषु । अनेसहन्तमाभर—इत्यत्र[6] अभिश्रुत इति ॥

मम शृण्वन्तु भावयितारः सर्वे मनुष्यान् यः अभिभवति सुवीर्यं पुरुषं सस्रुषीः इषोऽन्नानि युद्धेऽभिगच्छति यो गणः ॥ (५)

**पूर्वीभि॒र्हि द॑दाशि॒म श॒रद्भि॑र्मरुतो व॒यम् ।**
**अवो॑भिश्चर्षणी॒नाम् ॥**

पूर्वीभिः । बह्वीभिः शरद्भिर्दत्तवन्तो हवींषि मरुतो वयं देवेभ्यो रक्षणैश्चर्षणीनां द्रष्टृणां भवतां युक्ताः ॥

बह्वीभिर्हि दत्तवन्तः शरद्भिर्मरुतो वयं भवद्भ्यो हवींषि मनुष्याणां रक्षणार्थम् ॥ (६)

**सु॒भ॒गः स प्र॑यज्यवो॒ मरु॑तो अस्तु॒ मर्त्यः॑ ।**
**यस्य॒ प्रयां॑सि॒ पर्ष॑थ ॥**

सुभगः । सुधनः स प्रयष्टव्या मरुतो भवतु मर्त्यः यस्य हवींषि यूयं पर्षथात्मानं प्रति प्रापयः[7] ॥

[1] Read इदमपि.
[2] Read सस्रुषीरभिस्रुता.
[3] Read भवन्ति इषो.
[4] R. V. 4. 7. 4.
[5] The second pāda in R. V. 4. 7. 4.
[6] Not traced.
[7] Read प्रापयथ.

सुभगः स प्रकर्षेण यष्ट्या मरुतो भवतु मर्त्यः यस्य हवींषि आत्मानं नयथ ॥ (७)

शशमानस्य वा नरः स्वेदस्य सत्यशवसः ।
विदा कामस्य वेनतः

शशमानस्य । शशमानस्य च स्विन्नस्य च श्रमणे[1] सत्यबला नेतारो जानीत कामं कामयानस्य ॥

भजमानस्य वा नेतारः स्विन्नगात्रस्य वा श्रमेण सत्यबला जानीत कामं कमयमानस्य ॥ (८)

यूयं तत्सत्यशवस आविष्कर्त महित्वना ।
विध्यता विद्युता रक्षः ॥

यूयम् । यूयं तत्सत्यबला आधिषकुरुत[2] महित्वाना[3] महत्वम् । विध्यत चाशन्या रक्षः ॥

यूयं तत् सत्यबला आविष्कुरुत बलं माहात्म्येन । विध्यत च अशन्या युद्धे रक्षः ॥ (९)

गूहता गुह्यं तमो वि यात विश्वमत्रिणम् ।
ज्योतिष्कर्ता यदुश्मसि ॥

[1] Read श्रमेण.

[2] Read आविष्कुरुत.

[3] Read महित्वना. Folio 61*a* ends here.

गृहता[1] । नाशयत नाशयितव्यं तमो विविधम् । हत च सर्वं रक्षः । ज्योतिष्कुरुत यद्वयं[2] कामयामहे इति[3] ॥

नाशयत नाशयितव्यं तमः । विविधं हत सर्वं रक्षः । ज्योतिष्कुरुत यद्वयं कामयामहे ॥ (१०)

---

**प्रत्वक्षसः प्रतवसो विरप्शिनोऽनानता अविथुरा ऋजीषिणः ।**
**जुष्टतमासो नृतमासो अञ्जिभिर्व्यानज्रे के चिदुस्रा इव स्तृभिः ॥**

प्रत्यक्षसः[4] । प्रत्यन्तं[5] शत्रूणां तनूकर्तारः[6] प्रकृष्टबला[7] विरप्शिनः[8] शन्तवन्तः महन्ता मधु च[9] पठितम् । अप्रणता अवियुक्ता उदकवन्तः । यद्वा तृतीयसवनेऽन्वयादृजीषिणः[10] । नेतृतमाः आभरणैर्व्यानज्रे वितता भवन्ति । केचिद्रश्मय इव त्रिभिराच्छादनैः[11] ॥

[1] Read गूहता.

[2] Read यद्वयं.

[3] Here there is the fig 6 to mark the end of the sūkta.

[4] Read प्रत्वक्षसः

[5] Read अत्यन्तं.

[6] तारः: mostly worm-eaten.

[7] बला: completely eaten away by white ant.

[8] वि completely worm-eaten.

[9] Passage not clear. This must be three meanings of विरप्, the शिनः

[10] The letter ऋ completely worm-eaten.

[11] Read स्तृभिराच्छादनैः

प्रकर्षेण शत्रूणां तनूकर्तारः प्रकृष्टबलाः महान्तः अप्रणताः अनेकाकिनः । तृतीयसवनेऽन्वयादृजीषिणः पर्याप्ततमाः नेतृतमाः आभरणैर्व्यक्ता अभवन् । केचिद्रश्मय इव प्रभाभिः । इति मरुतो वदति ॥ (१)

**उपह्वरेषु यदचिध्वं ययिं वय इव मरुतः केन चित्पथा ।**
**श्चोतन्ति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते ॥**

उपह्वरेषु । समीपेषु यदचिध्वं कुरुथ ययिं मेघं पक्षिण इव मरुतः केनचित् पथा गच्छन्तः । तदानीं उपश्चोदन्ति मेघा युष्माकं रथेष्वनुषक्ताः । ते यूयं घृतमुंक्षत सितकं[1] मधुसदृशवर्णमर्चते मह्यम् ॥

यदा अचिध्वं सञ्चितमकुरुत मेघं पक्षिण इव मरुतः केनचित् पथा शीघ्रं गच्छन्तः तदानीं उपक्षरन्ति मेघा युष्माकं रथेषु स्थिताः । तथा सति उदकं सिञ्चत मधुसदृशवर्णं परिचरते ॥ (२)

**प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युञ्जते शुभे ।**
**ते क्रीळयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयन्त धूतयः ॥**

प्रैषाम् । प्रकर्षेण कम्पते मरुतामज्मेषु उत्क्षेपकेषु यामेषु गमनेषु विधुरेव स्त्री[2] । विधुरा स्त्री भवत्याकुला । व्यथते । यदमी युञ्जन्ति शुभे जलार्थम् । ते क्रीडनलशीलाः कम्पयितारः दीप्तर्ष्टयः स्वयमेवात्मनो महित्वं कथयन्ति । सूतयो[3] वृक्षादीस्थिरान् धून्वन्तः ॥

[1] Perhaps to read सिञ्चत.

[2] व and स्त्री completely worm-eaten. Only a conjecture.

[3] Read धूतयो.

प्रकर्षेण चलति मरुतां उत्क्षेपकेषु गमनेषु एकाकिनीव भूमिः । यदि खलु अमी युक्ता भवन्ति उदकार्थम् । ते क्रीडनशीलाः कम्पयितारः दीप्तायुधाः स्वयमेव माहात्म्यं कथयन्ति धून्वन्तः ॥ (३)

**स हि स्वसृत्पृषदश्वो युवा गणो३ऽया ईशानस्तविषीभिरावृतः ।**
**असि सत्य ऋणयावानेद्योऽस्या धियः प्राविताथा वृषा गणः ॥**

स हि । स हि स्वयमेव सर्ता वृषम्योश्वाशस्य[1] सः । युवा गण अया ईशानोऽस्य जलस्य वेशानो बलैरावृतः सोऽसि सत्यस्तोतृणामृतस्य[2] पृथक् कर्ता अनेद्योऽनिन्द्यः । सोऽयमस्य कर्मणः प्रकर्षेण रक्षिता । अपि च वर्षकाः ॥

स हि स्वयमेव सर्ता पृषदश्वस्तरुणो मरुद्गणः अनया ईशितव्यः । पृथिव्या ईशितव्य ईशानः । बलैरावृतोऽसि । सत्यकर्मा स्तोतॄणां ऋणं प्रतिगन्ता प्रशस्यः । अस्य कर्मणः प्रकर्षेण रक्षिता असौ वर्षिता च गणः ॥ (४)

**पितुः प्रत्नस्य जन्मना वदामसि सोमस्य जिह्वा प्र जिगाति चक्षसा ।**
**यदीमिन्द्रं शम्यृक्वाण आशतादिन्नामानि यज्ञियानि दधिरे ॥**

पितुः । पितुः प्रत्नस्य पूर्वकालीनस्य । जातत्वादेवं वदामः । सोमस्याभिषुतस्य चक्षुषसा[3] दर्शनेन वदन्तिगेच्छति[4] । यदीमिन्द्र[5] कर्माण्यृकाणा स्तुतिमन्तः प्रापुः । अनन्तरमेव यज्ञार्हाणि नामानि इन्द्रादमिलेभिरे[6] । तच्चैतन्मया पितृतः श्रुतमिति ॥

[1] Read पृषत्योऽश्वा यस्य.

[2] त in मृतस्य completely worm-eaten.

[3] Read चक्षसा.

[4] Read वदनं निर्गच्छति

[5] य completely worm-eaten.

[6] The आ mark of न्ना completely worm-eaten. Read इन्द्रादभिलेभिरे.

पितुः पुराणस्य स्तोत्रकुशलस्य सकाशात् जननेन वयमपि स्तोत्रकुशलाः स्तुमः। सोमस्य सुतस्य दर्शनेन मम जिह्वा स्तोत्रकामा निर्गच्छति। यदैनमिन्द्रं कर्मणि स्तोत्रवन्तो मरुतः व्याप्नुवन् अनन्तरमेव यज्ञियानि नामान्युदकानि प्रयच्छन्ति ॥ (९)

**श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः ।**
**ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ॥**

श्रियसे। श्रयणार्थमुदकं भानुभिः संमिमिक्षरे[1] समाददुः। ते रश्मिभिस्समं मिमिक्षरे[2]। ते ऋक्वभिः संमिमिक्षिरे इति भनूनां[3] विशेषणद्वयसमर्घ[4]। रश्मयो रशेबन्धनार्थमात्[5]। ऋक्वाणे[6] ऋचेः। आहर्तारो रसानाम्। सुखादयः खादिरायुधम्। ते शब्दवन्तः[7] इष्मिणः म + गतिः[8]। इष्मिणं र + षिणिन इति यास्कः[9]। अभीरवश्च भवन्ति। लभेयाहं मारुतं धामेति[10] ॥

[1] Read संमिमिक्षिरे.

[2] Read मिमिक्षिरे. Letters after समा are mostly worm-eaten. Difficult to decipher.

[3] Perhaps to read भानुना.

[4] Not clear.

[5] Read रशेर्बन्धनार्थात्.

[6] Read ऋक्वाण.

[7] Folio 62b ends here.

[8] After म, a letter worm-eaten. ओ marks clear. It is a conjunct consonant, with न as second.

[9] N. 4. 16. The edition of Nirukta has ईषणिन इति वैषणिन इति वार्षणिन इति वा.

[10] There is the figure 7 to mark the end of the Sūkta.

श्रयणायोदकं तेजोभिः संमिमिक्षिरे समादद्दुः । ते रश्मिभिर्बन्धकैः । ते रसाहरणशीलैर्भानुभिः शोभनखादियुक्ताः । तथा वाशीमन्तः । वाशीचायुधम् । गन्तारः अभीरवः लभेयाहं प्रियं मारुतं धाम । इति वर्षकामस्य सूक्तम् ॥ (६)

---

आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्यात ऋष्टिमद्भिरश्वपर्णैः ।
आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः ॥

आ विद्युन्मद्भिः । आयात दीप्तिमद्भिः मरुतः स्वञ्चनै रथैऋष्टिमद्भिरश्च[1] पक्षैः । आपतत च वृद्धतमेनास्मानन्नेन पक्षिण इव शीघ्रं कल्याणकर्माणः कल्याणप्रज्ञा वा ॥

आयातं दीप्तिमद्भिर्मरुतः स्वञ्चनैः रथैः ऋष्टिमद्भिः । आपतत वृद्धतमेनान्नेन अस्मान् पक्षिण इव सुकर्माणः ॥ (१)

तेऽरुणेभिर्वरमा पिशङ्गैः शुभे कं यान्ति रथतूर्भिरश्वैः ।
रुक्मो न चित्रः स्वधितीवान्पव्या रथस्य जङ्घनन्त भूम ॥

तेऽरुणैः[2] पिशङ्गै रथस्य प्रेरकेर्वरं[3] स्तोतारमायान्ति तस्य शुभे

[1] Read रथैर्ऋष्टिमद्भिश्च.

[2] Pratika not separately given.

[3] Read प्रेरकैर्वरं.

शोभां कर्तुम् । अदिचोदकं[1] दातुं अश्वे + ष्ठैः[2] । चित्र[3] आयुधवान्मरुद्गणः । त इमे रथचक्रेण वमन्ति[4] भूमिम् ॥

ते अरुणैः पिशङ्गैः रथस्य तारकैरश्वैः वर्षिष्ठं कञ्चन देशे आयान्ति उदकार्थम् । मणिरिव चित्रः आयुधवान् मरुद्गणः ते रथचक्रस्य धारया भूमिं घ्नन्ति मरुतः ॥ (२)

श्रिये कं वो अधि तनूषु वाशीर्मेधा वना न कृणवन्त ऊर्ध्वा ।
युष्मभ्यं कं मरुतः सुजातास्तुविद्युम्नासो धनयन्ते अद्रिम् ॥

श्रिये । श्रिये कं शोभार्थं वोऽङ्गेषु वाशीर्निहिता भवति । आयुधमाराख्यं[5] मेधा यज्ञानमी वृक्षानिवोर्ध्वान् कृण्वन्ति । युष्मभ्यं कर्मकुरुतः[6] शोभनजनना बहुधना आढ्या धनयन्ति निदधत्यभिषवाय ग्रावाणम् ॥

शोभनार्थं भवति वः अङ्गेषु वाशीः । यज्ञान् वनानीव मरुतः ऊर्ध्वान् कृण्वन्ति । युष्मभ्यं मरुतः सुजाताः बहुधनाः कं ग्रावाणमभिषवाय संचिन्वन्ति ॥ (३)

अहानि गृध्राः पर्या व आगुरिमां धियं वार्कार्यां च देवीम् ।
ब्रह्म कृण्वन्तो गोतमासो अर्कैरूर्ध्वं नुनुद्र उत्सधिं पिबध्यै ॥

[1] Read अपिवोदकं.

[2] After अश्वे one letter mostly worm-eaten. It has र as second element. Looks like श्र. ष्ठै is clear. Visarga lost. Perhaps to read अश्वैः श्रेष्ठैः

[3] रुक्मो न not commented.

[4] म completely lost.

[5] The name of the weapon not clear. Perhaps to read आत्मीयम्.

[6] Read कं मरुतः

अहिहानि[1] । अहानि मृषितृषिताः[2] सर्वाण्येव युष्मान् पर्यागुः । इदं च कर्मादतैः[3] ऋत्विग्भिः कर्तव्यं दीप्तमकुर्वन् । कर्म कृण्वन्तो गोतमासः स्तोत्रैः सहोत्क्षिप्तवन्तः कूपं पातुमुदकम् । स्तोतृभिरिभितत्कृतं[4] भवति यत् स्तुत्यैः कृतं भवति ॥

अहानि तृषिताः सर्वाण्येव गोतमा युष्मान् पर्यागुः । इदं कर्म च दैवं वृतैर्ऋत्विग्भिः कर्तव्यं अकुर्वन् । कर्म कुर्वन्तः गोतमाः ऊर्ध्वमुत्क्षिप्तवन्तः स्तौत्रैः उत्सनिधानं कूपं पानाय ॥ (४)

**एतत्त्यन्न योजनमचेति सस्वर्ह यन्मरुतो गोतमो वः ।**
**पश्यन् हिरण्यचक्रानयोदंष्ट्रान् विधावतो वराहून् ॥**

एतत् । एतद्योजनमेतत् सूक्तं त्यदिव ज्ञायते नान्यदस्त्यस्योपमानम् । सस्वर्ह उच्चारितवान्[5] यन्मरुतो गोतमो युष्माकम् । पश्यन् हिरण्मयरथ-चक्रादयोदंष्ट्रान्[6] दंष्ट्रदशनान् ऋष्टयो[7] विधावतो वनाहून्मरुतः[8] । वरं ह्वानं येषां ते वराहवः । यद्वा वारकं ये आप्नन्ति[9] । निरुक्तं—च मार्यमिति

[1] Read अहानि.

[2] मृषि not wanted before तृषिताः

[3] Perhaps to read कर्मादतैः

[4] To read स्तोतृभिरभिसत्कृतं.

[5] र्ह and उ completely worm-eaten.

[6] Read हिरण्मयरथचक्रानयोदंष्ट्रान्.

[7] This word seems unwanted.

[8] Read वराहून् मरुतः

[9] Read आप्नुवन्ति.

का देवगणा वा उच्यन्ते इति[1] । पश्यन् हिरण्यचक्रानिति पादान्ते च्छान्दोऽनुक्रमण्यामुक्तमस्माभिरिति[2] ॥

एतत् स्तोत्रसंघटनं मया कृतं एतदिव ज्ञायते । नान्यदस्त्यस्योपमानम् । प्रकाशितवान् गोतमो युष्माकं यत् मरुतः । पश्यन् हिरण्यचक्रान् अयोदंष्ट्रान् विधावतः वराहून् उदारान् भवतां रथान् । घनं रथेषु तिष्ठति (५)

**एषा स्या वो मरुतोऽनुभर्त्री प्रति ष्टोभति वाघतो न वाणी ।**
**अस्तोभयद्वृथासामनु स्वधां गभस्त्योः ॥**

एषा । सैषा मदीया मरुतो युष्माननु ह्रियमाणा प्रतिष्टोभवति[3] स्तौति । वाघतः स्तोतुरिदानीम् । संप्रत्यर्थीयो नकारः । वाश्री[4] अस्तौदानायांसेन[5] आभिर्ऋग्भिरस्माकं गभस्त्योर्मरुद्भिर्दत्तां[6] स्वधामन्विति[7] ॥

सैषा मदीया वाणी मरुतः भवद्भ्यो हविषां अनुभर्त्री युष्मान् प्रतिष्टोभति यथा ऋत्विजः । हस्तयोः अन्नं दत्वा तदनन्तरमेवानायासेन आभिः स्तुतिभिः मरुद्गणो गोतमं अस्तोभयम् तेनान्नेन । इत्यन्नकामस्य स्तुतिः ॥ (६)

---

[1] N. 5. 4. Read निरुक्तं च माध्यमका देवगणा वा उच्यन्ते.

[2] Read छन्दो.

[3] Read प्रतिष्टोभति.

[4] Read वाणी.

[5] Read अस्तौदनायासेन.

[6] Folio 63*a* ends with गभस्त्यो.

[7] Here there is the fig. 8 to mark the end of the sūkta.

**आ नो॑ भ॒द्राः क्रत॑वो यन्तु वि॒श्वतोऽद॑ब्धासो॒ अप॑रीतास उ॒द्भिदः॑ ।**
**दे॒वा नो॒ यथा॒ सद॒मिद्वृ॒धे अस॒न्नप्रा॑युवो रक्षि॒तारो॑ दि॒वे दि॑वे ॥**

आनः । आयन्त्वस्मान् भजनीयान्[1] यस्माज्ञास्सर्वतोऽसुरैरहिंसा[2] अपरिवृताश्च शत्रुभिः सपत्नानामुद्भेत्तारः । देवा अस्माकं दैवा[3] वर्धनाय स्युरभप्रगन्ता + + + + न्यहनि[4] ॥

आयन्त्वस्मान् सर्वतो भजनीयानि कर्माणि असुरैरहिंसितानि अपरिवृतानि च फलोद्भेदनानि । देवा यथास्माकं सदैव वर्धनाय स्युः अप्रगच्छन्तो रक्षितारश्च अहन्यहनि ॥ (१)

**दे॒वानां॑ भ॒द्रा सु॑म॒तिर्ऋ॑जूय॒तां दे॒वानां॑ रा॒तिर॒भि नो॒ नि व॑र्तताम् ।**
**दे॒वानां॑ स॒ख्यमुप॑ सेदिमा व॒यं दे॒वा न॒ आयुः॒ प्र ति॑रन्तु जी॒वसे॑ ॥**

देवानाम् । देवानां भजनीया सुमच्छेजुमिच्छताम्[5] । देवानां दानमस्मानभिवर्तताम । देवानां सख्यमुपगच्छाम वयम् । देवा न आयुर्वर्धयन्तु जीवनाय ॥

देवानां भजनीया सुमतिः ऋजुमिच्छताम् । देवानां दानमस्मानभिवर्तताम् । देवानां सख्यमुपगच्छेम वयम् । देवा न आयुः वर्धयन्तु जीवनाय ॥ (२)

[1] Read भजनीयाः

[2] Read यज्ञाः सर्वतोऽसुरैरहिंसिताः

[3] Not wanted.

[4] After स्युरभप्रगन्ता the leaf is completely worm-eaten. The next letter must be रो. Read स्युरप्रगन्तारोरक्षितारोहन्यहनि. The word रक्षितारो can be made out from the small bits.

[5] Read सुमतिर्ऋजुमिच्छतां.

**तान् पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ।**
**अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥**

द्वृचस्पष्टार्थ उत्तरः । निषदिति[1] वाङ्नाम । अस्रियमक्षीणम् । मरुतां[2] गणम् ॥

तान् पूर्वया वाचा ह्वयामो वयम् । भगादीन् दक्षं चाक्षयम् । सरस्वती च अस्माकं सुभगा सुखं करोतु ॥ (३)

**तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।**
**तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥**

तन्मयोभु भेषजमिति । यद्वा तस्य प्रसिद्धं सुखस्य भावकं भेषजमित्यर्थः । तदश्विना शृणुतमिति यदस्माकमपेक्षितं भेषजं तच्छृणुतम् ॥

तन्नो वातः सुखस्य भावयितृ आत्मीयं भेषजं वातु । तन्माता पृथिवी । तत् पिता द्यौः । तद्ग्रावाणः सोमस्य सोतारः सुखस्य भावयितारः । तदश्विनौ युवामपि धिषणार्हौ स्तुत्यर्हौ शृणुतम् ॥ (४)

**तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयम् ।**
**पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥**

तमिति पूर्वार्धं ऐन्द्रः । उत्तरार्धः पौष्णः[3] ॥

[1] Read निविदिति.

[2] म completely worm-eaten.

[3] Only two were stated as स्पष्टार्थ above.

तमीश्वरं जङ्गमस्य स्थावरस्य च पालयितारं कर्मणः प्रीणयितारं रक्षणाय ह्वयामो वयम्। पूषा अस्माकं धनानां भवति यथा वर्धनाय रक्षोभ्यो रक्षिता पालकः अहिंसितः अविनाशाय ॥ (५)

**स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।**
**स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥**

स्वस्ति नः । पौष्णः[1] । स्वस्त्यस्माकमिन्द्रो वृद्धान्नमः[2] । स्वस्ति नः पूषा विश्वधनः स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । यद्रथस्यारिष्टा नेमिः । स्वस्त्यस्मभ्यं बृहस्पतिर्दधादि उ[3] ॥

स्वस्त्यस्माकमिन्द्रो वृद्धान्नः । स्वस्ति नः पूषा विश्वधनः । स्वस्ति नः तार्क्ष्यश्च अहिंसितायुधः । स्वस्त्यस्माकं बृहस्पतिश्च दधातु ॥ (६)

**पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ।**
**अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह ॥**

पृषदश्वाः । सैषा माआति[4] । पृषदश्वांरुतो[5] गोमातरः यो[6] शुभं यान्ति । यज्ञेषु गन्तारः । अग्निजिह्वा अग्नेर्जिह्वास्थानीयाः । मन्तारस्सूर्यदर्शना यिश्वेऽस्मान्[7] देवा रक्षणेन सह गच्छन्त्विह ॥

[1] Perhaps to read प्रौष्णी.

[2] Read वृद्धान्नः

[3] Read बृहस्पतिर्दधातु.

[4] Read मारुती.

[5] Read पृषदश्वा मरुतो.

[6] Read ये.

[7] Read विश्वेऽस्मान्.

पृषद्वर्णाश्वा मरुतः गोमातरः उदकं प्रति गन्तारः यज्ञेषु गमनशीलाः अग्न्यास्याः मन्तारः सुवीर्यदर्शनाः विश्वे अस्मान् देवा रक्षणेन सहागच्छन्त्विह ॥ (७)

**भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।**
**स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥**

भद्रम् । भद्रं[1] कर्णेभिः शृणुयाम देव[2] । भद्रं पश्येमाक्षभिर्यजनीयाः । अक्ष्यक्तेरनक्तेर्वा चष्टेरिति[3] यास्कः । स्थिरैरङ्गैर्युक्ताः । देवांश्च नृभिश्च[4] युक्ताः । तनवोङ्गानाःमङ्गानि[5] । अपि वा पुत्रां[6] । व्यश्याः दैवैर्निहितं[7] शतसंख्याकं यदायः[8] ॥

भद्रं कर्णेभिः शृणुयाम देवाः । भद्रमेव पश्येमाक्षभिर्यष्टव्याः । स्थिरैरङ्गैः तुष्टुवांसः तनूभिश्च युक्ता व्यश्याम देवैर्निहितं शतसंख्याकमायुः ॥ (८)

**शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।**
**पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥**

[1] Before this भद्रं a letter, perhaps द्र written and completely scored off.

[2] Read देवाः

[3] N. 1. 9. The passage in printed edition is अक्षि चष्टेः । अनक्तेरिति आग्रायणः

[4] Perhaps to read देवांस्तनूभिश्च. The word तुष्टुवांसः not explained.

[5] Read तनवोऽङ्गानि.

[6] Read पुत्राः

[7] Read देवैर्निहितं. Between दे and वै a letter written and scored; perhaps व.

[8] Read यदायुः

शतमित् । अन्तिशब्दोऽवसानपरः[1] । शतं खलु शरदोऽन्ततो भवन्ति देवा मनुष्याणामायुः । यस्यां वेलायामस्माकं भवितव्या जरा यूयं सृष्टिकाले कृतवन्तः । पुत्रा यस्या[2] वेलायां पितरो रक्षितारो भवन्ति तस्मादुत्तरे वयसि पुत्रानुपजीवति—इति[3] ब्राह्मणम् । तस्यायुषो[4] गमनात् पूर्वं मध्ये मास्माकमायुर्हिंसीध्वम् ॥

शतमेव शरद अन्ततो भवति देवा मनुष्याणामायुः यत्रास्माकं कृतवन्तो यूयं अङ्गानां जरां कल्पितवन्तः । पुत्रा एव रक्षितारो यत्र भवन्ति तदायुः गन्तोर्मध्ये मास्मान् हिंसिध्वम् । इत्यायुष आशासनम् ॥ (९)

**अदि॑ति॒र्द्यौरदि॑तिर॒न्तरि॑क्ष॒मदि॑तिर्मा॒ता स पि॒ता स पु॒त्रः ।**
**विश्वे॑ दे॒वा अदि॑तिः॒ पञ्च॒ जना॒ अदि॑तिर्जा॒तमदि॑ति॒र्जनि॑त्वम् ॥**

अदितिः । सैषादितिदेवत्याः[5] । निरुक्तं च—दितेर्विभूतिमाचष्टे । एतान्याःन्यानीति च[6] । अत्र ब्राह्मणम्—सर्वेषां वा एतत् पञ्चजनाना-मुदक्थं दैवमनुष्याणां[7] गन्धर्वाप्सरसां सर्पाणां च पितृणां च—इति[8] । तत्र गन्धर्वाप्सरसामैक्यात् पञ्चनत्वम्[9] । अत्र निरुक्ताम्[10]—गन्धर्वाः

[1] Written अन्तिशब्दोवानसरः सानपरः. Then वानसरः deleted, with dots above and सा written above स so deleted.

[2] Read यस्यां.

[3] Not traced.

[4] Folio 63*b* ends here.

[5] Read सैषादितिदेवत्या.

[6] Read अदितेर्विभूतिमाचष्टे । एनान्यदीनानीति वा 4. 23.

[7] A. 13. 3-31.

[8] Read पञ्चजनानामुक्थं देवमनुष्याणां.

[9] Read पञ्चत्वम्

[10] Read निरुक्तम्.

पितरो देवा असुरा रक्षांसीति एके । चत्वारो वर्णा निषादपञ्चमा इत्यौपमन्यवः—इति[1] ॥

अदितिरेव सर्वमित्यदितेर्विभूतिमाचष्टे । अदितिरेव जातम् । अदितिरेव जनिष्यमाणम् । सा च प्रयच्छतायुः ॥ (१०)

---

ऋजुनीती नो वरुणो मित्रो नयतु विद्वान् ।
अर्यमा देवैः सजोषाः ॥

ऋजुनीतिरकुटिलनयनं[2] साधकनयनमिति यास्कः[3] । तेनास्मान् वरुणादयो नयन्तु सजोषास्सहित[4] इति ॥

ऋजुनयनेनास्मान् नयनप्रकारज्ञा वरुणादयो नयन्तु । अर्यमा च देवैस्सहितः ॥ (१)

ते हि वस्वो वसवानास्ते अप्रमूरा महोभिः ।
व्रता रक्षन्ते विश्वाहा ॥

[1] N. 3. 8. Here there is the figure 9 to mark the end of the sūkta.

[2] There is no pratika separately given.

[3] Not in N. 6. 21. where the word occurs.

[4] देवैः not explained. Read सजोषास्सहिता.

ते हि[1] वसुनो वासकाः । ते अप्रमूढाः तेजोभिर्मद्भिर्वा[2] कर्मभिः । स्वानि स्वानि स्वानि[3] कर्माणि सदा रक्षन्ते जगद्विषयाणीति[4] ॥

ते हि वसून्याच्छादयन्तः । ते अप्रमूढाः तेजोभिः स्वानि स्वानि यमनादीनि कर्माणि सर्वदा रक्षन्ते ॥ (२)

**ते अस्मभ्यं शर्म यंसन्नमृता मर्त्येभ्यः ।**
**बाधमाना अप द्विषः ॥**

ते । तेऽस्मभ्यं सुते गयच्छन्तु[5] अमृताः सन्तो मर्त्येभ्यः । अपबधमाना[6] द्विषः ॥

ते अस्मभ्यं सुखं प्रयच्छन्तु अमृता मर्त्येभ्यः द्वेष्टॄनपबाधमानाः ॥ (३)

**वि नः पथः सुविताय चियन्त्विन्द्रो मरुतः ।**
**पूषा भगो वन्द्यासः ॥**

विनः । विचिन्वन्तु मार्गानस्माकं सुवितायेन्द्रादयो वन्दितव्याः[7] । भद्रं सुवितमिति ॥

विचिन्वन्तु मार्गान् अस्माकमभ्युदयाय इन्द्रादयो वन्दितव्याः ॥ (४)

[1] Pratika not separately given.
[2] Read तेजोभिर्महद्भिर्वा.
[3] Only two स्वानि wanted ; one extra.
[4] ज and the न्ते jumbled together.
[5] Read सुखं यच्छन्तु for सुते गयच्छन्तु.
[6] Read अपबाधमाना.
[7] व्या looks more like भा.

**उत नो धियो गोअग्राः पूषन्विष्णवेवयावः ।**
**कर्ता नः स्वस्तिमतः ॥**

उत नः । अपिचाकस्माकं[1] कर्माणि पश्वग्राणि कुरुत पूषादयो न मरुद्गणः । एवयावः एवं यातीति । मरुतश्चास्मान् स्वस्तिमतः ॥

अपि चास्माकं कर्माणि पश्वग्राणि कुरुत पूषादयः । कुरुत चास्मान् अविनाशवतः ॥ (५)

**मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।**
**माध्वीर्नः सन्त्वोषधीः ॥**

मधु वाताः यः मं[2] ऋतं ब्रह्मेच्छति स ऋतायत् । तस्मै सर्वैर्देवा[3] मधु क्षरन्तीति तृचस्यार्थः ॥

वाता मधु क्षरन्त्यस्मै सत्यमिच्छति यो नरः ।
तद्धि सूर्यसमं ज्योतिस्तदिच्छन्निह सिध्यति ॥
यत् संभरन्ति सरघाः पुष्पेभ्यस्तन्मधु स्मृतम् ।
अस्मै सत्यविदे सर्वे तत् क्षरन्तीति कीर्त्यते ॥

मधुमत्य ओषधयश्चास्माकं भवन्तु ॥ (६)

**मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः ।**
**मधु द्यौरस्तु नः पिता ॥**

[1] Read अपिचास्माकं.

[2] मं not wanted.

[3] Read सर्वे देवाः

तत्र—नक्तउरतोषसि[1]—इत्यध्वर्यवः पठन्ति[2]। अस्माकं तु नक्तमुमोषध[3] इति प्रथमान्तः। पार्थिवं रजः पार्थिवो लोकः ॥

रात्रौ मधु भवन्त्वस्माकम्। अपि वा उषसश्च। मधुमान् भवतु पार्थिवो लोकः। मधुमती द्यौरस्तु अस्माकं पिता ॥ (७)

**मधु॑मान्नो॒ वन॒स्पति॒र्मधु॑माँ अस्तु॒ सूर्यः॑।**
**माध्वी॒र्गावो॑ भवन्तु नः ॥**

मधुमानस्माकं वनस्पतिर्वृक्षाधिपतिः सूर्यश्च। मधुमत्यो गावश्च भवन्तु ॥

**शं नो॑ मि॒त्रः शं वरु॑णः॒ शं नो॑ भवत्वर्य॒मा।**
**शं न॒ इन्द्रो॒ बृह॒स्पति॒ः शं नो॒ विष्णु॑रुरुक्र॒मः ॥**

शन्नः। उपनिषत्सूभयतोऽन्यतरतो वा शान्तिः क्रियते। महता गृहीतेनार्थेन युक्तस्तिष्ठेदिति। इह च—मधुवाता ऋतायते—इत्युपनिषत्[4]। तस्या ग्रहणार्था मुख्या ऋचः। उत्तमा शान्त्यर्थेति[5] ॥

अस्माकमेते शंकरा भवन्तु विष्णुश्च उरुक्रमणः। ऋतमिच्छतोऽभ्युदयं तृचेनोपदिदिक्षुरुभयतः शान्तिं च करोति ॥ (९)

---

[1] Read नक्तमुतोषसि.

[2] T. 5. 4. 9. 3.

[3] Read नक्तमुतोषस.

[4] Sixth verse here.

[5] Here there is the figure 10 to mark the end of the sūkta.

**त्वं सोम॒ प्र चि॑कितो मनी॒षा त्वं रजि॑ष्ठ॒मनु॑ नेषि॒ पन्था॑म् ।**
**तव॒ प्रणी॑ती पि॒तरो॑ न इन्दो दे॒वेषु॒ रत्न॑मभजन्त॒ धीरा॑: ॥**

त्वं सोम । त्वं सोम प्रज्ञातः प्रज्ञाया[1] । त्वमृजुतममनुनयसि पन्थानम् । तव प्रणयने पितरोऽस्माकमिन्दो देवेभ्यो धनमभजन्त धीमन्तः ॥

त्वं सोम प्रकर्षेण जानासि प्रज्ञया । त्वमृजुतमं पन्थानमनुनयसि । तव प्रणयनेन पितरोऽस्माकमिन्दो देवेषु रत्नमभजन्त पितृयज्ञे प्राज्ञा अङ्गिरसः ॥ (१)

**त्वं सो॑म॒ क्रतु॑भिः सु॒क्रतु॑र्भू॒स्त्वं दक्षै॑: सु॒दक्षो॑ वि॒श्ववे॑दाः ।**
**त्वं वृषा॑ वृष॒त्वेभि॑र्महि॒त्वा द्यु॒म्नेभि॑र्द्यु॒म्न्य॑भवो नृ॒चक्षा॑: ॥**

त्वं सोम[2] कर्मभिस्सुकर्माभावः । त्वं बलैः सुबलो विश्वधनः[3] । त्वं वृषा वर्षणीयैरघैर्मत्वेन[4] च युक्तोऽन्नैरन्नवानभवो[5] नृणां द्रष्टा ॥

त्वं सोम कर्मभिः सुकर्माभवः । त्वं बलैः सुबलो विश्वधनः । त्वं वर्षिता वर्षितृत्वैः माहात्म्येन । यशोभिः यशस्वी अभवः मनुष्याणां द्रष्टा ॥ (२)

**राज्ञो॒ नु ते॒ वरु॑णस्य व्र॒तानि॑ बृ॒हद्ग॑भी॒रं तव॑ सोम॒ धाम॑ ।**
**शुचि॒ष्ट्वम॑सि प्रि॒यो न मि॒त्रो द॒क्षाय्यो॑ अर्य॒मेवा॑सि सोम ॥**

[1] Read प्रज्ञया.

[2] Pratika not separately given.

[3] विश्व ends the line; धन begins in the next, which is the last line, more than an inch from the margin as the end of the leaf is narrow.

[4] Read वर्षणीयैमहत्वेन.

[5] Read युक्तोऽन्नैरन्नवानभवो,

राज्ञः । राज्ञ इव ते वरुणस्य कर्माणि । बृहत् गभीरं तव सोम तेजः । शुचिस्वमसि[1] प्रिय इव मित्रो दक्षाय्यो वर्धकश्चासि[2] स्तोतृणामध्यमेव[3] सोम ॥

राज्ञ इव ते वरुणस्य कर्माणि तवापि तद्वदहिंसितानि । बृहच्च ते गम्भीरं शरीरम् । शुचिस्त्वमसि प्रियमिव च मित्रम् । वर्धयितासि अर्यमेव सोम । अपिवा पूजनीयः ॥ (३)

**या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु ।**
**तेभिर्नो विश्वैः सुमना अहेळन् राजन्त्सोम प्रति हव्या गृभाय ॥**

या ते । यानि तव धामानि द्युप्रभृतिषु विष्ठि[4] तैर्हुतानि हवींषि प्रतिगृह्याण । देवाः सर्वाणि भूतानि स्वैः स्वैर्धामभिर्व्याप्य तिष्ठन्ति । तेषां यज्ञेन प्रीतिः । अयाडग्निरग्नेः प्रिया धामानि[5] इति[6] चानुकीर्तननिगतः ॥

यानि ते शरीराणि दिवि यानि पृथिव्यां यानि च पर्वतादिषु तैरस्माकं सर्वैः सुमनाः अक्रुध्यन् राजन् सोम प्रतिगृह्याण हव्यानि । बहूनि धामानि देवानां भवन्ति यैः तत्र तत्र हविर्गृह्णन्ति ॥ (४)

**त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा ।**
**त्वं भद्रो असि क्रतुः ॥**

[1] Read शुचिस्त्वमसि.

[2] Folio 64*a* ends with वर्धकश्चा.

[3] Read स्तोतृणामर्यमेव.

[4] Word uncertain. It ought to be तिष्ठन्ति or some such word.

[5] The whole portion from अया mostly worm-eaten. धामानी is completely lost. This ends a line. ति चानु is clear in the next line.

[6] M. S. 4. 13. 7.

त्वम् । त्वं सोमासि ब्राह्मणानां पतिः । त्वं राजापि च शत्रुहा । त्वं भजनीयश्चासि सुयज्ञः ॥

त्वं सोमासि ब्राह्मणानां पतिः । त्वं राजा । अपि च शत्रुहा । त्वं भजनीयश्चासि कर्ता ॥ (५)

**त्वं च॑ सोम नो॒ वशो॑ जी॒वातुं॒ न म॑रामहे ।**
**प्रि॒यस्तो॑त्रो॒वन॒स्पतिः॑ ॥**

त्वं च । अश्चेत्[1] सोमास्मान् कामयेथाः जीवितं न वयं मरामहे । प्रियस्तोत्रो वनानां पालयिता । सोमेन ह्याप्यायितानि वनानीति ॥

त्वं चेत् सोमास्मान् कामयेथाः जीवयितुं न मरामहे प्रियस्तोत्रः वनानां पालयिता ॥ (६)

**त्वं सो॑म म॒हे भगं॒ त्वं यून॑ ऋताय॒ते ।**
**दक्षं॑ दधासि जी॒वसे॑ ॥**

त्वं सोम । त्वं सोम वृद्धाय यूने च यज्ञमिच्छते धनं दक्षं कार्य-समर्थं दधासि जीवनाय ॥

त्वं सोम वृद्धाय धनं दधासि । त्वं यूने च यज्ञमिच्छते । बलं च यच्छसि जीवनाय ॥ (७)

**त्वं नः॑ सोम वि॒श्वतो॒ रक्षा॑ राजन्नघाय॒तः ।**
**न रि॑ष्ये॒त्त्वावतः॒ सखा॑ ॥**

[1] Read त्वश्चेत्.

त्वं नः । त्वमस्मान् सोम विश्वतो राजन्नघमिच्छतो रक्ष । न विनश्येत् त्वत्सदृशस्य सखा ॥

त्वमस्मान् सोम सर्वतः पापमिच्छतः रक्ष । न विनष्टो भवति त्वत्सदृशस्य सखा ॥ (८)

**सोम यास्ते मयोभुवं ऊतयः सन्ति दाशुषे ।**
**ताभिर्नोऽविता भव ॥**

स्पष्ट उत्तरः तृचः ॥

सोम यानि तव सुखस्य भावयितृणि पालनानि भवन्ति यजमानाय तैर्भवास्माकं रक्षिता ॥ (९)

**इमं यज्ञमिदं वचो जुजुषाण उपागहि ।**
**सोम त्वं नो वृधे भव ॥**

इमं यज्ञमिदं च स्तोत्रं प्रीयमाणः आगच्छ । सोम त्वं अस्माकं वर्धनाय भव ॥ (१०)

**सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः ।**
**सुमृळीको न आ विश ॥**

सोम स्तुतिभिस्त्वां वयं वर्धयामः स्तोत्रविदः । सुष्ठु सुखयिता सन्नस्मान् आविश ॥ (११)

**गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः ।**
**सुमित्रः सोम नो भव ॥**

गयस्फानः । गयो धनं गायतेः । स्फानः स्फायतेर्वृध्यर्थात् । अपि बा गयो गच्छतेः । उक्तं च—गवा[1] न स्फावयिता प्रतारयितैधीत्येव तदाह—इति[2] । शिष्ट[3] स्पष्टमिति ॥

धनस्य वर्धयिता रक्षसां हन्ता धनानां लम्भयिता पुष्टेर्वर्धयिता कल्याणं मित्रं भव सोमास्माकम् । गयस्फानोऽमीवहेति गवां न स्फावयिता—इति तु ब्राह्मणम् ॥ (१२)

**सोम॑ रार॒न्धि नो॑ हृ॒दि गावो॒ न यव॑से॒ष्वा ।**
**मर्य॑ इव॒ स्व ओ॒क्ये॑ ॥**

सोमः । सोमा[4] रमस्वास्माकं हृदि गाव इव यवसेषु मर्त्य इव च स्वेहे[5] ॥

सोम रमस्वास्माकं हृदये गाव इव तृणेषु मनुष्य इव च स्वे गृहे ॥ (१३)

**यः सो॑म स॒ख्ये तव॑ रा॒रण॑द्दे॒व मर्त्यः॑ ।**
**तं दक्षः॑ सचते क॒विः ॥**

स्पष्टोत्तरा । दक्षः कविरिति पुत्राभिप्रायमिति ॥

यः सोम तव सख्ये रमते देव मनुष्यः तं समर्थः स्तोता सेवते स्तोतुम् ॥ (१४)

[1] Read गवां
[2] A. B. 1-13.
[3] Read शिष्टं.
[4] Read सोम. There is no need to take it as सोम आरमस्व.
[5] Read स्वे गृहे.

**उरुष्या णो अभिशस्तेः सोम नि पाह्यंहसः ।**
**सखा सुशेव एधि नः ॥**

ऊरुष्या । रक्षास्मानभिशंसितुः । सोम निपास्याहन्तुश्च[1] । सखा भव सुसखोऽस्माकम् । अमीवहा वास्तोष्पते—इत्यस्यां[2] सखा सुशेव एधि नः इति[3] न विसृजति । तत्र हि सुशेवत्वं विधेयम् । सूक्तवेषादिति[4] ॥

रक्षास्मानभिशंसनात् । सोम निरक्ष अस्मानाहन्तुः । सखा सुसुखो भव अस्माकम् ॥ (१५)

**आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् ।**
**भवा वाजस्य संगथे ॥**

आ प्यायस्य[5] । वृद्धो भव रस्से[6] संगच्छतां ते सर्वत एव वृष्ण्यम् । येनासौ वर्धते तद्वृष्ण्यम् । भव चास्माकमन्नस्य संगमनाय ॥

पूर्णो भव रसेन । संगच्छतां ते सर्वतः सोम वर्षणनिमित्तबन्धो द्रोणकलशं प्रति । भवान्नस्य संगमनाय ॥ (१६)

**आ प्यायस्व मदिन्तम सोम विश्वेभिरंशुभिः ।**
**भवा नः सुश्रवस्तमः सखा वृधे ॥**

[1] Read निपाह्याहन्तुश्च.

[2] R. V. 7. 55. 1.

[3] The third pāda in the above.

[4] Perhaps to read सूक्तशेषादिति.

[5] Read आप्यायस्व.

[6] Read रसैः

स्पष्टोत्तरा । अंशुभिरिति करणे तृतीया । अपि वा सर्वेभ्योऽशुभ्यः पयस्वेति[1] । अंशुर्लता । अंशुरंशुषे[2] । देवा सोमाप्यायतां[3]—इत्याप्यायनां[4] मन्त्रम् ॥

आप्यायय रसं सोम मादयितः विश्वाभिर्लताभिः । भवास्माकं स्वन्नतमः सखा वर्धनाय ॥ (१७)

**सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।**
**आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ॥**

सन्ते । संयन्तु तव पयंप्रभृति[5] । यः त्वमाप्यायमानो अमरणाय[6] सोम दिवि नभसि श्रवणीयानि वचांस्युत्तमानि कुरुष्वेति । देवं त्रातारमभिमातिषाहम्—इति[7] द्वितीयायां मनोदात्तहृष्टमिति[8] ॥

संयन्तु त्वत्तो रसाः । समेव यन्तु अन्नानि । संयन्तु वर्षणनिमित्तानि शत्रूणामभिभवितः । आप्यायमानः अमृतत्वाय सोम दिवि च अन्नान्यस्माकं उत्तमानि कृणुष्व । पीतसोमो हि न परत्र क्षुध्यति ॥ (१८)

[1] Perhaps to read आप्यायस्वेति.

[2] Not clear. Perhaps etymology of अंशु.

[3] Perhaps to read सोममाप्यायन्तां.

[4] Perhaps to read इत्याप्यायनं.

[5] Read पयः प्रभृति.

[6] अम ends the line. रणाय begins the next, which is the last line, nearly two inches from margin, as leaf is narrow at the end.

[7] R. V. 10. 128. 7.

[8] Passage not clear. It is about accent. In the present case, the accent is on षा. In 10. 128. 7 it is ह.

**या ते धामा॑नि ह॒विषा॒ यज॑न्ति॒ ता ते॒ विश्वा॑ परि॒भूर॑स्तु य॒ज्ञम् ।**
**ग॒य॒स्फानः॑ प्र॒तर॑णः सु॒वीरोऽवी॑रहा॒ प्र च॑रा सोम॒ दुर्यान् ॥**

या ते यानि तव याधामानि[1] हविषा[2] यजन्ति यजमानाः तनानि[3] तव विश्वानि परि + +[4] भवन्तु यज्ञम् । परिभूरित्यनेन सामानाधिकरण्य + + + + + + + वचनत्वमिति[5] सन्ति चैतादृशानि वाक्यानि ॥

यानि तव तेजांसि हविषा यजन्ति तानि तव विश्वानि भवन्तु सवनानि । तैः परिभूः अस्तु यज्ञम् । सोम इति परोक्षम् । गवां वर्धयिता प्रकर्षेण तारकः शोभनवीरः पुत्राणामहन्ता सन् प्रगच्छ गृहान् ॥ (१९)

**सोमो॑ धे॒नुं सोमो॒ अर्व॑न्तमा॒शुं सोमो॑ वी॒रं क॑र्म॒ण्यं॑ ददाति ।**
**सा॒द॒न्यं॑ वि॒द॒थ्यं॑ स॒भेयं॑ पितृ॒श्रव॑णं॒ यो ददा॑शदस्मै ॥**

अतिस्पष्टोत्तरा + + स्मै[6] सोमाय + दाति[7] सोम ईदृशं पुत्रं ददाति । सदन्यो गृहकार्यकुशलः । विदथ्यो यज्ञकुशलः । सभायां सा + + + + + + श्रावयति[8] यशसा स पितृश्रवण इति ॥

[1] Read धामानि.

[2] Folio 64*b* ends here.

[3] Read तानि.

[4] Two letters mostly worm-eaten after परि. They look like भूति. Perhaps to read only परिभूः

[5] This sheet is broken into two pieces and at the line of break, a portion is also missing which affects four lines. About seven letters are lost.

[6] Two letters missing at the end of the line. Or perhaps only यो. To read योऽस्मै.

[7] One letter missing.

[8] A few letters lost at the break in the middle. Perhaps to read सभायां साधुः सभेयः । पितॄन् श्रावयति. The letter ध after सा in the beginning of the break is partly visible.

सोमो धेनुं सोमः अश्वमाशुगन्तारं । सोमः पुत्रं कर्मणि समर्थं ददाति । गृहे शूरं यज्ञसभयोश्च यः स्वकीर्त्यात्मीयं पितरं अस्य पिता अयं इति श्रावयति तं ददाति यः हविः सोमाय ददाति तस्मै यजमानाय ॥ (२०)

**अषा॑ह्ळं यु॒त्सु पृत॑नासु॒ पप्रिं॑ स्व॒र्षाम॒प्सां वृ॒जन॑स्य गो॒पाम् ।**
**भ॒रे॒षु॒जां सु॑क्षि॒तिं सु॒श्रव॑सं॒ जय॑न्तं॒ त्वामनु॑ मदेम सोम ॥**

अषाळ्हम् । शत्रुभिरसोढुं[1] युद्धेषु । पृतनासु पूरम् । स्वर्गस्य दातारमपां दातारम् । वाग्बलस्य गोपायितारम् । संग्रामेषु प्रादुर्भवन्तं सुनिवासं सु + + + + + + मदेम[2] वयं स्तुमः सोम ॥

शत्रुभिरसोढुं युद्धेषु पृतनासु पालयितारं दिवः संभक्तारं अपां दातारं बलस्य गोपायितारं संग्रामेषु प्रादुर्भवन्तं सुनिवासं सुकीर्तिं जयन्तं त्वामनुमदेम स्तोत्रैः सोम ॥ (२१)

**त्वमि॒मा ओष॑धीः सोम॒ विश्वा॒स्त्वम॒पो अ॑जनय॒स्त्वं गाः ।**
**त्वमा त॑तन्थो॒र्व१॒॑न्तरि॑क्षं॒ त्वं ज्योति॑षा॒ वि तमो॑ ववर्थ ॥**

त्वमिमाः । त्वमिमा ओषधीस्सोम विश्वाः अजनयनंयः[3] । त्वमुदकारि[4] ॥ त्वं पशून् । त्वं विस्तारितवानसि । तेजसा विस्तीर्णमन्तरिक्षम् । त्वं ज्योतिषा नैशं तमो विरितवानिति[5] ॥

[1] Read शत्रुभिरसोढं.

[2] A few letters lost at the break in the middle. The first word must be सुकीर्तिम् । The rest must be जयन्तं त्वामनु explained. The last letter in the break seems to be नुः

[3] Read only अजनयः

[4] Read त्वमुदकानि.

[5] Read विनिवारितवानिति..

त्वमिमा ओषधीः सोम विश्वा अजनयः । त्वमुदकानि । त्वं पशून् । त्वं विस्तारितवानसि तेजसा विस्तीर्णमन्तरिक्षम् । त्वं ज्योतिषां नैशं तमः विनिवारितवानसि ॥ (२२)

**देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य ।**
**मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ॥**

दे + + + + + + + + प्रकृतिभूतम्[1] । तेनास्माकं देव सोम धनस्यांशमभियुध्य प्रेरय बलवन् । अपि वायोऽस्माकं धनं तप[2] भजने सवनः[3] तमभियुध्य । मा त्वां कश्चिदाततनत् हिनस्तु । यद्वा न निवारयतु । ईशिषे बलस्य उभयेभ्यो युध्यमानेभ्यः त्वमस्मभ्यमधिब्रूहि युद्धे इति[4] ॥

दीप्तेनास्माकं मनसा देव सोम धनस्य भागं बलवन्नभियुध्य । मा त्वा पर्येति कश्चित् । त्वं हि बलस्य ईशिषे । उभयेभ्यः परेभ्योऽस्मदीयेभ्यश्च गवामन्वेषणेऽस्मान् प्रकर्षेण जानीहि जेतव्यमस्मदर्थम् ॥ (२३)

---

**एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमञ्जते ।**
**निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यन्ति मातरः ॥**

एताः । निरुक्ते[5] । एतास्ता उषसः केतुमकृषत प्रज्ञानम् । एकस्या एव पूजार्थे बहुवचनम् । पूर्वे अर्धे अन्तरिक्षलोकस्य ममञ्जते

[1] A few letters lost at the break in the middle. The ए of वे after दे is retained.

[2] Not clear.

[3] Not clear.

[4] Here there is the figure 11 to mark the end of the Sūkta.

[5] This commentary is taken from N. 12. 7.

भानुम्[1] । निष्कृण्वाना आयुधानीव धृष्णवा[2] । निरित्येष समित्येतस्य स्थाने । एमीदेषान्निष्कृतं जारिणीव—इत्यपि निगमो भवति[3] । प्रतियन्ति[4] । गावो गमनात् । अरुषीरारोचनात् । मातरो भागो[5] निर्मात्र्यस्सूर्यस्येति । यवं[6] तु ब्रूमः—ता एता उषसं[7] केतुं रश्मिमकृण्वन् । तदेवोक्तम् । पूर्वे अर्धे अन्तरिक्षस्य प्राच्यं[8] भानुं दीप्तिमञ्जते तूकृथ्ये[9] मृदमिव । निष्कम्याण्वाना[10] आयुधानीव कोशाद्योद्धारः प्रतियन्ति गाव उषस आरोचमानाः सर्वस्य जनयित्र्य इति । अर्धे वीरस्य[11] शृतपाम्[12]—इत्यन्तोदात्तो बाधकवचन इति । संप्रविभाग[13]वचनश्चान्तोदात्त एव । अर्धं नार्धं बर्हिषः स्तृणीयात्[14]—इति ॥

ता एता उषसः प्रज्ञानमकृण्वन् पूर्वे अर्धे अन्तरिक्षलोकस्य प्राच्या दीप्तिमञ्जते कोशादायुधानि निष्कृण्वाना वीरा इव प्रतियन्ति गन्त्र्य आरोचमाना उषसो मातृस्थानीयाः । निरुक्तं च द्रष्टव्यम् ॥ (१)

[1] N. has भानुना.

[2] Read धृष्णवः

[3] R. V. 10. 34. 5.

[4] Perhaps to add one गावः after this word.

[5] To read गावो ?

[6] Read वयं.

[7] Read उषसः

[8] Read प्राच्यां.

[9] Word not clear ; no such simile in the text.

[10] Read निष्कृण्वाना.

[11] Folio 65*a* ends with वी.

[12] R. V. 7. 18. 16.

[13] प्रविभाग is enough.

[14] Not traced.

**उदंपप्तन्नरुणा भानवो वृथा स्वायुजो अरुंषीर्गा अंयुक्षत ।**
**अक्रंन्नुषासो वयुनांनि पूर्वथा रुशंन्तं भानुमरुंषीरशिश्रयुः ॥**

उदपप्तन् । उदपप्तन्नरुणा दीप्तयश्शि[1] स्वयमे + + + + + +
+ + + स्वरथे[2] योजयन् । अकुर्वन् उषसः पूर्वेष्विवाहस्सु प्रजानानि[3]
श्वेतं भानुमारोचमाना अशिश्रयुः ॥

उदपप्तन् अरुणा दीप्तयः अनायासेन स्वयमेव युज्यमाना आरोचमाना आत्मीया गाश्वाश्वभूता अयुक्षत रथे अयोजयन् । पूर्वेष्विवाहस्सु प्रज्ञानान्य· कृण्वन् । दीप्यमानमादित्यं उषसः श्रयन्ति आरोचमानाः ॥ (२)

**अर्चन्ति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः ।**
**इषं वहन्तीः सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते ॥**

अर्चन्ति । अर्चन्ति गच्छन्त्युषसः कर्मवन्तो योद्धार इवायुधैः ऋष्टिभिस्तेजोभि + + एकेन[4] चोद्योगेन पश्चिमाय[5] दिशः । अन्नं वहन्त्यः सुकृते सुदानाय विश्वमेव यजमान[6] सुन्वते ॥

अर्चन्ति उषसः आप इव प्रवेशनैः एकेन उद्योगेन आ पश्चिमायाः । अन्नं वहन्त्यः सुकर्मणे सुदानाय विश्वान्यत्र अपेक्षितानि च यजमानाय सुन्वते वहन्त्यः ॥ (३)

[1] Read दीप्तयः

[2] The end of the line completely worm-eaten and about 12 letters lost. It must be the meaning of वृथा स्वायुजो अरुषीर्गाः only the meaning of स्व is in the portion available.

[3] Read प्रज्ञानानि.

[4] The end of the line is partly worm-eaten and 2 letters lost.

[5] Read पश्चिमायाः

[6] Read यजमानाय.

**अधि पेशांसि वपते नृतूरिवापोर्णुते वक्ष उस्रेव बर्जहम् ।**
**ज्योतिर्विश्वस्मै भुवनाय कृण्वती गावो न व्रजं व्यु१षा आवर्तमः ॥**

अधि । अधिवपने आश्लिष्टानि तमांसि नापित इव केशान् । आत्मीयं वर्क्षः[1] तमसा तिरोहितमपोर्णुते गौरिवोधदोहनदशायाम् । ऋतूर्नापितो[2] नृणां तुर्विता । तुर्वेतिः छेदनार्थः । बर्जहमूधः पयसो हानात । + क्षीरं पिबतेरिति[3] । ज्योतिषुश्वस्मै[4] भुवनाय कृण्वन्ती[5] गाव इव प्रजम्[6] । उषास्तोमो[7] च्याव:[8] प्रेरितवती । धातोरानार[9] आगमः नतूपसगः । पदवेलायां न्याय्यः रेफः श्रुत इति । त्रिक्रमश्च तत एव प्रयुक्तः[10] । ततः परं रेफमिति । तथा आवरित्येतदपोद्यने पदमिति[11] ॥

अधिवपते आश्लिष्टानि तमांसि नापित इव केशान् । तमोभिराच्छादितं वक्षश्चापोर्णुते गौरिव ऊधो दोहाय । ज्योतिर्विश्वस्मै भुवनाय कृण्वती यथा गावो व्रजं व्यावृण्वन्ति एवं तमः स्वेन ज्योतिषा व्यावृणोति ॥ (४)

[1] Read वक्षः

[2] Read नृतुर्नापितो.

[3] Perhaps to add बर् before this etymology. There is the central break in the leaf and perhaps a letter is lost.

[4] Read ज्योतिर्विश्वस्मै.

[5] Read कृण्वती or कुर्वन्ती.

[6] Read व्रजम् .

[7] Read उषास्तमो.

[8] Read व्याव:

[9] Not clear.

[10] Not clear.

[11] The whole thing is about the padapāṭha आवरित्याव:

**प्रत्यर्ची रुशदस्या अदर्शि वि तिष्ठते बाधते कृष्णमभ्वम् ।
स्वरुं न पेशो विदथेष्वञ्जञ्चित्रं दिवो दुहिता भानुमश्रेत् ॥**

प्रत्यर्चिः । प्रत्यदर्श्यर्चिः[1] श्वेतमस्या वितिष्ठते[2] च दूरं बाधते च कृष्णं तमोऽभ्वं महत्स्वरुं[3] यूपमिवाज्येन यज्ञेष्वश्वि + + + + + + + + चित्रं[4] दिवो दुहिता भानुवश्रयति[5] ॥

उषसो दीप्तिः प्रतिदृश्यते श्वेता । विविधं च गच्छत्यर्चिः । बाधते च तमो महत् । स्वरुमिव रूपं गृहेषु अञ्जन्ती चित्रं दिवो दुहिता भानुमुदश्रेत यूपमिवोत्थापयति । स्वरूमान् यूपः स्वरूः ॥ (५)

**अतारिष्म तमसस्पारमस्योषा उच्छन्ती वयुना कृणोति ।
श्रिये छन्दो न स्मयते विभाती सुप्रतीका सौमनसायाजीगः ॥**

अतारिष्ठ । अतारिष्ठ[6] नैश्वस्यास्य[7] तमसः पारमुषा व्युच्छन्ती[8] प्रज्ञानानि करोति । छन्दो दीप्तिश्छादनात । संप्रत्यर्थीयो नकारः । श्रयणार्थे + · + + + + + रयती[9] व्युच्छन्ती यदिवा छन्दश्छन्दु-

[1] र्श्य completely worm-eaten. Only a guess.

[2] वि and ष्ठ completely worm-eaten.

[3] Read महत् । स्वरुं.

[4] A portion of the leaf is broken off and this affects this and the following lines. About ten letters are lost.

[5] Perhaps to read भानुमश्रयदिति.

[6] Read अतारिष्म in both the places.

[7] Read नैशस्यास्य.

[8] After पार the next letter clearly seen is च्छन्ती ; not certain if it is उच्छन्ती or व्युच्छन्ती.

[9] Again about 10 letters lost in the break. र्थे mostly lost.

रुपच्छन्दकः । स यथानं[1] लिप्सन्नाढ्यसमीपे स्मयते एवं स्मयते शोभनाङ्गिन[2] सोमनसाय[3] सर्वाणि भूतान्यजिगः प्रेरित + + + + + + न्द्रा[4]स्ततोऽन्तोदात्तः ॥

नैशस्य तमसः पारं वयं तीर्णवन्तः । उषाः व्युच्छन्ती प्रज्ञानानि च कृणोति । धनाश्रयणाय दरिद्रो यथाढ्याय आत्मच्छन्दं प्रकाशयति एवमियं हसति । शोभनावयवा सर्वेषां सौमनसाय तेजश्च गिरति ॥ (६)

**भास्वती नेत्री सूनृतानां दिवः स्तवे दुहिता गोतमेभिः ।**
**प्रजावतो नृवतो अश्वबुध्यानुषो गोअग्राँ उप मासि वाजान् ॥**

भास्वती । भास्वती प्रणेत्री शब्दानाम् । दिवो दुहिता[5] स्तुतासीत गोतमैः । प्रजायुक्तान्मनुष्ययुक्तानश्वैर्बोद्धव्यानुषो[6] गोमुखानुपमासि देहि वाजान् अन्नानि । यदाश्वबुध्योऽश्वबुध्नो मूलमिति[7] ॥

उषाः वचसां प्रणेत्री दिवो दुहिता स्तुता गोतमैः प्रजायुक्तान् दासयुक्तान् अश्वैर्बोद्धव्यान् उषः गोमुखान् उपकुरु वाजानन्नानि ॥ (७)

**उषस्तमश्यां यशसं सुवीरं दासप्रवर्गं रयिमश्वबुध्यम् ।**
**सुदंससा श्रवसा या विभासि वाजप्रसूता सुभगे बृहन्तम् ॥**

[1] Read यथा धनं.

[2] Perhaps to read शोभनाङ्गी. The न following has dot above to delete it.

[3] Read सौमनसाय.

[4] About ten letters lost in the break.

[5] Folio 65*b* ends here.

[6] श्व in श्वै completely worm-eaten.

[7] Passage not clear.

उषस्तम्[1] । उषस्तमहं प्राप्नुयां यशस्विनमन्नवन्तम् । सुवीरां दासान्तं[2] रयिमश्वमूलम्[3] । अश्वः श्रेष्ठो धनानाम् । दासोऽन्तिमः । सुकर्मणा श्रवणशब्देन सह या त्वं विभासि । प्रसूतान्ता[4] सुधने महान्तं रयिम् ॥

उषः तमहं प्राप्नुयां यशस्विनं सुवीरं प्रकृष्टदासगणं रयिमश्वबुध्न्यम् । सुकर्मणान्नेन या विभासि प्रसूतान्ना सुधने महान्तं यजमानं प्रति ॥ (८)

**विश्वा॑नि दे॒वी भुव॑नाभि॒चक्ष्या॑ प्रती॒ची चक्षु॑रुर्वि॒या वि भा॑ति ।**
**विश्वं॑ जी॒वं च॒रसे॑ बो॒धय॑न्ती॒ विश्व॑स्य॒ वाच॑मविदन्मना॒योः ॥**

विशानि[5] । देवी विश्वानि भुवनान्यभिचक्ष्या अभिपश्यन्ती प्रतीच्यभिमुखी चक्षुस्तेज उर्वीया + +[6] प्रकाशयति । विश्व[7] जीवं प्राणिनं चरणाय बोधयन्ती विश्वस्य मनस्विनो लभत वाचम् । एषा हि सूनृतावती ॥

विश्वानि भुवनानि उषाः चक्षुषो दर्शयित्वा प्राणिनामभिमुखमागच्छन्ती बृहत्तेजः प्रकाशयति । विश्वं प्राणिनं चरणाय बोधयन्ती विश्वस्य मननशीलस्य प्राणिनो वाचमलम्भयत् ॥ (९)

[1] ष completely worm-eaten

[2] Read सुवीरं दासवन्तं.

[3] श्व completely worm-eaten. Only a guess.

[4] Read प्रसूतान्ना.

[5] Read विश्वानि.

[6] Read उर्विया । Then two letters worm-eaten. The first is उ. The next may be रु.

[7] Read विश्वं.

**पुनःपुनर्जायमाना पुराणी समानं वर्णमभि शुम्भमाना ।**
**श्वघ्नीव कृत्नुर्विज आमिनाना मर्तस्य देवी जरयन्त्यायुः ॥**

पुनः पुनः । अन्वहं जायमाना प्रत्ना समानमेव वर्णमभ्येत्येकरूपाः[1] । श्वधव्यायस्त्रा[2] कर्तुमकर्तनशीलेच[3] विजश्चलतः पक्षिणः आमिनाना हिंसन्ती मर्तस्य देवी जनयन्तीति जीवितम्[4] ॥

अन्वहं जायमाना प्रत्ना समानमेव वर्णं अभ्येति शोभमाना । लुब्धकस्त्रीव कर्तनशीला चलतः पक्षिणो हिंसन्ती मनुष्यस्य देवी जरयन्ती जीवितम् । उत्तरत्र संबन्धः ॥ (१०)

**व्यूर्ण्वती दिवो अन्ताँ अबोध्यप स्वसारं सनुतर्युयोति ।**
**प्रमिनती मनुष्या युगानि योषा जारस्य चक्षसा वि भाति ॥**

व्यूर्ण्वती । विवृतान् कुर्वाणा नभसः पर्यन्तांस्तमसा तिरोहितान् प्रज्ञातासीत । अपयुयोत्यपगमयति स्वसारं निशाशमसनतः[5] अन्तर्हिते देशे । प्रकर्षेण हिंसन्ती मानुषाणि युगानि योषादित्यस्य तेजसा सह विभाति ॥

विविधं छादयन्ती द्युलोकस्य पर्यन्तान् प्रादुरासीत् । स्वसारं च रात्रिमन्तर्हितां अपयुयोति अपगमयति । प्रहिंसन्ती मनुष्याणां परिच्छेदकानि अहोरात्राणि योषा जरयितुरादित्यस्य तेजसा संप्रकाशयति ॥ (११)

[1] Visarga is not wanted.
[2] To read श्वघ्नी व्याधस्त्री or श्वधव्याधस्त्री.
[3] Read कृत्नुः कर्तनशीलेव.
[4] Read जनयन्ती जीवितमिति.
[5] Read निशां सनुतः

पशून्न चित्रा सुभगा प्रथाना सिन्धुर्न क्षोद उर्विया व्यश्वैत् ।
अमिनती दैव्यानि व्रतानि सूर्यस्य चेति रश्मिभिर्दृशाना ॥

पशून् । पशूनिव चित्रा सुधना विस्तारयन्ती तेजांसि स्यन्दमानमिवोदकमुर्विया महाविषा व्यश्वैत्[1] । अहिंसन्तीं[2] दैव्यानि व्रतानि वज्ञान् सूर्यस्य ज्ञायते रश्मिभिस्सह दृश्यमाना ॥

पशूनिव चित्रा सुधना विस्तारयन्ती तेजांसि नदी इवोदकं उरुत्वेन भासं वर्धयति । दैव्यानि कर्माणि अहिंसन्ती । रात्रिर्हि यज्ञान् हिनस्ति । नैवमहः । सूर्यस्य रश्मिभिः सह विज्ञायते दृश्यमाना ॥ (१२)

उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति ।
येन तोकं च तनयं च धामहे ॥

उषस्तत् । निरुक्तम्[3] । उषस्तश्चित्रं[4] चायनीयं धनमाहरास्मभ्यं अन्नवति येन पुत्रं च पौत्रं च[5] दधीमहि[6] । येनो[7] तोकं च तनयं च— इति पादः पवमाने[8] न सृज्यते । तत्र हि यच्छब्दस्य गर्भे विशेष्यं श्रुतमिति ॥

उषस्तच्चायनीयमन्नं अस्मभ्यमाभर अन्नवति येन पुत्रं च तत्पुत्रं च धारयेम ॥ (१३)

[1] The word mostly worm-eaten.
[2] Read अहिंसन्ती.
[3] This is the interpretation in N. 12. 6.
[4] Read उषस्तच्चित्रं.
[5] N. has plural for these two words, as printed.
[6] N. ends here.
[7] Read येन.
[8] R. V. 9. 74. 5.

**उषो अद्येह गोमत्यश्वावति विभावरि ।**
**रेवदस्मे व्युच्छ सूनृतावति ॥**

द्वृच उत्तरः स्पष्टार्थ इति ॥

उषः अद्यास्मिन् प्रदेशे गोमति अश्ववति दीप्तिमति धनयुक्तमस्मभ्यं व्युच्छ शब्दवति ॥ (१४)

**युक्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः ।**
**अथा नो विश्वा सौभगान्या वह ॥**

योजय हि अन्नवति अरुणानश्वान् अद्य उषः । अथास्मभ्यं विश्वान्येव सौभाग्यानि आवह ॥ (१५)

**अश्विना वर्तिरस्मदा गोमद्दस्रा हिरण्यवत् ।**
**अर्वाग्रथं समनसा नि यच्छतम् ॥**

अश्विनौ । उषसा साहचर्या[1] तृचेनाश्विनोः स्तुतिः । अश्विना वर्तिरस्मदस्माकं गृहं यथा गोयुक्तं हिरण्ययुक्तं यानभचति[2] । दस्रौ तदर्थमर्वाचीनं रथं समनसौ नियच्छतम् ॥

अश्विनौ अस्मदर्थं मार्गं प्रति गोमन्तं हिरण्यवन्तं रथमभिमुखं आनियच्छतं समानमनसौ दर्शनीयौ ॥ (१६)

**यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः ।**
**आ न ऊर्जं वहतमश्विना युवम् ॥**

[1] Read साहचर्यात् .

[2] Perhaps to read only च भवति.

. याविर्था[1] । यावित्थममतस्तोतव्यं[2] ज्योतिर्दिवो भूमिं प्रत्याचक्रतु-र्जनार्थं तौ युवामश्विनावस्मभ्यमन्नमावहतम् ॥

यौ इत्थं स्तोतव्यं ज्योतिः दिवो भूमिं प्रति आचक्रतुर्जनार्थं तौ युवाम-श्विनौ अस्मभ्यमन्नमावहतम् ॥ (१७)

**एह देवा मयोभुवा दस्रा हिरण्यवर्तनी ।**
**उषर्बुधो वहन्तु सोमपीतये ॥**

एह । आवहन्त्वत्र देवौ सुखस्य[3] भावयितारौ[4] दस्रौ हिरण्यरथा[5] उषसि प्रबुद्धा अश्वाः सोमपानाय[6] ॥

आवहन्त्वत्र देवौ सुखस्य भावयितारौ दस्रौ हिरण्ययुक्तमार्गौ अश्विनौ उषसि प्रबुद्धा देवाः सोमपानाय ॥ (१८)

---

**अग्नीषोमाविमं सु मे शृणुतं वृषणा हवम् ।**
**प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः ॥**

अग्नीषोमौ । अग्नीषोमाविमं शृणुतं वर्षितारौ मे आह्वानम् । प्रति-कामयेतां सूक्तानि । भवतं दाशुषे मयस्करौ ॥

[1] Read याविर्था. The र mark above is quite clear.

[2] Perhaps to read यावित्थं स्तोतव्यं.

[3] सुख mostly worm-eaten.

[4] Folio 66*a* ends with भावयिता.

[5] Read हिरण्यरथौ.

[6] Here there is the figure 12 to mark the end of the Sūkta.

अग्नीषोमौ इदं मदीयमाह्वानं वर्षितारौ सुष्ठु श्रृणुतम्। सूक्तानि च कामयेथाम्। भावयतं च यजमानाय सुखम् ॥ (१)

**अग्नीषोमा यो अद्य वामिदं वचः सपर्यति ।**
**तस्मै धत्तं सुवीर्यं गवां पोषं स्वश्व्यम् ॥**

स्पष्ट उत्तरो द्व्यृचः । सपर्यतिरुच्चारणार्थः[1] ॥

अग्नीषोमौ योऽद्य इदं वच उच्चारयति तस्मै धत्तं सुवीर्यं गवां पोषं अश्वसङ्घं च शोभनम ॥ (२)

**अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिम् ।**
**स प्रजया सुवीर्यं विश्वमायुर्व्यश्नवत् ॥**

आहुतिमाज्याहुतिम् । हविष्कृतं पुरोडाशमिति ॥

अग्नीषोमौ यो युवाभ्यामाज्याहुतिं प्रयच्छति यो वा पुरोडाशं स प्रजया च सुवीर्यं विश्वमायुश्च व्याप्नोतु ॥ (३)

**अग्नीषोमा चेति तद्वीर्यं वां यदमुष्णीतमवसं पणिं गाः ।**
**अवातिरतं बृसयस्य शेषोऽविन्दतं ज्योतिरेकं बहुभ्यः ॥**

अग्नीषोमा। अग्नीषोम[2] तद्युवयोर्विज्ञापयति[3] । तदमुष्णीतमवत्सम्[4] । गाः पणिमिति द्विकर्मकः । अवसं गा इति समानाधिकरणम् । अन्नं हि +

[1] After द्व्यृचः the end of the line is worm-eaten and completely damaged up to णार्थः in the next line. The word is guessed from the small bits visible.

[2] Read अग्नीषोमौ.

[3] Read तद्युवयोर्वीर्यं ज्ञापयति.

[4] Read यदमुष्णीतमवसं.

भेत्[1] यदिमा गावः[2] । अवतिरतिरयार्थः[3] । बृसयोऽसुरस्त्वष्टा ब्रसेरावेष्टन्तार्थाम्[4] । शेषोऽपत्यं शिष्यतेः । वृत्रस्तथोक्तः । अविन्दत[5] ज्योतिरेकं बहुभ्यः साधारणं सूर्यं वृत्रेण ग्रस्तमिति ॥

अग्नीषोमौ तद्युवयोर्वीर्यं चेतयति यदमुष्णीतमन्नं पशूंश्च पणेः तथा बृसयस्यापत्यं वृत्रं अवातिरतं अभ्यभवतम् । अविन्दतं च ज्योतिरेकं बहुभ्यः साधारणमादित्यं वृत्रहननेन लम्भितवन्तौ ॥ (४)

युवमे॒तानि॑ दि॒वि रो॑च॒नान्य॒ग्निश्च॑ सोम॒ सक्र॑तू अधत्तम् ।
युवं सिन्धूँ॑र॒भिश॑स्तेरव॒द्यादग्नी॑षोमा॒वमु॑ञ्चतं गृभी॒तान् ॥

युवम् । युवमेतानि नक्षत्राणि[6] अग्निश्च सोम समानकर्माणौ अधत्त[7] । युवां नदीः ब्रह्महत्यया गृहीतास्तस्मादभिशस्यमानादवद्यादमुञ्चतम् । इन्द्रो वृत्रं व्रत्वा[8] ब्रह्महत्यां वृक्षेषु पृथिव्यां स्त्रीष्वप्स्वितीति भावः[9] । शुद्धिरग्नीषोमाभ्यामभूदिति + +[10] ॥

[1] After अन्नं हि a letter completely worm-eaten. The next looks like भेत्; not sure.

[2] Passage not clear.

[3] This is the meaning of अवातिरत्. Perhaps अवतिरतिर्वधार्थः । The two letters य and ध are very much alike in Grantha.

[4] Read ब्रसेरावेष्टनार्थात्.

[5] Read अविन्दतं.

[6] णि completely worm-eaten.

[7] Read अधत्तम्.

[8] Read हत्वा.

[9] इति भावः not clear.

[10] After अभूदिति two letters completely worm-eaten. Perhaps they may be the आन्यम् as pratika for the next.

एतानि दिवि नक्षत्राणि अग्नीषोमौ समानकर्माणौ अधत्तम् । युवां नदीः ब्रह्महत्यागृहीताः अवद्यादभिशस्तेश्च अमुञ्चतम् ॥ (५)

**आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेः ।**
**अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकम् ॥**

आजहार[1] युवयोरन्यमग्निं देवो मातरिश्वा । भृगवे अन्यं सोमं बलादाजहार श्येनोऽद्रेः परि । मेनोरुपरि[2] स्वर्गम्[3] । तस्मादिति । तौ युवामग्नीषोमौ स्तोत्रेण वर्धमानौ विस्तीर्णमवकाशं यज्ञाय चक्रथुः । एतयोर्मध्ये अन्येषां देवानां होमदेशः । उरुं यज्ञाय चक्रथुरु लोकं जनयन्ता सूर्यमुषासमग्निम्—इति[4] न सृज्यते । तत्र हि लोकः कालः ॥

युवोरन्यतरमग्निं स्वर्गाद्वायुराहृतवान् भृगवे । अन्यं च सोमं मेरोः श्येनो भूत्वा गरुडः पर्यमथ्नात् । अग्नीषोमौ स्तोत्रेण वर्धमानौ विस्तीर्णमवकाशं यज्ञाय चक्रथुः । एतयोर्हि मध्ये सर्वेषामेव देवानां यागः ॥ (६)

**अग्नीषोमा हविषः प्रस्थितस्य वीतं हर्यतं वृषणा जुषेथाम् ।**
**सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः ॥**

अग्नीषोमा । अग्नीषोमौ हविः प्रस्थितं भक्षयत[5] । कामयेयां[6] वृषणौ सेवतां च । सुसुखौ सुरक्षणौ च भवतम् । अथ धत्तं यजमानाय

[1] If the last two letters previous to this are not आन्यम्, there is no pratika.

[2] Read मेरोरुपरि.

[3] स्वर्ग is masculine ; read स्वर्गः

[4] R. V. 7. 99. 4.

[5] Read भक्षयतम् .

[6] Read कामयेथां.

शं च योश्च । शं शमनीयानां शमनम् । योः यावनं पृथक्करणीयानामिति ॥

अग्नीषोमौ हविः प्रस्थितं भक्षयतम् । कामयेथां सेवेथां च । वर्षितारौ सुसुखौ सुरक्षौ च हि भवतम् । तथा सति यजमानाय उत्पन्नानामनिष्टानां शमनं अनागतानां पृथक्करणं च धत्तम् ॥ (७)

**यो अ॒ग्नीषोमा॑ ह॒विषा॑ सप॒र्याद्दे॑व॒द्रीचा॒ मन॑सा॒ यो घृ॒तेन॑ ।**
**तस्य॑ व्र॒तं र॑क्षतं पा॒तमंह॑सो वि॒शे जना॑य॒ महि॒ शर्म॑ यच्छतम् ॥**

यः । यो अग्नीषोमौ हविपा पक्षरिचरति[1] देवद्रीचा देवानञ्चता श्रद्दधानेन मवसा[2] व्रतेन च यः परिचरति तस्य[3] कर्म रक्षततं[4] पातं च तं अंहसः । विशे षशतै[5] तस्मै[6] जनाय महच्छर्म सुखं यच्छम्[7] । इन्द्रावरुणा युवमध्वराय नो विशे जनाय महि शर्म यच्छतम्—इति[8] न सृष्टः पादः । तत्र शर्म गृहमिति ॥

यः अग्नीषोमौ हविषा परिचरति देवानञ्चता मनसा यो वा घृतेन तस्य यज्ञं रक्षतम् । रक्षसश्च तं पातम् । निवसते जनाय । महत् सुखं यच्छतम् ॥ (८)

[1] Read परिचरति.

[2] Read मनसा.

[3] This word completely worm-eaten; only a guess from a bit that remains.

[4] Read रक्षतं. First त mostly worm-eaten.

[5] This must be the meaning of विशे.

[6] This word not quite necessary.

[7] Read यच्छतम्.

[8] R. V. 7. 82. 1.

**अग्नीषोमा सवेदसा सहूती वनतं गिरः ।**
**सं देवत्रा बभूवथुः ॥**

अग्नीषोमौ अग्नीषोमा[1] । अग्नीषोमौ[2] समानविहविसष्कौ[3] समानाह्वानौ भजेथां स्तुतीः । युवां हि सर्वान् देवान् संभवतः स्थालीव तस्तण्डुलान्[4] ।

अग्नीषोमौ समानपुरोडाशौ समानाह्वानौ भजेथां स्तुतीः । युवां हि सर्वानेव देवान् महत्तया संबभूवथुः स्थालीव तण्डुलान् ॥ (९)

**अग्नीषोमावनेन वां यो वां घृतेन दाशति ।**
**तस्मै दीदयतं बृहत् ॥**

स्पष्टोत्तरान्[5] । दाशतिः परिचरणार्थः । तस्मै यच्छतं बृहद्धनम् ॥

अग्नीषोमौ अनेन वां यो वां घृतेन परिचरति तस्मै वर्धयतं महद्धनम् ॥ (१०)

**अग्नीषोमाविमानि नो युवं हव्या जुजोषतम् ।**
**आ यातमुप नः सचा ॥**

स्पष्टैवोत्तरा ॥

[1] Folio 66*b* ends with अग्नीषो. The letter मा in the second lost, as the corner is worm-eaten and broken आग्नीषोमौ not wanted.

[2] Only षो is visible. Only small bits of other letters retained, as corner is broken.

[3] समा completely lost. Only a guess from context. Read समानहविष्कौ.

[4] Read तण्डुलान्. There is no such simile in the text.

[5] Read स्पष्टोत्तरा.

अग्नीषोमौ इमान्यस्माकं हवींषि युवां जुषेथाम् । उपयातं चास्मान् सह ॥ (११)

**अग्नीषोमा पिपृतमर्वतो न आ प्यायन्तामुस्रिया हव्यसूदः ।**
**अस्मे बलानि मघवत्सु धत्तं कृणुतं नो अध्वरं श्रुष्टिमन्तम् ॥**

अग्नीषोमा । अग्नीषोमौ पिपृतत्तमश्वानमश्वेस्मभ्यम्[1] । पूर्वायन्तां[2] प्रवृत्ता भव[3] आस्रिश्रया[4] गावो हविषः प्रेरयित्र्यः । अस्मासु बलानि हविष्मत्सु स्थापयतम् । कुरुतं नो यज्ञं धनयुक्तं वेति[5] ॥

अग्नीषोमौ पालयतमस्माकमश्वान् । आप्यायन्तां चास्माकं गावः हविषः प्रेरयित्र्यः । अस्मासु बलानि स्थापयतम् । कुरुतं चास्माकं यज्ञं प्राप्तियुक्तं आशु आत्मनि प्राप्तम् ॥ (१२)

---

**इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।**
**भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ॥**

[1] Read पिपृतमश्वानस्मभ्यम्; the letter त after पिपृ completely worm-eaten.

[2] Read आप्यायन्तां.

[3] Read प्रवृद्धा भवन्तु.

[4] Read उस्रिया.

[5] Read चेति. Here there is the figure 13 to mark the end of the Sūkta.

इमं स्तोमम् । आङ्गिरसः त्रसः[1] । ननु च उपगुर्वै सौश्रवसः कुत्सस्य सौरस्य[2] पुरोहित आसीत्—इति[3] ताण्डकम् । शाट्यायनकं च —कुत्सो वहा[4] औरस इन्द्रस्योरोधिरिममित् आसया दृश एवेन्द्रस्तादृशः[5] —इति । तदेतत बहुश्रुतेभ्योऽवगन्तव्यम् । स्वयं चात्मानमाङ्गिरसं ब्रूते । याभिरङ्गिरसः — इति[6] । इमं स्तोममर्हते जातप्रज्ञाय रथमिव संस्कुर्मः प्रज्ञया । भद्रा ह्यस्माकं प्रमतिः स्यादस्य संभजने । अग्ने तव सख्ये सति वयं मा रिषामः ॥

इमं स्तोमं स्तोमार्हाय जातप्रज्ञाय रथमिव संस्कुर्मः प्रज्ञया । भजनीया ह्यस्य अस्माकं प्रमतिर्भवति सह वसने । अग्ने तव सख्ये वर्तमाना वयं मा विनश्येम ॥ (१)

**यस्मै॒ त्वमा॒यज॑से॒ स सा॑धत्यन॒र्वा क्षे॑ति॒ दध॑ते सु॒वीर्य॑म् ।**
**स तू॑ताव॒ नैन॑मश्नोत्यंह॒तिरग्ने॑ स॒ख्ये मा रि॑षामा व॒यं तव॑ ॥**

यस्मै । यस्मै त्वं देवेभ्यो धनमायजसे प्रार्थयसे + + यत्यभिषितं[7] प्रत्यूतश्च[8] निवसति सपत्नैर्धारयति च सुवीर्यम् । स वर्धते च । न

[1] Read कुत्सः.

[2] Read कुत्सस्यौरसस्य.

[3] Taṇ. Br. 14.6.8.

[4] Read ह वा.

[5] Passage not clear.

[6] Not traced.

[7] One or two letters at the end of the line completely worm-eaten. Perhaps to read साधयत्यभिलषितं.

[8] Read अप्रत्यूतश्च. The letter that precedes this word is distinctly anusvāra and not म.

चैनमश्नोत्यंहन्तिरवतिः[1] । अंहतिराहन्तिर्निरूढोपधात्—इति[2] यास्क इति ।

यस्मै त्वं देवानायजसे हविरादाय देवेभ्यः प्रयच्छसि स साधयत्वभिलषितम् । अप्रत्यृतश्च निवसति । धारयति च सुवीर्यम् । स वर्धते । नैनमश्नोत्यवर्तिः ॥ (२)

**शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतम् ।**
**त्वमादित्याँ आ वह तान् ह्यु१श्मस्यग्ने सख्ये मा रिषामा वयं तव ॥**

शकेम । शक्नुयाम त्वा समेधितुम् । साध[3] कर्माणि । त्वयि देवा हविरदन्त्याहुतम् । त्वमामित्यां[4] आवह । ता[5] हि वयं तामयामहे[6] ॥

शक्नुयाम त्वां वयं समेधितुम् । साधय कर्माणि । त्वयि देवाः हविर्भक्षयन्ति आहुतम् । त्वमिहादित्यानावह । तान् हि वयं कामयामहे ॥ (३)

**भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणापर्वणा वयम् ।**
**जीवातवे प्रतरं साधया धियोऽग्ने सख्ये मा रिषामा वयं तव ॥**

[1] Read चैनमश्नोत्यंहतिरवर्तिः.

[2] Cf. N. 4. 25. The passage in N. is अंहतिश्चांहश्चांहुश्च हन्तेर्निरूढोपधात्.

[3] Read साधय.

[4] Read त्वमादित्यान्.

[5] Read तान्.

[6] Read कामयामहे.

भराम । भरामेद्धम्[1] । कृणवाम च हवींषि । तव जानितः[2] पर्वणा पर्वणा वयं अनुसूनाभ्यां[3] दर्शपूर्णमासाभ्याम् । जीवनायात्यन्तं साधय[4] कर्माणि ॥

भरामेध्मम् । कृणवाम च हवींषि तुभ्यं बुध्यमानाः पर्वणा पर्वणा अहोरात्रयोः पर्वणि सायं च प्रातश्च । ताभ्यामग्निहोत्रं कृणवाम मासपर्वभ्यां दर्शपूर्णमासौ ऋतुसन्धिभिश्चातुर्मास्यानि । जीवितुं प्रकृष्टतरमस्माकं कर्माणि साधय ॥ (४)

**विशां गोपा अस्य चरन्ति जन्तवो द्विपच्च यदुत चतुष्पदक्तुभिः ।**
**चित्रः प्रकेत उषसो महाँ अस्यग्ने सख्ये मा रिषामा वयं तव ॥**

विशाम्[5] । विशां गोपायितारोऽस्य चरन्ति जन्तवो रश्मयः । यच्च द्विपात् यच्च चतुष्पात तत्सर्वमस्य अक्तुभिरि[6] रश्मिभिर्गुप्तः । चित्रस्त्वं प्रज्ञापयितास्युषसो महानिति ॥

विशां गोपायिता भवस्यग्निः । तं परिचरन्ति जन्तवो यत् द्विपात् यच्च चतुष्पात् अञ्जनसाधनैराज्यैः । आश्चर्यः उषसः प्रज्ञापयिता महान् भवसि ॥ (५)

**त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः ।**
**विश्वा विद्वाँ आर्त्विज्या धीर पुष्यस्यग्ने सख्ये मा रिषामा वयं तव ॥**

[1] Read भरामेध्मम् .
[2] Read जानन्तः .
[3] Read अनुस्यूताभ्यां.
[4] सा completely worm-eaten.
[5] वि completely worm-eaten.
[6] Read अक्तुभिः .

त्वमध्वर्युः । त्वमध्वर्युः अपि च होता भवसि[1] मुख्यः । अपि च प्रशास्ता पोता । अपि च प्रशास्ता पोता[2] । अपि च जनुषा पुरोसितः[3] । श्वेत इत्येनेव समानाधिर्थे जतुषेति[4] । पुरोहितो ब्रह्मा । विश्वानि जानन्नार्त्विज्यानि पोषयसि प्राज्ञ । जीवभूतो वाचि श्रुतः[5] ॥

त्वमध्वर्युः अपि च होता भवसि प्रश्नः मैत्रावरुणः पोता च जातेन सर्वेण ब्रह्मत्वेन पुरो निहितः । सर्वाण्येव जानन् आर्त्विज्यानि पोषयसि प्राज्ञः ॥ (६)

**यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित्सन्तळिदिवाति रोचसे ।**
**रात्र्याश्चिदन्धो अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव ॥**

यस्वं[6] प्रज्वलं[7] सर्वतः एवान्यूनस्सदृशो वसि[8] शोभनाङ्गः स त्वं दूरेऽपि[9] वर्तमानोऽपि न्तिजस्थ एव[10] अतीत्य रोचसे । रात्र्या अप्यन्ध-

[1] ता and भ in होता भवसि completely worm-eaten.

[2] Repetition of अपि च प्रशास्ता पोता not wanted.

[3] Read पुरोहितः.

[4] Passage not clear. Perhaps to read विश्वेन इत्येतेन समानार्थे जनुष इति.

[5] Folio 67*a* ends here. The letters at the end of the line are worm-eaten and difficult to make out. Passage not clear.

[6] Read यस्त्वं. Pratika not separately given.

[7] Read प्रज्वलन्.

[8] Read भवसि.

[9] Read only दूरे.

[10] Read अन्तिकस्थ इव.

स्तमोऽतिपश्यसि अपीतीत्य[1] पश्यसि[2] । विलाशवातिउशन ऊकारोन्तेति + + दात्तः[3] पुंलिङ्ग इति ॥

य: समन्तात् प्रज्वलन् सर्वत एवान्यून: सदृशो भवसि स शोभनावयव: सन् दूरेऽपि सन् अन्तिके इवास्थित: अतिरोचसे । अपिवा विद्युदिव रोचसे । रात्र्या अप्यन्ध: विनाशयसि ॥ (७)

**पूर्वो॑ देवा भवतु सुन्व॒तो रथो॒ऽस्माकं॒ शंसो॑ अ॒भ्य॑स्तु दू॒ढ्य॑: ।**
**तदा जा॑नीतो॒त पु॑ष्यता॒ वचोऽग्ने॑ स॒ख्ये मा रि॑षामा व॒यं तव॑ ॥**

पूर्व: । अन्येषां रवेभ्य:[4] पूर्वो भवतु देवास्सुन्वतो रथ: । अस्माकं शंसोऽभिशापोऽभिभवत्वपापबुद्धीन् । तदिदं मदीयं वचनं यूयमभ्यनुजानीत । अपिच तत्पोषयत ॥

मुख्यो भवतु देवा यजमानस्य रथो अस्माकं सुन्वतां शंसनमभिभवतु पापबुद्धीन् । तदिदं मदीयं वचनं यूयमभ्यनुजानत । अपि च तत् पोषयत । इति देवदेवत्यास्त्रय: पादा: ॥ (८)

**व॒धैर्दु॒:शंसाँ॒ अप॑ दू॒ढ्यो॑ जहि दू॒रे वा॒ ये अन्ति॑ वा॒ के चि॑द॒त्रिण॑: ।**
**अथा॑ य॒ज्ञाय॑ गृण॒ते सु॒गं कृ॑ध्यग्ने॑ स॒ख्ये मा रि॑षामा व॒यं तव॑ ॥**

[1] Read अतीत्य.

[2] सि completely worm-eaten.

[3] The end of the line is completely worm-eaten and many letters lost. I note all the letters as far as I could decipher from the bits that remain.

[4] Read रथेभ्य: .

वधैः[1]। आयुधैर्दुर्वचनान् दुर्बुद्धीन्[2] अपजहि दूरे वा ये केचिदन्तिके वा भवन्त्यत्रिणो राक्षसाः। अथ यज्ञाय जनाय स्तुवते च सुगं कुरु। सुगमिति सुखनाम। इह तु मार्गवचनः॥

आयुधैर्दुर्वचनान् दुर्बुद्धींश्च अपजहि। दूरे वा ये केचित् अन्तिके वा भवन्ति अदनशीला राक्षसाः। अथ यज्ञार्थं स्तुवते शोभनगमनमार्गं कुरु॥ (९)

**यद॒युक्था अ॑रु॒षा रोहि॑ता॒ रथे॒ वात॑जूता वृ॒ष॒भस्ये॑व ते॒ रवः॑।**
**आदि॑न्वसि व॒निनो॑ धू॒मके॑तु॒नाग्ने॑ स॒ख्ये मा रि॑षामा व॒यं तव॑॥**

यत्। यदा त्वमयुर्थ्या[3] रथे आरोचमानौ रोहिद्वर्णौ। मत्वर्थीयोऽकारं[4]। युक्ष्वा सुते हरितो रोहितश्च—इति[5] तकारान्तोदात्तः[6]। वाजतजवौ[7] कदानीं[8] वृषभस्येव ते शब्दो भवति वनन्दकहतः[9]। अनन्तरमेव प्राप्नोषि वृक्षान् धूमकेतुना रश्मिना॥

यदा त्वं युनक्षि गन्तारौ रोहितवर्णावश्वौ वातवेगौ गमनाय स्वरथे तदानीं गच्छतस्तव शब्दः ऋषभस्येव श्रूयते। अथ त्वं व्याप्नोषि वृक्षान् धूमकेतुना ज्वालासङ्घेन॥ (१०)

[1] धैः mostly worm-eaten.

[2] All letters between आयुधै and बुद्धीन् mostly worm-eaten.

[3] Read त्वमयुक्था. The last letter is clearly written with a त् and not क् preceding थ and there is a dot above as ( mark.

[4] Read मत्वर्थीयोऽकारः.

[5] R. V. 7. 42. 2.

[6] Read तकारान्तो मध्योदात्तः.

[7] Read वातजवौ.

[8] Read तदानीं.

[9] Read वनं दहतः

अधं स्वनादुत बिभ्युः पतत्रिणों द्रप्सा यत्ते यवसादो व्यस्थिरन् ।
सुगं तत्ते तावकेभ्यो रथेभ्योऽग्ने सख्ये मा रिषामा वयं तवं ॥

अथ । अनन्तरं तव स्वनादुत बिभ्युः पदत्रिणः[1] द्रप्साते[2] यदा ते यवसादः तृणातो[3] दावितिष्ठन्ते[4] । सुगं च दातेऽरण्यं[5] भवति तदेवाह[6] । तावकेभ्यो रथेभ्य इति ॥

यदा दावाग्नेः शकलानि तृणस्य भक्षकाणि अरण्ये वितिष्ठन्ते अनन्तरमेव दवाग्निशब्दात् पक्षिणो बिभ्यति । शोभनगमनं तदरण्यं अग्नेः रथेभ्यो भवति । ते इति पदपूरणम् । तत् त्वं यथात्मीयैर्यथा कामं संचरति इत्यर्थः ॥ (११)

अयं मित्रस्य वरुणस्य धायसेऽवयातां मरुतां हेळो अद्भुतः ।
मृळा सु नो भूत्वेषां मनः पुनरग्ने सख्ये मा रिषामा वयं तवं ॥

अयम् । अयमग्नेः स्तोता मित्रावरुणयोर्धारणीयो भवतु । किञ्च अधस्तात् गच्छतां मरुतां क्रोधो महान् भवति[7] । तथा स त्वं म्रस[8] । सुष्ठु[9] भवतु चैषां मनः । पुनश्च प्रसन्नमिति ॥

[1] Read पतत्रिण.

[2] Read only द्रप्सा. The letter ते not wanted. It may be the ते after यदा by mistake here.

[3] Read तृणादो.

[4] Read only वितिष्ठन्ते. Perhaps the first दा is यदा repeated by mistake.

[5] Perhaps to read तदा तेऽरण्यं.

[6] ह completely worm-eaten.

[7] भवति seems not wanted.

[8] Read मृळ.

[9] Read सुष्ठु.

अयं मित्रावरुणयोः सोमपानाय स्वर्गादधस्तादागच्छताम्। मरुतां च क्रोधो महान् भवति। यदि प्रमादोऽस्माकं भवति क्रुध्यतीत्यर्थः। एवं स्थिते तान् यजन् अस्मान् सुष्ठु सुखय। भवतु चैषां त्वत्प्रसादेनास्मासु मनः पुनरपि॥ (१२)

**देवो देवानामसि मित्रो अद्भुतो वसुर्वसूनामसि चारुरध्वरे।**
**शर्मन्त्स्याम तव सप्रथस्तमेऽग्ने सख्ये मा रिषामा वयं तव॥**

देवः[1] देवानामसि मित्रो भात्[2] सखा मित्रः[3]। अथ वसुस्त्वमसि वसूनां चारुः प्रेरकोऽधिपत्यय्यंज्ञे[4] त्वया दत्ते। सर्वतः पृथुतमैः शर्मणि वयं स्यामेति॥

देवो देवानामसि सखा महान्। वसुर्वसूनामिति वसवो देवाः। तेषामपि वासयिता भवसि कल्याणस्त्वं यज्ञे। सुखे स्याम तव सर्वतः पृथुतमे॥ (१३)

**तत्ते भद्रं यत्समिद्धः स्वे दमे सोमाहुतो जरसे मृळयत्तमः।**
**दधासि रत्नं द्रविणं च दाशुषेऽग्ने सख्ये मा रिषामा वयं तव॥**

तत्ते। तत्ते भद्रं भवति पक्का[5] समिद्धं[6] उत्तरवेद्यां सोमेनाहुतः सूयसे सुखयितृतमः। यच्च दधासि रत्नं रमणीयं द्रविणं यजमानाय॥

[1] Pratika not separately given.

[2] Perhaps to read महान्.

[3] One मित्र not wanted.

[4] Perhaps to read प्रेरकोधिपस्त्वं यज्ञे.

[5] Read यत्त्वं.

[6] Read समिद्धः.

तत् तव कल्याणं यत् त्वं प्रज्वलितः स्वे यज्ञगृहे सोमेनाहुतः सन् देवान् स्तौषि सुखयितृतमः। यच्च त्वं धनं च यजमानाय प्रयच्छसि अग्ने सख्ये ॥ (१४)

**यस्मै त्वं सुद्रविणो ददाशोऽनागास्त्वमदिते सर्वताता ।**
**यं भद्रेण शवसा चोदयासि प्रजावता राधसा ते स्याम ॥**

य + +[1] । यस्मै त्वमग्ने शोभनधनं प्रयच्छसि अनागास्त्वः[2] पापत्वमदिते[3] अदीन सर्वतसर्वताता[4] । सर्वासु कर्मततिष्विति यास्कः[5] । यं च भद्रेण बलेन चोदयसि प्रजावता च धने[6] दत्ते[7] वयं च ते स्याम । बलधनभाजः स्यामेत्यर्थः । यास्कस्त्वाह[8]—प्रजावता धनेन ते वयमिह स्यामेति ॥

यस्मै त्वमग्ने शोभनधन प्रयच्छसि अपापवादं अखण्डित यज्ञे कृते यं च त्वं कल्याणेन बलेन संयोज्य युद्धे प्रेरयसि यं वा प्रजावता धनेन संयोजयसि वयं च ते भवाम । ते वयमिह स्याम इति यास्कः ॥ (१५)

**स त्वमग्ने सौभगत्वस्य विद्वानस्माकमायुः प्र तिरेह देव ।**
**तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥**

[1] This must be the pratika. The ऐ mark after य is clear. Then the next is स्म; bits are visible. Then there is yet another स्म of which also the end is seen.

[2] Read अनागास्त्वं.

[3] Read अपापत्वमदिते.

[4] Read only सर्वताता.

[5] This is in N 11. 24.

[6] Folio 67*b* ends here.

[7] प्रजावता, धने and दत्ते must be in apposition.

[8] N. 11. 24.

सत्वम् । समेऽग्ने[1] सौभगं जानन्नस्माकमायुः प्रतिर इह देव । तद्-स्माकमपेक्षितं मित्रादयोऽस्मभ्यं प्रयच्छन्तु । तदग्नि वयं वाचामह[2] इति ।

इन्द्रो मदायेत्थमभून्निरुक्तः षष्ठोऽनुवाक[3] प्रथमाष्टकस्य ।
सूक्तानि चास्मिंस्तु चतुर्दशासन् पूर्वोऽनुवाकस्त्वधिकश्चतुर्भिः[4] ॥

स त्वमग्ने सौभाग्यं कर्तुं जानन्नस्माकमायुः वर्धय अस्मिन् स्तोत्रे सति देव । तदिदमग्नेः स्तोत्रं मित्रादयोऽपि पूजयन्तु ॥

इत्येवं षष्ठमध्यायं व्याकरोत् प्रथमेऽष्टके ।
भरतस्य कुले जातो माधवो वेङ्कटात्मजः ॥ (१६)

इति षष्ठोऽध्यायः

---

[1] Read सत्वमग्ने.

[2] Read याचामहे.

[3] Read षष्ठोऽनुवाकः. This is the sixth अध्याय.

[4] Read पूर्वोऽनुवाकस्त्वधिकश्चतुर्भिः. Here there is no other mark to end the अध्याय. The next begins immediately.

# सप्तमोऽध्यायः

**द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुप धापयेते ।**
**हरिरन्यस्यां भवति स्वधावाञ्छुक्रो अन्यस्यां ददृशे सुवर्चाः ॥**

द्वे विरूपे । औषसोऽग्निर्देवता[1] । सशिप्रका[2] समुद्रादुत्तिष्ठति । यद्वा केवल एवाग्निः । द्वे विरूपे नानारूपे । चरतः स्वर्थे शोभनगमने । यद्वा शोभनकार्ये । ते चान्यान्या वत्समुपयापयेते[3] स्वरसं पाययतः । तयोरेतौ वत्सौ । अग्निश्चादित्यश्च । रात्रेरहश्च वत्सः[4] । श्वेत आदित्यो-ऽश्नो[5]ऽग्निस्ताम्नो रात्रैः[6] अरुणः । पराशराशनामशाखिनस्समामनन्ति[7] । तत्र हि हरिणदित्यो[8]ऽन्यस्यामह्नि भवति स्वधावान् रसवान् दीप्तः[9] । शुक्रोऽग्निरन्यस्यां रात्रौ दृश्यते स[10] दीप्तिः ॥

[1] ग्नि and the second द in र्दे, written usually as र्द्दे, mostly worm-eaten.

[2] Not clear.

[3] Read धापयेते.

[4] Read रात्रेर्वत्सः.

[5] Read ह्नो.

[6] Read ग्नि स्ताम्रो रात्रेः.

[7] Not clear. Cf. T.A. 1. 10.

[8] Read हरिण आदित्यो.

[9] प्तः partly worm-eaten.

[10] स not wanted.

कुत्सः । द्वे भिन्नरूपे चरतः शोभनकार्ये अन्यान्या वत्समुपधापयतः । तत्रादित्योऽन्यस्यामह्नि बलवान् भवति । शुक्रवर्णोऽग्निः रात्रौ ददृशे सुदीप्तः ॥ (१)

**दशे॒मं त्वष्टु॑र्जनयन्त॒ गर्भ॒मत॑न्द्रासो युव॒तयो॒ विभृ॑त्रम् ।**
**ति॒ग्मानी॑कं॒ स्वय॑शसं॒ जने॑षु वि॒रोच॑मानं॒ परि॑ षीं नयन्ति ॥**

दशे । दश दिश[1] एनमग्निं त्वष्टुर्दीप्ताद्वानो[2] जजनयन्ति[3] गर्भम्[4] । अमन्द्रा[5] अनलसा विभृत्रं भृतेषु[6] । तिग्मतेजसं वैद्युतम् । अपिवा त्वष्टुर्गर्भभूतमेनं अरण्योरू + यो[7] जनयन्तीति । द्युतेजसं[8] प्रस्यतकीर्तिं[9] जनपदेषु विविरोचमानं[10] परितो नयन्ति सीमेनं जनाः कार्यार्थिन इति ॥

दश दिश एनमग्निं त्वष्ट्रा दिक्षु निषिक्तं गर्भभूतं जनितवत्यः अनलसा युवतयो धारकम् । यद्वैतस्ततो विहृतम् । तीक्ष्णज्वालं स्वभूतकीर्ति मनुष्येषु परिणयन्ति विरोचमानं परितः ॥ (२)

**त्रीणि॒ जना॒ परि॑ भूषन्त्यस्य समु॒द्र एकं॑ दि॒व्येक॑म॒प्सु ।**
**पूर्वा॒मनु॒ प्र दिशं॒ पार्थि॑वानामृ॒तून् प्र॒शास॒द्वि द॑धावनु॒ष्ठु ॥**

[1] दि completely worm-eaten.

[2] Not clear. Is this the meaning of युवतयः ?

[3] Read जनयन्ति.

[4] ग completely worm-eaten.

[5] Read अतन्द्रा.

[6] Read विभृतेषु.

[7] After ण्यो the letter र is clear. It looks as if there is ऊ mark following. Then one letter is completely worm-eaten. Perhaps to read अरण्योरुभयोः.

[8] This is the meaning of तिग्मानीकम्.

[9] This is the meaning of स्वयशसम्.

[10] Read विरोचमानं.

त्रीणि । त्रीणि जन्मानि परिभूषन्ति । अस्य भवन्तीत्यर्थः । तत्रैकं जन्म नभसि वैद्युताख्यम् । दिव्येकं वैश्वानराख्यम् । अप्स्ववरम्[1] । ओषसो[2]ऽयम् । पार्थिवानां प्रजानां पूर्वामनु प्रविद्धादि तिशम्[3] । ऋतून् कालान् प्रशास्ति औषसः प्रातरुद्यन् । अनुष्विति[4] समीचीनार्थो निपात इति ॥

जनाः स्तोतारोऽस्य त्रीणि जन्मान्यलंकुर्वन्ति । अन्तरिक्षस्थमेकं दिव्यपरं अप्स्वेकम् । सोऽयं प्राचीं दिशं प्रति स्थित्वा मनुष्याणां व्युछनेन कालान् प्रशासन् कल्याणं प्रकर्षेण विदधाति । इत्यौषसमग्निमाह । औषसाग्निप्रधानं वेदं सूक्तम् । अत्र कात्यायनः—औषसाय वाग्नये इति ॥ (३)

**क इ॒मं वो॑ नि॒ण्यमा चि॑केत व॒त्सो मा॒तॄर्ज॑नयत स्व॒धाभिः॑ ।**
**ब॒ह्वी॒नां गर्भो॑ अ॒पसा॑मु॒पस्था॑न्म॒हान् क॒विर्निश्च॑रति स्व॒धावा॑न् ॥**

इमम्[5] । क इमम् । क इमं युष्माकं निण्यं निर्णीतमन्तर्हितानाति[6] । सोऽयमापां[7] वत्सस्संमात्ररपः[8] स्वधाभिः दीप्तिभ्ये जनयति[9] सोऽयं बह्वीनामपां गर्भोऽपसामुपस्थात् समुद्रान्महाकविर्निर्गच्छन्ति[10] दीप्तिमान् ॥

[1] Read अप्स्वपरम् .
[2] Read औषसो.
[3] Read प्रविदधाति दिशम् .
[4] Read अनुष्ठिति.
[5] This is not wanted.
[6] Read मन्तर्हितं जानाति. There is the letter जा written below ता.
[7] Read मपां.
[8] Read वत्सः मातॄरपः .
[9] Read दीप्तिभिर्जनयति.
[10] Read कविर्निर्गच्छति.

वो युष्माकं मध्ये क एनमन्तर्हितानि। वत्सः सन् ओषधीनां मातृः जनयन्ति उदकैः वैद्युतः। बह्वीनां दिशां गर्भभूतः असौ अपामुदस्थान्मध्यात् महान् क्रान्तदर्शनो निश्चरति बलवान् ॥ (४)

**आविष्ट्यो॑ वर्धते॒ चारु॑रासु जि॒ह्मानां॑मू॒र्ध्वः स्वय॑शा उ॒पस्थे॑।**
**उ॒भे त्वष्टु॑र्बिभ्यतु॒र्जाय॑मानात् प्रती॒ची सिं॒हं प्रति॑ जोषयेते ॥**

आविष्ट्यः। आविषो[1] निपातात्यपम्[2]। आविर्वर्धते आविर्भवति चारुरास्वप्सु जिक्कन्तुह्मानामपामुपस्थे स्वयमूर्ध्वः स्ववशाः[4]। उभे त्वष्टुर्जायमानात् बिभ्यतोऽहोरात्रे। अपि चैनं प्रतीची अभिमुखं सिंहं प्रति सेवते। निरुक्तम्[5]--- + + + + दनात्यो वर्धते चारुरासु। चारु चरतेः। जिह्मं जिहीतेः। ऊर्ध्वमुद्धृतं भवति। स्वयशा आत्मवशाः[6]। उपस्थ उपस्थाने। उभे त्वष्टुर्बिभ्यतुर्जायमानात्। द्यावपृथिव्याविति वा। अहोरात्रे इति वा। अरणी इति वा। अपि चैते प्रत्यक्ते संहननं प्रति स्पाशयेने इति ॥

आविष्ट्यो वर्धते चारुरग्निः। आस्वप्सु तिर्यग्गच्छन्तीनामपामुपस्थे स्वयमूर्ध्व .... त्वष्टुर्जायमाना दौर्वादग्नेर्द्यावापृथिवी उभे अपि बिभ्यतुः। अपिचैनं सिंहमिव बलिनमभिमुखे सेवते। अत्र निरुक्तं द्रष्टव्यम ॥ (५)

[1] Read आविष्ट्यो.

[2] Folio 68*a* ends with निपा. Expression not clear. Perhaps to read निपात्यते.

[3] Perhaps to read only जिह्माना.

[4] Read स्वयशाः.

[5] The first word is completely worm-eaten. The passage differs slightly from the text as printed in the editions. N. 8. 15.

[6] Read आत्मयशाः.

**उभे भद्रे जोषयेते न मेने गावो न वाश्रा उप तस्थुरेवैः ।**
**स दक्षाणां दक्षपतिर्बभूवाञ्जन्ति यं दक्षिणतो हविर्भिः ॥**

उभे[1] भजनीये सेवेते इव मेने स्त्रियावित्यहोरात्रसेवां दृष्ट्वा वदति । यथा गावो वाश्राः स्वं वत्समुपतिष्ठन्ति एवैश्चरित्रैः तथैनमुपतितस्थु[2] । चलानां पतिर्भवति । यं दक्षिणतस्तिष्कन्तो[3]ऽञ्जन्ति हविर्भिः ॥

उभे स्त्रियो द्यावापृथिव्यौ कल्याण्यावग्निं सेवेते । नेति पूरणः । गाव इव शब्दकारिण्यः वत्समेनं गमनैः ऋत्विज उपतिष्ठन्ति । सोऽयं बले बलपतिरभवत् । यमेनं यज्ञस्थमध्वर्यवोऽपरेणाहवनीयं दक्षिणातिक्रम्य तत्र स्थिता हविर्भिः सिञ्चन्ति ॥ (६)

**उद्यंयमीति सवितेव बाहू उभे सिचौ यतते भीम ऋञ्जन् ।**
**उच्छुक्रमत्कमजते सिमस्मान्नवा मातृभ्यो वसना जहाति ॥**

उद्यंयमीति । उद्यन् सविता बाहू उद्यच्छति । तथायमुद्यच्छति तेजांसि । किंच अथ उभे सिचौ दिवं च पृथिवींन्तश्चाहोरात्रे[4] वा यते[5]ऽभिगच्छति भीमः । प्रसाधयत्[6] अपि च सिमस्मात् सर्वस्मात् शुक्रमत्कमुदजते । अत्कोऽतेर्व्याप्त्यर्थत्वात्[7] । सारमादत्ते । नवानि सवनानि तेजांस्यद्गुद्गमयति[8] इति ॥

[1] There is no Pratika separately given.

[2] Read तथैनमुपतस्थुः.

[3] Read दक्षिणतस्तिष्ठन्तो.

[4] Read पृथिवीं चाहोरात्रे.

[5] Read यतते.

[6] Read प्रसाधयन्.

[7] Read तेर्व्याप्त्यर्थात्.

[8] Read तेजांस्यद्गुय, उद्गमयति.

उद्बाहुः सविता उदेति। तद्वद्यं आत्मीयं तेज उद्यच्छति। सोऽयमुभे सिचौ। सित् सिञ्चते द्यौरुदकैः पृथिवीं सिञ्चति। हविर्भिर्दिवम्। ते उभे अप्यभिगच्छति तेजसा प्रकाशयति भयंकरोऽग्निः। शुक्रं रूपमादत्ते सर्वस्मान्नवानि च वसनानि ज्वालाख्यान्यद्वयो विसृजत्यासां मध्यादुत्तिष्ठन्॥ (७)

**त्वेषं रूपं कृणुत उत्तरं यत् संपृञ्चानः सदने गोभिरद्भिः।**
**कविर्बुध्नं परि मर्मृज्यते धीः सा देवताता समितिर्बभूव॥**

त्वेषत्। दीप्तं रूपं कृणुते यद्रूपमुत्तरमुद्गततरं भवति। संगच्छमानः सन्ददतिन[1] समुद्रे गच्छन्तीभिः। कविर्बुध्नं मूलं तत् सदनं परिमर्मृज्यते परिमार्ष्टि धारकः। सेवताता[2] दीप्तस्तता[3] समितिः संभवति[4]स्तेजसां भवति॥

दीप्तं रूपं कृणुते यद्रूपमुद्गततरं भवति संसृजन् समुद्रे तेजोभिरद्भिश्च। क्रान्तो ध्यानात्मानो मूलमुदकं ज्वालाभिः परिमार्ष्टि। सेयं देवैस्ततः सङ्घो भवति। प्रकाशते पूर्वस्यां दिशि॥ (८)

**उरु ते ज्रयः पर्येति बुध्नं विरोचमानं महिषस्य धाम।**
**विश्वेभिरग्ने स्वयशोभिरिद्धोऽदब्धेभिः पायुभिः पाह्यस्मान्॥**

उरूते। उरू ते ज्रयः पर्येति बुध्नम्। ज्रयो धामासीभावुकम्[5]। विरोचमाननं महतो नाम। विश्वैरग्ने स्वतेजोभिः समिद्धो रक्षोभिरुपहिंसितैः[6] तेजोभिः अस्मान् रक्ष॥

[1] This may be the etymology of सदने; or perhaps to read सदने.

[2] Read सा देवताता.

[3] Read दीप्तैस्तता.

[4] Perhaps to read संघात.

[5] Read धामाभिभावुकम्.

[6] Read रक्षोभिरनुपहिंसितैः.

विस्तीर्णं गच्छत्तव तेजः परिगच्छति मूलं विरोचमानं महतः । सर्वैरग्ने स्वकीर्तिभिः समिद्धोऽनुपहिंसितैः पालनैरस्मान् रक्ष ॥ (९)

**धन्वन्त्स्रोतः कृणुते गातुमूर्मिं शुक्रैरूर्मिभिरभि नक्षति क्षाम् ।**
**विश्वा सनानि जठरेषु धत्तेऽन्तर्नवासु चरति प्रसूषु ॥**

धन्वन् । नभसि स्रोतः स्रवन्तं करोति । गच्छन्तमूर्मिमुदकसंघम् । अपिशुच[1] शुक्रैरुदकैरभिव्याप्नोति भूमिम् । विश्वानि चान्नानि मनुष्याणां च जठरेषु धारयति । अन्तश्चरति नवासु प्रभृष्वोडशीषु[2] ॥

अन्तरिक्षे सन्ततं गमनशीलं तेजःसङ्घातं करोति । शुक्रैस्तेजोभिरभिव्याप्नोति द्याम् । विश्वानि चान्नानि स्वोदरेषु धारयति । अन्तश्चरति नवासु मातृष्वप्सु ॥ (१०)

**एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे विभाहि ।**
**तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥**

एव । एवमस्माकमग्ने समिधा वर्धमानो धनयुक्त पावकान्नाय[3] विभाहि । तदित्याहिदि[4] गतमिति[5] ॥

एवमग्ने निधीयमानया समिधा वर्धमानः अस्माकं धनयुक्तं अन्नार्थं दीप्यस्व । सूक्तं प्राङ्गैर्निरूपणीयम् ॥ (११)

---

[1] Read अपिच.

[2] Read प्रसूष्वोषधीषु.

[3] Folio 68*b* ends with पावका.

[4] Read तदित्यादि हि.

[5] Here there is the figure 1 to mark the end of the Sūkta.

**स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा ।**
**आपश्च मित्रं धिषणा च साधन् देवा अग्निं धारयन्द्रविणोदाम् ॥**

सः । सः प्रत्न इव बलेन जायमानः सद्य एव कविकर्माणि बट् सत्यमेव श्रृरोति[1] विश्वानि । तमिमापश्चान्तरिक्ष्या[2] माध्यमिका वा[3] । अथ मित्रं साधयति वैद्युतम् । तमिमं[4] देवा अग्निं धारयन्ति द्रविणसो तातारम्[5] ॥

सः प्रत्न इव बलेन जायमानः तदानीमेव हविर्वहनादीनि कविकर्माणि सर्वाण्येव सत्यमेव करोति । आपश्चान्तरिक्ष्या माध्यमिका वाक् च मित्रमेनं साधयन्ति वैद्युतमग्निम । तमिमं धनस्य दातारं देवा अधारयन् ॥ (१)

**स पूर्वया निविदा कव्यतायोरिमाः प्रजा अजनयन्मनूनाम् ।**
**विवस्वता चक्षसा द्यामपश्च देवा अग्निं धारयन्द्रविणोदाम् ॥**

स पूर्वया । कव्यं आवतेरुक्थम् तोनांकरणः[6] । स प्रथमया निविदोक्थेन च आयोर्मनोः स्तूयमान इमाः प्रजा अजनयन्[7] । या इमा मनूनां नृणां स्वभूता मानवीः प्रजा अजनयतित्यर्थः[8] । विवस्वता आच्छादनवता तेजसा द्यामन्तरिक्षं च व्याप्नोति ॥

[1] Read करोति ; this is the meaning of अधत्त.

[2] Read तमिममापश्चान्तरिक्ष्या.

[3] Read वाक् च.

[4] There is no word in the text corresponding to this. The word धिषणा not explained.

[5] Read द्रविणसो दातारम् .

[6] Read the passage as कव्यं कवतेरुक्थम् । तो नामकरणः .

[7] Read अजनयत् .

[8] Read अजनयदित्यर्थः । Perhaps to add ताः before this word.

सः प्रथमया वाचा कवित्वेन उर्वशीपुत्रस्यायोः प्रजापतेरिमाः प्रजा अजनयत् मनुष्याणां दृश्यमानाः । तमसो विवासनेन तेजसा द्यामन्तरिक्षं च प्रकाशयति ॥ (२)

तमी॑ळत प्रथ॒मं य॑ज्ञ॒साधं॒ विश॒ आरी॒राहु॑तमृञ्ज॒सा॒नम् ।
ऊ॒र्जः पु॒त्रं भ॑र॒तं सृ॒प्रदा॑नुं दे॒वा अ॒ग्निं धा॑रयन्द्रवि॒णो॒दाम् ॥

तम् । तं स्तुत प्रथमं यज्ञस्य साधकम् । विश आरीरार्यभूता आहुत-मृञ्जसानं स्तोत्रैः प्रसाध्यमानम् । अन्नस्य पुत्रं भरतं हविषो भर्तारम् । शश्वति ह वा एष प्राणो भूत्वा प्रजा बिभर्ति । तस्मादेष भरत इति च ब्राह्मणम्[1] । सप्रसादनं[2] उदारमिति ॥

तं स्तुत प्रथमं यज्ञस्य साधयितारं विशोऽभिगन्त्र्यः आहुतं प्रसाधयन्तं अन्नस्य पुत्रं देवानां हविषश्च भर्तारं विस्तृतदानम् ॥ (३)

स मा॑त॒रिश्वा॑ पु॒रुवा॑रपुष्टिर्वि॒दद्गा॒तुं तन॑याय स्व॒र्वित् ।
वि॒शां गो॒पा ज॑नि॒ता रोद॑स्यो॒र्दे॒वा अ॒ग्निं धा॑रयन्द्रवि॒णो॒दाम् ॥

सः । सोऽन्तरिक्षे श्वयन्[3] वहुभिर्वरणीयपोषं[4] विदत् लंभयतु । गातुं धनम् । अस्माकं तनयाय सर्ववित् । विशां गोपयिता जनयितारो दस्योरिति[5] ॥

[1] *Cf.* श. ब्रा. 1.5.1.8.

[2] Perhaps to read सुप्रदानुं.

[3] Read श्वसन्.

[4] Read पोषः at the end of the word.

[5] द् and रि mostly worm-eaten. Conjectured from context.

स अन्तरिक्षे श्वसन् बहुभिर्वरणीयपोषः तनयाय मनुष्यजाताय विशां गोपायिता जनयिता द्यावापृथिव्योः ॥ (४)

**नक्तोषासा वर्णमामेम्याने धापयेते शिशुमेकं समीची ।**
**द्यावाक्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाम् ॥**

नक्तोषासा । नक्तोषासाऽन्योन्यस्य वर्णमामेम्याने हिंसन्त्यौ । याप- यितः[1] शिशुमेकं स्वगते । सोऽयं शिशुद्यावापृथिव्योर्मध्ये[2] विभाति रोचतान्तः[3] इति ॥

नक्तोषासावात्मीयं वर्णमन्योन्यस्याध्यात्मं कुर्वाणे पाययतं उभयोः साधारणं संगते स्वसारं हविरग्निहोत्रम् । स चासौ द्यावापृथिव्योर्मध्ये मणिरिव दीप्यते ॥ (५)

**रायो बुध्नः संगमनो वसूनां यज्ञस्य केतुर्मन्मसाधनो वेः ।**
**अमृतत्वं रक्षमाणास एनं देवा अग्निं धारयन्द्रविणोदाम् ॥**

रायः । धनस्य मूलं संगमनं च वसूनां यज्ञस्य केतुभूतो मन्मसाधनो वेरभिगन्तुः । अमृतत्वं रक्षमाणा देवा । एनम् स्तुवन्तीति शेषः । चतुर्थ्येन[4] पदेन एकवाक्यमिति ॥

धनस्य मूलम् । विविधानि च धनानि संगच्छन्तेऽस्मिन् । यज्ञस्य प्रज्ञापकः । अभिलषितस्य साधयिता । तमिममात्मनोऽमृतत्वं रक्षमाणा देवा अधारयन् ॥ (६)

[1] Read धापयतः.

[2] Read शिशुर्द्यावापृथिव्योर्मध्ये.

[3] Perhaps to read रोचनान्त.

[4] Read चतुर्थेन.

**नू च॑ पु॒रा च॒ सद॑नं रयी॒णां जा॒तस्य॑ च॒ जाय॑मानस्य च॒ क्षाम् ।**
**स॒तश्च॑ गो॒पां भव॑तश्च॒ भूरे॑र्दे॒वा अ॒ग्निं धा॑रयन्द्रवि॒णो॒दाम् ॥**

नू च । अद्य पुरा चावासस्थानं रयीणां जातस्य जायमानस्य च क्षां निवासभूतम् । सतो नित्यं विद्यमानस्य भवतश्च जायमानस्य बहो-र्गोपयितारम् ॥

अद्य च पुरा च आवासस्थानं रयीणां जातस्य च जायमानस्य च आवा-सस्थानं विद्यमानस्य च गोपायितारं भवतश्च बहोः ॥ (७)

**द्र॒वि॒णो॒दा द्रवि॑णसस्तु॒रस्य॑ द्रवि॒णो॒दाः सन॑रस्य॒ प्र यं॑सत् ।**
**द्र॒वि॒णो॒दा वी॒रव॑ती॒मिषं॑ नो द्रवि॒णो॒दा रा॑सते दी॒र्घमायुः॑ ॥**

द्रविणोदाः । द्रविणोदा द्रविणस्य तुरं जङ्गमम् । सनस्सनेः[1] । भजनीयं स्थावरम् । तदुभयं नः प्रयच्छतु । उत्तरार्धः स्पष्टः ॥

तुरस्त्वरतेः । अश्वादिधनं त्वरणस्वभावकं प्रयच्छतु समनुष्यं च । द्रविणोदाः वीरवदन्नं द्रविणोदा दीर्घमायुश्च प्रयच्छतु ॥ (८)

**ए॒वा नो॑ अग्ने स॒मिधा॑ वृधा॒नो रे॒वत्पा॑वक॒ श्रव॑से॒ वि भा॑हि ।**
**तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑ति॒ः सिन्धुः॑ पृथि॒वी उ॒त द्यौः ॥**

---

[1] Perhaps to read सनरस्सनेः.

अप नः शोशुचदघमग्ने शुशुग्ध्या रयिम् । अप नः शोशुचदघम् ॥

अपनः । सर्वस्य मित्रं सत्[1] कुत्स इन्द्रस्य वचनाद्दीर्घजिह्वीनाम रक्षोबबाधे । तं वागभ्यवदत् । सुमित्रस्सन् कूरमकरिति । तं शुभाच्छत्[2] । स तां शुचमेतेन सूक्तेनापहत[3] । तदिदं ताण्डकवेषात्[4] सूक्तवेषाच्च प्रतिमा[5] । तत्र चतुर्थे[6]ऽहनि ताण्डकम्--दीर्घजिह्वीनाम रक्षो यज्ञानवलिहन्त्यचरत् । तामिन्द्रः कथाचन[7] मायया हन्तुं नाशंसत । अथ ह सुमित्रः कुत्सः कल्याणतममब्रवीत —इत्यादि (१३. ६, १) अप[8]शोशुचदपछ[9] + + + तु[10] वास्मातमग्ने[11] पापम[12] । प्रज्वलय च धनमस्माकम् । उत्तरोऽर्धः पूरकप्राय इति ॥

सर्वमित्रं सत् कुत्स इन्द्रवचनात् दीर्घजिह्वीं नाम राक्षसीं बाधितवान् । अथ तं कुत्सं सुमित्रः सन् कूरमकरोत् । इत्येवं वागभ्यवदत् । तं शुगाच्छत् ।

[1] Read सन्.

[2] Read शुगाच्छत्.

[3] Perhaps to read सूक्तेनापानुदत्.

[4] ण्ड mostly worm-eaten; only conjecture.

[5] It may be प्रतिम or प्रमे. The letter between प्र and म worm-eaten and looks like ए mark or ति.

[6] Folio. 69*a* ends here.

[7] Read कथंचन.

[8] अ completely worm-eaten.

[9] The ए mark partly and the consonent completely worm-eaten in शो; only a guess.

[10] The letter after दप is च्छ. The next may be तु. The next two letters are completely lost; may be गच्छ.

[11] Read वास्माकमग्ने. The letter ग्ने is mostly lost; only a conjecture.

[12] The two letters after ग्ने are completely gone. The second may be च or प. There is a long horizontal line.

तदपनोदनाय अग्निं स्तौति । सोऽमित्रं भवति दीर्घजिह्वीव—इत्यादि ताण्डकम् । अस्माकं पापमपगच्छतु । अस्मानत्यन्तं दहदग्ने प्रज्वलय धनम् । अधेर्च उत्तर: पूरक आदरार्थो वा ॥ (१)

**सुक्षेत्रिया सुगातुया वसूया च यजामहे । अप नः शोशुचदघम् ॥**

सुक्षेत्रिया । शोभनक्षेत्रेच्छासुक्षेत्रिया । तया शोभनमार्गेच्छया चाग्निं यजामहे । सुक्षेत्रियेत्यत्र प्रत्ययस्वरूपानवधारणात् नावग्रह[1] इति ॥

शोभनक्षेत्रेच्छया शोभनमार्गेच्छया धनेच्छया च वयमग्निं यजामहे । अप नः शोशुचदघम् ॥ (२)

**प्र यद्भन्दिष्ठ एषां प्रास्माकासश्च सूरयः । अप नः शोशुचदघम् ॥**

प्र यः[2] । प्रकर्षेण स्तोतृतमो वत्येषां[3] स्तोतृणां कुत्सः एवमस्माकीनास्तोतारश्च भवन्ति भन्दिष्ठा इति ॥

यस्मादहमेषां स्तोतृणामतिशयेन स्तोता यस्माच्चास्माकीनाः स्तोतारः प्रस्तुवन्ति ॥ (३)

**प्र यत्ते अग्ने सूरयो जायेमहि प्र ते वयम् । अप नः शोशुचदघम् ॥**

प्र यत् । यस्मादग्ने तव स्तोतारः प्रजायन्ते । ततो वयं[4] च तव स्तोतारः प्रजायेमहि ॥

[1] But there is Avagraha in the Padapāṭha.

[2] Read यत.

[3] Read भवत्येषां.

[4] व mostly worm-eaten; conjecture from context.

यस्मादग्ने तव स्तोतारः प्रजायन्ते वयं च तथा स्तोतारः सन्तः प्रजायेमहि ॥ (४)

**प्र यद॒ग्नेः सह॑स्वतो वि॒श्वतो॒ यन्ति॑ भा॒नवः॑ । अप॑ नः॒ शोशु॑चद॒घम् ॥**

प्र यन्[1] । प्रयन्ति यतोऽग्नेः सभनवतः[2] सर्वतो भानवः ॥

यस्मादग्नेर्भानवः सर्वतः प्रयन्ति बलवतः ॥ (५)

**त्वं हि वि॑श्वतोमुख वि॒श्वतः॑ परि॒भूरसि॑ । अप॑ नः॒ शोशु॑चद॒घम् ॥**

त्वं सि[3] । त्वं सि[3]सर्वतोमुख सर्वतः परिभूर्भवसि ॥

त्वं हि सर्वतोमुख सर्वतः परिभवसि ॥ (६)

**द्वि॒षो॑ नो विश्वतोमुखाति॑ ना॒वेव॑ पारय । अप॑ नः॒ शोशु॑चद॒घम् ॥**

द्विषः । शत्रूनस्माकं सर्वतोमुख नावेवातिपारय ॥

शत्रूनस्मान् सर्वतोमुख नावेवातिपारय ॥ (७)

**स नः॒ सिन्धु॑मिव ना॒वयाति॑ पर्षा स्व॒स्तये॑ । अप॑ नः॒ शोशु॑चद॒घम् ॥**

स नः । सोऽस्मान्नदीमिव नावयाति पारय शत्रून् स्वस्ति प्राप्तुमिति[4] ॥

सोऽस्मान् नदीमिव नावातिपारय शत्रूनविनाशाय ॥ (८)

---

[1] Read यत्.

[2] Read सहनवतः.

[3] Read हि.

[4] Here there is the figure 3 to mark the end of the sūkta.

वैश्वानरस्यं सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण ॥

वैश्वानरस्य । हि कं सु कं नु कमिति त्रयः कमो निहताः । तान्येकपदान्यध्वर्यवोऽधीयते । वैश्वानरस्य कल्याण्यां मतौ वयं स्याम । राजा हि सर्वेषां भूतानां अभिश्रयणीयः । स इतो जात[1] सर्वमिदमभिविपश्यति । वैश्वानर[2] संयतते सूर्येण । प्रातरुद्यतोरण्योर्जातस्य पार्थिवस्याग्नेरर्चिषूत्तिष्ठन्ति[3] । दिवोऽमुष्य रश्मयः प्रादुर्भवन्ति । तयोरिमं संगमं दृष्ट्वा वदति—वैश्वानरो यतते इति । सोऽयमर्थो निरुक्ते उक्तः—सूर्य आत्मनि सर्वत्र वर्तमानोऽग्निर्वैश्वानरः सूर्ये भूयिष्ठं सन्निहित इत्यस्माकं पक्षः—इति[4] ॥

वैश्वानरस्य कल्याण्यां मतौ वयं स्याम । राजा ह्यसौ भूतानामभिश्रयणीयः । इतो जातः सर्वमभिविपश्यति । वैश्वानरः संयतते सूर्येण । प्रातरादित्यात्मना जायमानः सर्वं पश्यति । ततोऽमुष्य रश्मयः प्रादुर्भवन्ति । अतोऽस्यार्चींषि । तयोर्भासोः संगमं दृष्ट्वा वदति—संयतते—इति ॥ (१)

पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश ।
वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तम् ॥

[1] Read जातः

[2] Read वैश्वानरः.

[3] Read पार्थिवस्याग्नेरर्चींष्युत्तिष्ठन्ति.

[4] N. VII. 22 cites this verse; but the passage is not found under that verse.

पृष्टः । पृष्टः संस्पृष्टो भवति । अयं दिवि तथा भूम्यां चाग्निः तथा पृष्ट एव विश्वा ओषधीराविवेश । सोऽयं[1] वैश्वानरे[2]ऽग्निर्बलेन संपृक्तः । सोऽस्मानह्नि रात्रौ च रक्षस[3] इति ॥

दिवि द्युलोके संस्पृष्टो भूम्यां च पृष्ट एव विश्वा ओषधीराविवेश । वैश्वानरो बलेन संपृक्तोऽस्मानह्नि रात्रौ च हिंसकाद्रक्षतु ॥ (२)

**वैश्वानर तव तत्सत्यमस्त्वस्मान् रायो मघवानः सचन्ताम् ।**
**तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥**

वैश्वानर । वैश्वानर तव तत् सत्यं कर्मास्मासु भवतु । अस्मान् रायः पुत्रा धनवन्तः सेवन्तामिति[4] ॥

वैश्वानर तव तत् सत्यं कर्म स्तोतृषु भवतु । अस्मान धनानि धनवन्तश्च सेवन्ताम् ॥ (३)

---

**जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः ।**
**स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥**

जातवेदसे । मारीचः काश्यपः । कुत्सेनौषसो द्रविणोदाश्शुचिर्वैश्वानर[5] इति क्रमेणाग्नयः स्तुताः । तदनन्तरं जातवेदस्य[6] काश्यपार्षं इहा-

[1] यं mostly worm-eaten.

[2] Read वैश्वानरो.

[3] Perhaps to read रक्षतु.

[4] Here there is the figure 4 to mark the end of the Sūkta.

[5] Folio 69*b* ends with द्रविणोदाश्शु.

[6] Read जातवेदस्यं.

म्नात[1] इत्याहुः । निरुक्ता[2]—जातवेदा जातानि वेद जातानि चैनं सिदु-ज्जाते[3] जाते वियत इति वा जातधनो[4] वा जातप्रज्ञो वा धत्तजजाता पशूनविन्दतत[5] । जातवेदसे । जातवेदस्त्वम् -इत्यादिब्राह्मणमित्यादि[6] । मस्मै[7] सुनवाम सोमम् । सोऽरातीयतोऽप्रदानमाचरतः शत्रोर्निर्दयाति[8] भस्मीकरोति धनम् । स रोऽति[9] पर्षत् सर्वाणि दुर्गमाणि[10] स्थानानि । यथा कश्चित् कर्णाधारो नवा[11] सिन्धुमतिपारयति तथा दुरितानि चाति-पारयतु । दुरिता[12] दुःखानीति[13] ॥

कश्यपो मारीचः । जातधनाय सुनवाम सोमम् । सोऽरातित्वमिच्छतो भस्मीकरोति धनम् । सोऽस्मान् विश्वानि दुर्गाणि स्थानानि नावा नदीमिव कर्णधारोऽतितरतु दुःखानि च ॥ (१)

---

[1] Read इहाम्नातं.

[2] Read निरुक्तम् .

[3] Reading uncertain Perhaps to read विदुर्जाते

[4] Looks more like म्मातधनो.

[5] After जातप्रज्ञो वा the leaf is worm-eaten and the letters, so far as they are seen, are noted. See N. 17. 19.

[6] Read only इत्यादिब्राह्मणम् .

[7] Read तस्मै.

[8] Read शत्रोर्निर्दहाति.

[9] Read नोऽति.

[10] Read दुर्गमानि or only दुर्गाणि.

[11] Read कर्णधारो नावा.

[12] Read दुरितानि.

[13] Here there is the figure 5 to mark the end of the Sūkta.

**स यो वृषा॒ वृष्ण्ये॑भिः॒ समो॑का म॒हो दि॒वः पृ॑थि॒व्याश्च॑ स॒म्राट् ।
स॒ती॒नस॑त्वा॒ हव्यो॒ भरे॑षु म॒रुत्वा॑न्नो भवत्विन्द्र॑ ऊ॒ती ॥**

स यः । अस्य सूक्तस्य ऋज्राश्वादय ऋषयः । तेषां गोत्रं चोत्तरत्र वक्ष्यते । तत्रोत्तरेण सूक्तेन मरुत्वन्तमिन्द्रं कुत्सस्तोष्यति । तत्प्रसङ्गात्ततः प्रागेव सूक्तमिदमाम्नातम् । तत्रैतदवगन्तव्यम् । बहूवृषीकेषु सूक्तेषु एकः प्रधानो द्रष्टा । अन्ये तु प्रोत्साहका इति । तथा च

ऋज्राश्वः प्रष्टिभिः[1]

इत्यृज्राश्वस्यैव प्राधान्यमिह श्रुतम् । तथाच

त्वन्नो अग्ने महोभिः

इति सूक्ते[2] पुरुमीळ्होस्यैव[3] द्रष्टृत्वम् । अजमीळ्हेस्तु पुरुमीळ्हंस्तुतीत्येतावदुवाचेति[4] शाट्यायनकोनोक्तमिति[5] । स यो वृषा वीर्यैः संगतो महतो दिवः पृथिव्याश्च सम्रारः[6] । सतीनसत्वा शूरः । सत्वानि येन बद्धानि । सतीनं सिनाते । हव्यः संग्रामोषु[7] । स मरुत्वानिन्द्रो भवत्वस्माकं रक्षणाय ॥

ऋषयः तेषां गोत्रं च सूक्ते भविष्यन्ति । स यो वर्षिता वर्षणकुशलैर्मरुद्भिः सहितो महतो दिवः पृथिव्याश्च ईशानः । सतीनबलो ह्वातव्यः संग्रामेषु । मरुत्वान्नो भवत्विन्द्रोऽस्मिन् युद्धे रक्षणाय ॥ (१)

[1] Verse 17 in this Sūkta.
[2] R. V. 8. 71.
[3] Read पुरुमीळ्हस्यैव.
[4] Reading not certain.
[5] Read शाट्यायनोक्तमिति.
[6] Read सम्राट्.
[7] Read संग्रामेषु.

**यस्यानाप्तः सूर्यस्येव यामो भरेभरे वृत्रहा शुष्मो अस्ति ।**
**वृषन्तमः सखिभिः स्वेभिरेवैर्मरुत्वान्नो भवत्विन्द्र ऊती ॥**

यस्य । यस्यानाप्तोऽन्यैः । सूर्यस्यैव[1] यामो गति[2] । संग्रामेषु शुष्मो भवत्यन्यैरनाप्तश्शत्रुहा । वसितृतमः[3] सखीभिर्मरुद्भिर्गमनशीलैः संयुक्त इति ॥

यं गच्छन्तं सूर्यमिवान्ये न व्याप्नुवन्ति । यस्य वा संग्रामे संग्रामे शत्रुहन्तृ बलमस्ति । वर्षितृतमः स्वैः सखिभिर्गन्तृभिर्मरुद्भिः सहितः ॥ (२)

**दिवो न यस्य रेतसो दुघानाः पन्थासो यन्ति शवसापरीताः ।**
**तरद्द्वेषाः सासहिः पौंस्येभिर्मरुत्वान्नो भवत्विन्द्र ऊती ॥**

दिवः । आदित्यस्यैव यस्य रेतसो रेतांसि स्युः । तानि दुघाताः[4] । षष्ठ्येकवचनं वा कर्मणि । पन्थासः पततेः । दीप्तयो रश्नि[5] शवसाहसहिताः[6] परैरपरिवृताः । सोऽयं तरच्छत्रुरभिभविता बलैरिति ॥

द्युलोकस्येव यस्योदकानि रक्षन्तो रश्मयो यन्ति बलेन शत्रुभिरपरिवृताः । स तीर्णशत्रुः सहनशीलो बलैः ॥ (३)

**सो अङ्गिरोभिरङ्गिरस्तमो भूद्वृषा वृषभिः सखिभिः सखा सन् ।**
**ऋग्मिभिर्ऋग्मी गातुभिर्ज्येष्ठो मरुत्वान्नो भवत्विन्द्र ऊती ॥**

[1] Read सूर्यस्येव.
[2] Read गतिः
[3] Read वर्षितृतमः
[4] Read दुघानाः
[5] Read यन्ति.
[6] Read शवसा सहिताः

सः । ये गच्छन्ति तेऽङ्गिरसः शीघ्रगतयः । तेभ्योऽप्ययमतिशयेन गच्छति । वर्षिता वर्षितृभ्यः । अपि च सखा सखिभ्यः । ऋग्मिभिरर्चनीये-भ्योऽप्यर्चनीयः । गातव्येभ्योऽपि श्रेष्ठो गातव्य इति ॥

सोऽङ्गिरोभिः अङ्गिरस्सु जातोऽङ्गिरोभ्यो वरिष्ठोऽभवदिन्द्रः पुमांश्च पुंभ्योऽतिशयेन सखा सखिभ्यः स्तोतव्येभ्यः स्तोतव्यो गातव्येभ्योऽप्यतिशयेन गेयः ॥ (४)

**स सूनुभिर्न रुद्रेभिर्ऋभ्वा नृषाह्ये सासह्वाँ अमित्रान् ।**
**सनीळेभिः श्रवस्यानि तूर्वन् मरुत्वान्नो भवत्विन्द्र ऊती ॥**

स सूनुभिः । सु[1] पुत्रैरिव मरुद्भिः महान् युद्धेऽभिभवन् सपत्नान् सपत्नान्[2] समाननिलयैर्मरुद्भिः श्रवस्यन्युदकानि[3] प्रेरयन्तीति ॥

स पुत्रैरिव मरुद्भिर्भासमानोऽभिभवन् शत्रून् युद्धे समानस्थानैर्मरुद्भिः अन्ननिमित्तान्युदकानि प्रेरयन् ॥ (५)

**स मन्युमीः समदनस्य कर्तास्माकेभिर्नृभिः सूर्यं सनत् ।**
**अस्मिन्नहन्त्सत्पतिः पुरुहूतो मरुत्वान्नो भवत्विन्द्र ऊती ॥**

स मन्युमिम[4] । अपिवाभिमानस्य[5] हिंसक इन्द्रो मन्युमीः । मन्युं यो मिमाय इति । समदनस्य संग्रामस्य कर्ता । अस्मदीयैर्नृभिः सूर्यं

[1] Read स.

[2] Folio 70*a* ends here. Repetition of the word not wanted.

[3] Read श्रवस्यान्युदकानि.

[4] Read मन्युमीः

[5] One explanation seems missing, before this alternative one. First written अभि and पि written below भि, with a dot above भि to delete it,

संयोजयतु । परकीयैरन्धकारम् । अस्मिन्नहन् सत्पतिः पुरुहूत इति । शत्रुभिरपहृतासु गोषु युद्धार्थं निर्गच्छन्तः सूक्तमिदं ददृशुः ॥

स शत्रूणामभिमातिहा संग्रामस्य कर्ता अस्मदीयैर्भटैः सूर्यं संयोजयत्वस्मिन् युद्धदिवसे सत्पतिः पुरुहूतः ॥ (६)

**तमूतयो रणयञ्छूरसातौ तं क्षेमस्य क्षितयः कृण्वत त्राम् ।**
**स विश्वस्य करुणस्येश एको मरुत्वान्नो भवत्विन्द्र ऊती ॥**

तम् । तं मरुतो रमयन्ति युद्धे । तं रक्षणीयस्य मनुष्याः कुर्वन्ति त्रातारम् । स विश्वस्य कर्मण एक एवेष्टे ॥

तं मरुतो रमयन्ति युद्धे । तमेव क्षेमस्य त्रातारं मनुष्या अकृण्वत । स विश्वस्य कर्मण एक एवेष्टे ॥ (७)

**तमप्सन्त शवस उत्सवेषु नरो नरमवसे तं धनाय ।**
**सो अन्धे चित्तमसि ज्योतिर्विदन्मरुत्वान्नो भवत्विन्द्र ऊती ॥**

तमप्लुन्ता[1] । तमाप्नुवन्ति बलव्योद्योगेषु[2] नरो नरमवसेऽन्नार्थं रक्षणार्थं वा । स संग्रामेऽभिभावुके तमसि सञ्जाते प्रकाशं संभवति[3] ॥

तं व्याप्नुवन् बलस्योद्योगेषु मनुष्या नेतारं रक्षणार्थम् । स युद्धेऽन्धे तमसि संजाते प्रकाशं लम्भयति ॥ (८)

**स सव्येन यमति व्राधतश्चित्स दक्षिणे संगृभीता कृतानि ।**
**स कीरिणा चित्सनिता धनानि मरुत्वान्नो भवत्विन्द्र ऊती ॥**

[1] Read तमप्सन्त.

[2] Read बलस्योद्योगेषु.

[3] Read लम्भयति,

स सव्येन । स सव्येन नियच्छति । प्रायतो[1] हिंसतश्चित् । अपिच सु[2] दक्षिणेन हस्तेन यजमानैः कृतानि हवींषि गृह्णाति । दक्षिणा-शब्दा[3] तृतीयाया एकारः । सप्तम्यन्तमाद्युदात्तम् ।

हस्ते दधे दक्षिणे

इति[4] । किरिः[5] किरतेर्भ्रमणार्थात् । स कीरिणा मरुद्गणेन सहंभक्ता[6] धनानि ॥

स वामेन हस्तेन अभिवर्धमानान् शत्रून् नियच्छति । स दक्षिणे हस्ते यजमानैः कृतानि हवींषि संगृह्णाति । स स्तोतारमुद्दिश्य भजते शत्रुधनानि ॥ (९)

**स ग्रामेभिः सनिता स रथेभिर्विदे विश्वाभिः कृष्टिभिर्न्वऽद्य ।**
**स पौंस्येभिरभिभूरशस्तीर्मरुत्वान्नो भवत्विन्द्र ऊती ॥**

सं[7] ग्रामेभिः । सं[7] ग्रामेभिर्गणैः मरुतां सनिता भवति सरथैश्च । ज्ञायते च विश्वैर्मनुष्यैः क्षिप्रमुपस्थितोऽस्मिन्नहनि । स बलेरभि[8]भूर्भवति । शत्रूनिति ॥ •

स सैनिकैर्भजते शत्रून् स रथैः । ज्ञायते च विश्वैर्मनुष्यैरस्मिन्नहनि क्षिप्रम् । स बलैरभिवति शत्रून् ॥ (१०)

[1] Read वाघतो.

[2] Read स.

[3] Read दक्षिणाशब्दात्.

[4] R. V. 3. 39. 6.

[5] Read कीरिः

[6] Read संभक्तानि.

[7] Read स in both places.

[8] Read बलैरभि.

**स जामिभिर्यत्समजाति मीळ्हेऽजामिभिर्वा पुरुहूत एवैः ।**
**अपां तोकस्य तनयस्य जेषे मरुत्वान्नो भवत्विन्द्र ऊती ॥**

स जामिभिः । जामयो जमन्तेर्गत्यर्थात्[1] सखायः । सखिभिर्यति[2] संगच्छन्ते संग्रामे । अजामिभिर्वा पुरुहूतो नृभिः । तेषां पुत्रस्य च जयाय भवति । लभन्ते वः पुत्रं च पौत्रं चेति ।

आसु ष्मा णः

इत्यत्र[3] अपान्तोकस्य इति पादो[4] न सृष्टः । तत्र नू न जेषे इति[5] ॥

स बन्धुभिर्यदि संगच्छते संग्रामे अजामिभिर्वा पुरुहूतो मरुद्भिः । अपां पुत्रस्य पौत्रस्य च जयाय भवति । लम्भयति वृष्टिं पुत्रपौत्रौ च रक्षति ॥ (११)

**स वज्रभृद्दस्युहा भीम उग्रः सहस्रचेताः शतनीथ ऋभ्वा ।**
**चम्रीषो न शवसा पाञ्चजन्यो मरुत्वान्नो भवत्विन्द्र ऊती ॥**

सं[6] । स वज्रभृद्दस्युहा नीम[7] उद्गूर्णो बहुप्रज्ञो बहुस्नुति[8] बहुमार्गो वा दीप्तः सोम इव शवसा युक्तः पञ्चजनहित इति ॥

[1] Read जमतेर्गत्यर्थात्.
[2] Read सखिभिर्यन्ति.
[3] R. V. 6. 44. 16.
[4] Third Pāda.
[5] Not clear.
[6] Read सः
[7] Read भीम.
[8] Read बहुस्तुतिः

स वज्रभृदसुराणां हन्ता भयंकर उद्गूर्णः सहस्रप्रज्ञः शतनयनो दीप्तः सोम इव बलेन पञ्चजनहितः ॥ (१२)

**तस्य॒ वज्रः॑ क्रन्दति॒ स्मत्स्व॒र्षा दि॒वो न त्वे॒षो र॒वथः॒ शिमी॑वान् ।**
**तं स॑चन्ते स॒नय॒स्तं धना॑नि म॒रुत्वा॑न्नो भव॒त्विन्द्र॑ ऊ॒ती ॥**

तस्य । तस्य वज्रः शब्दं करोति स्मत् प्रशस्तमुदकस्य दाता दिवो नभस इव दीप्तो वायुः कर्मवान् । तं स्सेवन्ते[1] वतस्य[2] दानानि तथा धनानि ॥

तस्य वज्रः शब्दं करोति शोभन इव दीप्तशब्दः कर्मवान् । तं सेवन्ते दानानि । तं धनानि ॥ (१३)

**यस्याज॑स्रं॒ शव॑सा॒ मान॑मु॒क्थं प॑रिभु॒जद्रोद॑सी वि॒श्वतः॑ सीम् ।**
**स पा॑रिष॒त्क्रतु॑भिर्मन्दसा॒नो म॒रुत्वा॑न्नो भव॒त्विन्द्र॑ ऊ॒ती ॥**

यस्य । यस्याजस्रं शवसा युक्त[3] मानं तेजश्शरीरं वा प्रशस्यम् । परिभुजात्[4] आवृणोद्रोदसी सर्वत एतएवैते[5] । सोमात्[6] पारयतु कर्मभिर्मोदमान इति ॥

यस्यानवरतं शवसा मानमतिप्रशस्यं परिभुजत् । द्यावापृथिव्यौ सर्वत एव परिगृह्य स्वयमेव द्यावापृथिव्योरीश्वरो भवति । स पारयतु कर्मभिर्मोदमानोऽस्मान् ॥ (१४)

[1] Read सेवन्ते.
[2] Read only तस्य.
[3] Read युक्तं.
[4] Read परिभुजत्.
[5] Perhaps to read only सर्वत एव.
[6] Read सोऽस्मान्.

न यस्य॑ दे॒वा दे॒वता॒ न मर्ता॒ आप॑श्च॒न शव॑सो॒ अन्त॑मा॒पुः ।
स प्र॒रिक्वा॒ त्वक्ष॑सा॒ क्ष्मो दि॒वश्च॑ म॒रुत्वा॑न्नो भव॒त्विन्द्र॑ ऊ॒ती ॥

न यस्य । देवता । देवस्येत्यर्थः । न यस्य देवा देवस्य । नापि मर्त्या आपोऽपि बलस्यान्तमापुः । स प्रकर्षेण[1] रेचको बलेन द्यावापृथिव्योः इति ॥

न यस्य देवा ईश्वरा भवन्ति देवत्वस्य । नापि मर्त्याः । आपोऽपि बलस्यान्तं नापुः । स प्ररेचको बलेन द्यावापृथिव्योः ॥ (१५)

रो॒हिच्छ्या॒वा सु॒मदं॑शुर्ल॒ला॒मीर्द्यु॒क्षा रा॒य ऋ॒ज्राश्व॑स्य ।
वृष॑ण्वन्तं॒ बिभ्र॑ती धू॒र्षु रथं॑ म॒न्द्रा चि॑केत॒ नाहु॑षीषु वि॒क्षु ॥

रोहित् । लोहितवर्णा । न्यावोष्ठपर्यन्तवर्णास्वतः[2] । सुमदंशुः प्रशस्तांशुः । ललामीः पुण्ड्रवती । द्युक्षा दीप्ता । राये धनाय[3] । ज्येष्ठस्य ऋज्राश्वस्य । वृषण्वन्तमिन्द्रेण संयुक्तं रथं धूर्षु बिभ्रती मन्द्राश्वा ज्ञायते नाहुषीषु विक्षु । रहुषो[4] मनुष्याः । व्रतनावस्विन्द्रः[5] प्रादुरभूदित्यर्थः ॥

पञ्चानां भ्रातॄणां अश्वा वर्णतो निदिश्यन्ते । रोहित् श्यावा कल्याणदीप्तिः पुण्ड्रवती दीप्ता ऋज्राश्वस्य ज्येष्ठस्य धनाय भवन्तु । वर्षवन्त ऋज्राश्वेनाधिष्ठितं रथं धूर्षु बिभ्रती मदयन्ती नहुषकुलजातासु प्रजासु ऋज्राश्वस्य बडवा प्रादुरभूत् ॥ (१६)

[1] Folio 70*b* ends here.

[2] This must be the meaning of श्यावा. The first two letters must be श्यावा.

[3] ध between ये and ना added below the line.

[4] Read नहुषो.

[5] Not clear.

**एतत्त्यत्त इन्द्र वृष्ण उक्थं वार्षागिरा अभि गृणन्ति राधः ।**
**ऋज्राश्वः प्रष्टिभिरम्बरीषः सहदेवो भयमानः सुराधाः ॥**

एतत्तत् । इदं तव वऋषितुः[1] इन्द्र उक्थं वृषागिरं[2] पुत्रा ऋश्वादयः[3] अभिगृणन्ति राधस्संराधनम् । इत्युक्त्वा तानुद्दिशति । ऋज्राश्वः प्रष्टिभिः पार्श्वस्थितैः सहाभिगृणाति । के ते प्रष्टयः तत्रोक्तम् । अम्बरीष इत्यादयः ॥

तदिदं तव वर्षितुरिन्द्रस्य स्तोत्रं वृषागिरः पुत्रा उच्चारयन्ति प्रीणनम् । ऋज्राश्वः पार्श्वयोः स्थितैः स्तोत्रमुच्चारयति । पार्श्वस्थानां नामानि अम्बरीष इति ॥ (१७)

**दस्यूञ्छिम्यूंश्च पुरुहूत एवैर्हत्वा पृथिव्यां शर्वा नि बर्हीत् ।**
**सनत्क्षेत्रं सखिभिः श्वित्न्येभिः सनत्सूर्यं सनदपः सुवज्रः ॥**

दस्यून् । उपक्षपयितॄन् वेभ्रुश्च[4] पुरुहूतो मरुत्[5] सह हत्वा शर्वा वज्रेण न्तिबहीत्[6] । हननमाहननम् । निबर्हणं तु छेदः । क्षेत्रमिति धननाम । भेजे धनम् । अपिवा क्षेत्रेमेव[7] । सखीभिः[8] श्वित्रेभिः[9] श्वेतैर्मरुद्भिः । सनत्सूर्यं तमसा तिरोहितम् । सतुनत्[10] उदकानि सुवज्र इति ॥

[1] Read वर्षितुः
[2] Read वृषागिरः
[3] Read ऋज्राश्वादयः
[4] Read वेद्भूंश्च.
[5] Read मरुद्भिः
[6] Read निबर्हीत्. The word पृथिव्यां is not explained.
[7] Read क्षेत्रमेव.
[8] Read सखिभिः
[9] Read श्वित्न्येभिः
[10] Read सनत्.

उपक्षपयितॄन् भेत्तॄंश्च पुरुहूतो मरुद्भिः सह हत्वा पृथिव्यां हिंसको निबर्हयतु । हन्तिर्गमनार्थः । प्रयच्छतु क्षेत्रं मरुद्भिः प्रवृद्धैः । सनत् सूर्यं सनदुदकानि चेन्द्रः ॥ (१८)

**विश्वाहेन्द्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजम् ।**
**तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥**

विश्वाहा । सर्वदेन्द्रोऽस्मभ्यमधिवक्तास्तु । अपरिव्रताः[1] अनना[2] भजेमह्यन्नमिति[3] ॥

सर्वदेन्द्रोऽस्माकमधिवक्ता अस्तु । अहिंसिताः शत्रुभिर्भजेमहि अन्नम् ॥ (१९)

---

**प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना ।**
**अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हवामहे ॥**

प्रमन्दिने । कुत्सः । प्रार्चतोच्चारयत[4] मन्दिने इन्द्राय । पितुमद्धविष्मत् वयः[5] । य ऋजिश्वना राज्ञा सख्या सहितः कृष्णेनासुरेण निषिक्तगर्भास्तस्य भार्या निरहन् । कृष्णमसुरं हत्वा दस्य[6] . गर्भिणी[7]

[1] Read अपरिह्वृताः

[2] Word not clear.

[3] Here there is the figure 6 to mark the end of the sūkta.

[4] य before त is not at all legible.

[5] Read वचः.

[6] Read तस्य.

[7] Read गर्भिणीः.

भार्याश्च निरहन् । पुत्राणामप्यनत्पत्यक्षम् । स च कृष्णः शत्रु ऋजिह्वनम्[1] । रक्षणमिच्छन्तो वृषणं वज्रयुक्तदक्षिणहस्तं मरुत्वन्तं सख्याय हवामहे ॥

कुत्सः । प्रोच्चारयत माद्यते इन्द्राय सोमयुक्तं स्तोत्रम् । ऋजिश्वानं राजानमुद्दिश्य कृष्णासुरगर्भास्तद्भार्याश्च निरहन् । कृष्णो गर्भो यासां ताः कृष्णगर्भाः । ता हत्वा तेन भार्यासु निषिक्तान् गर्भानपि अहन् । पालनेच्छवो वर्षितारं वज्रयुक्तदक्षिणहस्तं मरुत्वन्तं सख्यसिध्यर्थं हवामहे । कुत्सस्येन्द्रः सखाभवत् इति आ दस्युघ्ना मनसा याह्यस्तम् इत्यत्रोक्तम् ॥ (१)

**यो व्यंसं जाहृषाणेन मन्युना यः शम्बरं यो अहन् पिप्रुमव्रतम् ।**
**इन्द्रो यः शुष्णमशुषं न्यावृणङ्मरुत्वन्तं सख्याय हवामहे ॥**

यः । यो व्यंसमसुरं वर्धमानेन मन्युना क्रोधेनाहन् । यः शंबरं अव्रतं पिप्रुं च । यश्च कृष्णमशूषम्[2] । न्यवृणगिति[3] छेदनकर्मा । शुष्णविशेषणमशुषमिति । तथानेकत्र सहश्रवणात् । आशुषः[4] शोषरहितः । यद्वाशुष इति तस्य गोत्रविशेषणम् । बहुशोभि सह श्रुतमिति[5] ।

यो व्यंसमसुरं विकसता क्रोधेनाहन् यः शम्बरं यो वा पिप्रुं अयजमानम् । इन्द्रो यः शुष्णमन्यैरशोष्यं निहतवान् ॥ (२)

[1] Passage from पुत्राणां not clear.

[2] Read कृष्णमशुषम् .

[3] Read न्यावृणगिति.

[4] Read अशुषः .

[5] Passage not clear.

**यस्य द्यावापृथिवी पौंस्यं महद्यस्य व्रते वरुणो यस्य सूर्यः ।**
**यस्येन्द्रस्य सिन्धवः सश्चति व्रतं मरुत्वन्तं सख्याय हवामहे ॥**

यस्य । यस्य रोदसी महद्धनं अनुवर्तते । यस्य कर्मणि वरुणो वर्तते । यस्य सूर्यः । यस्य चेन्द्रस्य सिन्धवः सश्चन्ति[1] भजन्ते कर्म । तदनुशिष्टा व[2] भवन्तीत्यर्थः ॥

यस्य द्यावापृथिव्यौ महद्वीर्यमनुवर्तेते । यस्य व्रते सूर्यो वरुणश्च व्यापृतौ भवतः । यस्येन्द्रस्य नद्योऽपि कर्म सश्चति अभिगच्छन्ति । छान्दसो नकारलोपः ॥ (३)

**यो अश्वानां यो गवां गोपतिर्वशी य आरितः कर्मणिकर्मणि स्थिरः ।**
**वीळोश्चिदिन्द्रो यो असुन्वतो वधो मरुत्वन्तं सख्याय हवामहे ॥**

यः । यो अश्वानां गवां च पतिः । यश्च तस्वतन्त्रः[3] । अत्र निरुक्तम्[4] । य आरितः प्रत्युत[5] स्तोमान् । कर्मणि कर्मणि स्थिरः । यच्छेन्द्रो[6] दृढस्याप्यसुरतो[7] हन्ता ॥

योऽश्वानां गवां च पतिः स्वतन्त्रः । यो वा संजातायुधो युद्धे युद्धे स्थिरः । यश्चेन्द्रो दृढस्याप्यसुन्वतो हन्ता ॥ (४)

[1] Read सश्चति.

[2] This letter not wanted.

[3] Read only स्वतन्त्रः.

[4] N. 5. 15.

[5] Read प्रत्यृतः.

[6] Read यश्चेन्द्रो.

[7] Folio 71*a* ends here. Read दृढस्याप्यसुन्वतो.

**यो विश्व॑स्य॒ जग॑तः प्राण॒तस्पति॒र्यो ब्र॒ह्मणे॑ प्रथ॒मो गा अवि॑न्दत् ।**
**इन्द्रो॒ यो दस्यूँ॒रध॑राँ अ॒वाति॑रन्म॒रुत्व॑न्तं स॒ख्याय॑ हवामहे ॥**

यः । यो विश्वस्य गच्छतः प्राणतस्पतिः । यश्च ब्रह्मणेऽङ्गिरोभ्यः पणिभिरपहृता गा[1] अविन्दत् । अन्येभ्योऽपि देवेभ्यः पूर्वमेव युद्धार्थं तत्र जगाम । यश्चेन्द्रो दस्यून् अधरान् अवातिरत् । अथा + +[2] यो हवन्ति हिंसा + वतिरतिरिति[3] ॥

यो विश्वस्य गच्छतः प्राणतश्च पतिः । यो वा अङ्गिरोभ्यः पूर्वमेव पशून-विन्दत् पणिभिरपहृतान् । इन्द्रो यो दस्यूनधरान् कृत्वा अपाहरत् ॥ (५)

**यः शूरे॑भि॒र्हव्यो॒ यश्च॑ भी॒रुभि॒र्यो धाव॑द्भिर्हू॒यते॒ यश्च॑ जि॒ग्युभि॑ः ।**
**इन्द्रं॒ यं विश्वा॒ भुव॑ना॒भि सं॑द॒धुर्म॒रुत्व॑न्तं स॒ख्याय॑ हवामहे ॥**

यः । यश्शूरैश्चातव्यो[4] यश्च भीरुभिः यश्च पलायमानेर्हूयते[5] यश्च जयशीलैर्हूयते यं चेन्द्रं सर्वाण्येव भूतानि स्वेषु स्वेषु कार्येष्वभिसन्दधुरिति ॥

यः शूरैर्भीरुभिश्च ह्वातव्यो यः पलायमानैर्हूयते यश्च जयशीलैः । इन्द्रं यं सर्वाण्येव भूतानि आत्मकार्यार्थं अभिसंदधुः ॥ (६)

**रु॒द्राणा॑मेति प्र॒दिशा॑ विचक्ष॒णो रु॒द्रेभि॒र्योषा॑ तनुते पृ॒थु ज्रयः॑ ।**
**इन्द्रं॑ मनी॒षा अ॒भ्य॑र्चति श्रु॒तं म॒रुत्व॑न्तं स॒ख्याय॑ हवामहे ॥**

[1] This word is not in the MS. Space for a letter is left blank here.

[2] Two letters are completely worm-eaten.

[3] Passage not clear. Letters mostly worm-eaten.

[4] Read यश्शूरैर्ह्वातव्यो.

[5] Read पलायमानैर्हूयते.

रुद्राणाम्। प्राणा वै रुद्राः । तेषां प्रदेशनेन विचक्षणो जानन्नमनुष्य[1] एति गच्छति । अपि च तैरेवाधिभूतमवस्थितैर्योषा माध्यमिका वाक् करोति महान्तं वेदमिति[2] साहचर्यान्मरुतां स्तुतिः । इन्द्रं वागभिष्टौति विश्रुतमिति ॥

मरुतां गच्छति मार्गप्रदर्शनेन विद्रष्टा मरुद्भिः संमिश्रयिता विस्तीर्णं वेगं करोति । इन्द्रं वागभिष्टौति ॥ (७)

**यद्वा मरुत्वः परमे सधस्थे यद्वावमे वृजने मादयासे ।**
**अत आ याह्यध्वरं नो अच्छा त्वाया हविश्चकृमा सत्यराधः ॥**

यद्वा । यदि वा मरुत्वः परमे स्थाने । यद्वावमे वृजने गृहे स्थाने माद्यसि यजमानान् सोमैः । अतोऽस्माकमध्वरमभ्यायाहि । त्वत्कामनया हविरिदं कृतवन्तो वयं सर्वस्तोत्र[3] ॥

यदि वा मरुत्वः परमे स्थाने दिवि यद्वा अवमे सधस्थे कस्मिंश्चन युद्धे माद्यसि । अत आयाहि अस्माकं यज्ञं प्रति । त्वत्कामनया हविश्चकृम सत्यधन ॥ (८)

**त्वायेन्द्र सोमं सुषुमा सुदक्ष त्वाया हविश्चकृमा ब्रह्मवाहः ।**
**अधा नियुत्वः सगणो मरुद्भिरस्मिन् यज्ञे बर्हिषि मादयस्व ॥**

त्वाया । त्वायेन्द्र सोमं सुतवन्तः सुबल । त्वाया हविश्चकृतः[4] स्तोत्रैरुह्यमान । अथ नियुत्वो हरिवः सुगणो[5] त्वं मरुद्भिरस्मिन् यज्ञे बर्हिष्याहीनो[6] मादयस्व ॥

[1] Read जानन्मनुष्य.

[2] Read वेगमिति.

[3] This is the meaning of सत्यराधः.

[4] Read हविश्चकृमः.

[5] Read सगणः.

[6] Read बर्हिष्यासीनो.

त्वायेन्द्र सोमं सुतवन्तः शोभनबल । त्वाया पुरोडाशं च कृतस्तोत्र । अथाश्ववन् मरुद्भिः सहितोऽस्मिन् यज्ञे बर्हिषि आसीनः तृप्य ॥ (९)

**मादयस्व हरिभिर्ये त इन्द्र वि ष्यस्व शिप्रे वि सृजस्व धेने ।**
**आ त्वा सुशिप्र हरयो वहन्तूशन् हव्यानि प्रति नो जुषस्व ॥**

माद्याश्वैस्सह[1] । ए[2] तव स्वभूता इन्द्र विष्यस्य[3] शिप्रै[4] हनू सोमपानार्थं संहते विवृते कुरु । विसृजस्व च धने[5] जिह्वामुपजिह्विकां च । आवहन्तु त्वां सुहनो हरयः । कामयानः हव्यान्यस्माकं प्रति जुषस्व ॥

मादयस्वाश्वैः सह ये तवाश्वाः स्वभूताः सोमपानार्थं हनू मोचय विसृजस्व च जिह्वोपजिह्विके । सुहनो त्वामावहन्तु हरयः । कामयमानो हव्यान्यस्माकं प्रति सेवस्व ॥ (१०)

**मरुत्स्तोत्रस्य वृजनस्य गोपा वयमिन्द्रेण सनुयाम वाजम् ।**
**तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥**

मरुत्स्तोत्रस्य । मरुद्भिस्सह यस्य स्तोत्रं भवति स मरुत्स्तोत्रः । तस्य पृजनस्य[6] सपत्नानां[7] चेत्तुर्गोपा[8] गोपनीया वयम् । तेनेन्द्रेण लभेमाप्यन्तमिति[9] ॥

[1] Pratika not separately given. Read मादयाश्वैस्सह.

[2] Read ये.

[3] Read विष्यस्व.

[4] Read शिप्रे.

[5] Read धेने.

[6] Read वृजनस्य.

[7] Read सपत्नानां.

[8] Read छेत्तुर्गोपा.

[9] Read लभेमान्नमिति । Here there is the figure 7 to mark the end of the Sūkta.

मरुद्भिः सहितं स्तोत्रं यस्य शत्रूणां छेत्तुः तस्य गोप्या वयम् । तेनान्नं लभेमहि ॥ (११)

---

**इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे ।**
**तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवासः शवसामदन्ननु ॥**

इमां[1] ते स्तुतिं प्रभरे महतो महतीम् । अस्य स्तोतुः स्तोत्रे बुद्धि[2] यस्मात्तवानजे करोति प्राप्तिम्[3] । तमुत्सवार्थं प्रसवार्थं चावाम्[4] । अपिवा धनानां अभिभवितारमिन्द्रं देवासः स्तोतारः शवसा बलेन कीर्तितेनान्वमदन्तीति[5] ॥

इदं ते कर्म प्रभरामि महतो महदस्य कुत्सस्य स्तोत्रे तव बुद्धिर्यस्मादागता । तमिन्द्रं युद्धापवर्गे उपक्रमे च शत्रूणां सहनशीलमिन्द्रं देवा बलं दृष्ट्वा अन्वमदन् मरुतः ॥ (१)

**अस्य श्रवो नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी दर्शतं वपुः ।**
**अस्मे सूर्याचन्द्रमसाभिचक्षे श्रद्धे कमिन्द्र चरतो वितर्तुरम् ॥**

अस्य । स्य[6] कीर्तिं सप्त नद्यो धारयन्ति । पृथिवीत्यन्तरिक्षनाम । त्रयो लोका धारयन्ति अस्य दर्शनीयं रूपम् । अस्माकं सूर्याचन्द्रमसामभि-

[1] Pratika not separately given.

[2] Read बुद्धिः.

[3] Read प्राप्तम्.

[4] Read च. Perhaps the word after च is अपाम्.

[5] Read अन्वमदन्निति.

[6] Read अस्य. Perhaps what is written is अस्यास्य. Some letter seems to have been damaged between अस्य and स्य.

द्राशनार्थं[1] च द्रव्याणाम्[2] । श्रद्दधति हि दृष्टे चक्षुषा सत्यमिदमिति । चरतः । वितर्तुरमिति क्षिप्रनाम । कर्मव्यतिहारार्थमुपसर्गमेके[3] ॥

अस्य कीर्तिं सप्त नद्यो धारयन्ति । द्यावाभूम्यावन्तरिक्षं च दर्शनीयं रूपं धारयन्ति । अस्माकं सूर्याचन्द्रमसाविन्द्रप्रेरितौ अभिदर्शनाय सत्यत्वं श्रद्धातुं शीघ्रश्चरतः । कमिति पूरणम् ॥ (२)

**तं स्मा रथं मघवन् प्राव सातये जैत्रं यं ते अनुमदाम संगमे ।**
**आजा न इन्द्र मनसा पुरुष्टुत त्वायद्भ्यो मघवञ्छर्म यच्छ नः ॥**

तम् । तं स्म रथं मयवन्[4] प्रेरय धनार्थम् । जैत्रं यं ते स्वभूतं वयं स्तुमः संगमे । संग्रामे पुयुद्धे अस्माकमिन्द्र मना[5] पुरुष्टुत त्वत्कामेभ्यो[6] मघवन् सुखं प्रयच्छ । पुनर्मः[7] पूरणमिति ॥

तं स्मा रथं मघवन् प्रतिगच्छ धनं दातुं जैत्रं यं त्वदीयं वयं स्तुमः संगमे । संग्रामे अस्मभ्यं मनसा बहुस्तुत त्वत्कामेभ्यः सुखं प्रयच्छ । पुनर्नः पूरणः ॥ (३)

**वयं जयेम त्वया युजा वृतमस्माकमंशमुदवा भरेभरे ।**
**अस्मभ्यमिन्द्र वरिवः सुगं कृधि प्र शत्रूणां मघवन् वृष्ण्या रुज ॥**

[1] Read सूर्याचन्द्रमसावभिदर्शनार्थं.

[2] The sentence is incomplete. Perhaps two words like श्रद्धार्थं च to be added.

[3] Folio 71*a* ends with सर्गमे.

[4] Read मघवन्.

[5] Read मनसा.

[6] Read त्वत्कामेभ्यो.

[7] Read पुनर्नः.

वयम् । मवय[1] जयेम त्वया सहायेन वृतं वृत्रं[2] शत्रुमस्माकमंशं[3] रक्ष संग्रामे संग्रामे । अपिवा धनमेवांशः[4] । अस्मभ्यमिन्द्र धनं सुगं अनायासलभ्यम्[5] । प्रऋज[6] शत्रूणां वीर्याणि मघवन् ॥

वयं जयेम त्वया सहायेनाभिकांक्षितं धनमस्माकमंशं त्वमुद्गमय संग्रामे । अस्मभ्यमिन्द्र धनं शोभनगमनं कुरु । प्ररुज शत्रूणां वीर्याणि मघवन् ॥ (४)

**नाना हि त्वा हवमाना जना इमे धनानां धर्तरवसा विपन्यवः ।**
**अस्माकं स्मा रथमा तिष्ठ सातये जैत्रं हीन्द्र निभृतं मनस्तव ॥**

नाना । नाना हि त्वा हवमाना भवन्ति जना इमे । धनानां धर्तरवसा रक्षणार्थं स्तोतारः । तत्र त्वमस्माकमेव रथमातिष्ठ धनार्थम् । जैत्रं हीन्द्र निभृतश्चवमनोऽव्याकुलन्निवृतमिति[7] ॥

तत्र तत्र हि त्वामाह्वयमाना इमे जना धनानां धर्तरिन्द्र रक्षणार्थं मेधाविनः । तत्र त्वमस्माकं भजनाय रथमातिष्ठ । जयशीलं हि युयुत्सतस्तव मनोऽविचालि च ॥ (५)

[1] Read वयम्.

[2] What is written is व्रतं व्रत्रं; this confusion of ऋ and र is quite common. Anusvāra after वृत्र and the following श worm-eaten completely.

[3] First written स्माकं शं; then म added below line between क and Anusvāra.

[4] What is written is शं; sometimes an Anusvāra is not much different from visarga. At other times anusvāra is written as a full म.

[5] Add कुरु as the meaning of कृधि.

[6] Read प्ररुज.

[7] Perhaps to read निभृतं तव मनोऽव्याकुलं निर्वृतमिति.

**गोजिता बाहू अमितक्रतुः सिमः कर्मन्कर्मञ्छतमूतिः खजंकरः ।**
**अकल्प इन्द्रः प्रतिमानमोजसाथा जना वि ह्वयन्ते सिषासवः ॥**

गोजिता । गोजितौ तव बाहू । त्वममितप्रज्ञप्सिश्च[1] पञ्चमेऽहनि । शाट्यायनम्—सिम इति वै श्रेष्ठमाचक्षते इति । कर्मन्[2] कर्मणि बहुरक्षणो युद्धकृत् । अकल्प इन्द्रः स्वतन्त्रः । यस्य कल्पको नान्यः । इन्द्रः प्रतिमोनमाजसा[3] यत् सर्वेषामोजस्तेन प्रमीयमानः । यद्वा ओजसेति षष्ठ्या आकारः । तेनैनं जाना[4] विह्वयन्ते धनं संविभक्तुमिच्छन्तः ॥

पशूनां जेतारौ बाहू भवतोऽमितप्रज्ञश्च भवसि बन्धकः कर्मणि कर्मणि बहुरक्षः युद्धस्य कर्ता । अनुपमो बलेन सर्वेषां प्रतिद्वन्द्वि भवति । अथैनं जना विह्वयन्ते संभक्तुमिच्छन्तः ॥ (६)

**उत्ते शतान्मघवन्नुच्च भूयस उत्सहस्राद्रिरिचे कृष्टिषु श्रवः ।**
**अमात्रं त्वा धिषणा तित्विषे मह्यधा वृत्राणि जिघ्नसे पुरंदर ॥**

उत्केः[5] । कृष्टिषु मनुष्येषु त्वया दीयमानमन्नमत्यन्तं महदिति पूर्वार्धार्थः । अमात्रन्तन्त्वा[6] स्तुतिर्दीपयति महती[7] । स्तुतस्वं[8] शत्रून् जिघ्रसे[9] पुरन्दर ॥

[1] Read त्वममितप्रज्ञस्सिमश्च.
[2] Read कर्मणि.
[3] Read प्रतिमानमोजसा.
[4] Read जना.
[5] Read उत्ते.
[6] Read अमात्रं त्वा.
[7] Read महती.
[8] Read स्तुतस्त्वं.
[9] Read जिघ्नसे.

संग्रामे मनुष्यशतस्य या कीर्तिर्भवति ततोऽप्यतिरिक्तं तव यशः। उत च द्विशतात् त्रिशताच्च उत सहस्राच्च मनुष्यमध्ये। त्वामपरिमाणबलं महती स्तुतिर्दीपयति। अथ त्वं शत्रून् हंसि पुराणां दारयितः॥ (७)

**त्रिविष्टिधातु प्रतिमानमोजसस्तिस्रो भूमीर्नृपते त्रीणि रोचना।**
**अतीदं विश्वं भुवनं ववक्षिथाशत्रुरिन्द्र जनुषा सनादसि॥**

त्रिविष्टि। धातुशब्दो रज्जुवचनः। त्रिगुणा रज्जुतरतिदृढं[1] ब्रूते प्रतिमानमोजसः। स त्वं त्रीं[2] लोकांस्त्रीणि च तेजांस्यतिवहसि। तथा विश्वं चेदं भुवनंसत्वम्[3]। अशत्रुरिन्द्र स्वत एव भवसि चिरादारभ्येति॥

त्रिभिः शुल्बैर्निर्मिता रज्जुर्दृढतरा अच्छेद्या भवति। तादृश इन्द्र ओजसश्च प्रतिद्वन्द्वी भवति। तादृशस्त्वं नृणां स्वामिन् तिस्रो भूमीः त्रीणि च तेजांसि अति वहसि। किं बहुना सर्वं भुवनमति वहसि। जन्मनैव चिरात् प्रभृति शत्रुवर्जितो भवसि॥ (८)

**त्वां देवेषु प्रथमं हवामहे त्वं बभूथ पृतनासु सासहिः।**
**सेमं नः कारुमुपमन्युमुद्भिदमिन्द्रः कृणोतु प्रसवे रथं पुरः॥**

त्वाम्। पूर्वार्धः स्पष्टः। परोक्ष उत्तरार्धः। स इन्द्रो साकं[4] स्तोतारं कर्तारं कर्तारं[5] उपमन्तारमुद्भेत्तारं च शत्रूणां करोतु पुत्रम्। अपि च रथं पुरस्करोतुं[6] प्रसवे युद्धोपक्रमे। रथविशेषणानि वा पूर्वाणीति॥

[1] Read रज्जुरतिदृढं.

[2] Read त्रीन्.

[3] Perhaps what is written is भुवनंस्त्वम् and to read भुवनं त्वम्। It looks अतिवहसि is to be added after this.

[4] Read इन्द्रोऽस्माकं.

[5] Perhaps to read स्तोतारं कर्तारं वा.

[6] Read पुरस्करोतु.

त्वां देवानां मध्ये प्रथमं हवामहे। त्वमभवः संग्रामेषु सोढा। स इन्द्रोऽस्माकं कर्तारमुपमन्तारमुद्भेदकमात्मीयं रथं युद्धारम्भेऽग्रतः कृणोतु ॥ (९)

**त्वं जि॑गेथ॒ न धना॑ रुरोधि॒थार्भे॒ष्वाजा म॑घवन् म॒हत्सु॑ च।**
**त्वामु॒ग्रमव॑से॒ सं शि॑शीमु॒स्यथा॑ न इन्द्र॒ हव॑नेषु चोदय ॥**

त्वम्। त्वं जसि[1] शत्रून्। न च धनानि रुणत्सि। तं त्वां क्षुद्रेषु संग्रामेषु मघवन् महत्सु वोद्गूर्णं रक्षणार्थं स्तोत्रैः तीक्ष्णीकुर्मः। स त्वमिन्द्रः अस्मान् ह्वानेषु सत्सु चोदय संग्रामेषु[2] ॥

त्वं जयसि। न च धनानि रुणत्सि क्षुद्रेषु मघवन् महत्सु च पुरुषेषु। यः संग्रामोऽस्माकं भवति तस्मिन् त्वामुद्गूर्णं रक्षणाय स्तोत्रैस्तीक्ष्णीकुर्मः। अथास्मानिन्द्र तस्मिन् संग्रामे स्वयमेव चोदय हवनेषु सत्सु ॥ (१०)

**वि॒श्वाहेन्द्रो॑ अधिव॒क्ता नो॑ अ॒स्त्वप॑रिह्वृताः सनुयाम॒ वाज॑म्।**
**तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑तिः॒ सिन्धुः॑ पृथि॒वी उ॒त द्यौः ॥**

---

**तत्त॑ इन्द्रि॒यं प॑र॒मं प॑रा॒चैरधा॑रयन्त क॒वयः॑ पु॒रेदम्।**
**क्ष॒मेदम॒न्यद्दि॒व्य१॒॑न्यद॑स्य॒ समी॑ पृच्यते सम॒नेव॑ के॒तुः ॥**

[1] Read जयसि.

[2] Here there is the figure 8 to mark the end of the sūtra. The next verse, being a refrain, is not explained.

तत्ते । तत्ते बलमुत्तमं पराचैः पराचीनं ततोमुखं[1] अपराङ्मुखम् । अधारयन्त कवयः पुरेदं[2] हृदयेन[3] । क्षमायामिदमन्यत् ज्योतिरग्न्याख्यं दिव्यन्यत्[4] सूर्याख्यम् । तदिदमुभयं संगच्छतेऽग्निः । यथा युद्धे संयत्तयोः केतुः केतुनेति ॥

तत्तव बलमुत्तममपराङ्मुखं अधारयन्त प्राज्ञाः पुरेदम् । यदिदमिदानीं दृश्यते तत्ते बलं क्षमायां भवति किंचिद्दिवि च । अन्यदिन्द्रस्य च । तच्चेदमुभयं संग्रामे ध्वजो ध्वजेनेव संपृक्तं भवति । उभयं समं बुद्धौ प्रतिभाति ॥ (१)

**स धा॑रयत्पृथि॒वीं प॒प्रथ॑च्च॒ वज्रे॑ण ह॒त्वा निर॒पः स॑सर्ज ।**
**अह॒न्नहि॒मभि॑नद्रौहि॒णं व्यह॒न्व्यं॑सं म॒घवा॒ शची॑भिः ॥**

सः । स्पष्टार्थौ[5] । रोहिणः कश्चिदसुरः ॥

स धारयति पृथिवीं विस्तीर्णां चक्रे । वज्रेण हत्वा मेघादपो निस्ससर्ज । अहन्नहिमभिनच्च रौहिणमसुरम् । व्यहन् व्यंसासुरं मघवा प्रज्ञाभिः ॥ (२)

**स जा॒तूभ॑र्मा॒ श्र॒द्दधा॑न॒ ओजः॒ पुरो॑ विभि॒न्दन्न॑चर॒द्वि दासीः॑ ।**
**वि॒द्वान् व॑ज्रि॒न् दस्य॑वे हे॒तिम॒स्यार्यं॒ सहो॑ वर्धया द्यु॒म्नमि॑न्द्र ॥**

सः । जातुरित्यशनिं ब्रवते । भर्मायुधम् । अशन्यायुधः । अपि वा जातानां प्रजानां भर्ता । श्रद्दधानो बलकृतिं[6] पुराणि विभिन्दन्व्यचरद्दा-

[1] Word not clear.
[2] Folio 72*a* ends with पु.
[3] द् completely worm-eaten.
[4] दि completely worm-eaten.
[5] Read स्पष्टार्थः.
[6] Perhaps to read only बलं.

सुराणि[1] । स त्वमिन्द्र कुत्सस्य शत्रवे वज्रं विसृज । आर्यमारीणां[2] विशां स्वभूतम् । अपि वा आर्या यजमानाः । तदीयं सहो वर्धय यशश्चेन्द्र ॥

स संजातभरणः श्रद्दधानो बलं पुराणि विभिन्दन् विचरत्यासुराणि । जानंस्त्वमिन्द्र कुत्सस्य शत्रवे वज्रं सृज । आनृशंस्यं बलं यशश्च वर्धय ॥ (३)

**तदूचुषे मानुषेमा युगानि कीर्तेन्यं मघवा नाम बिभ्रत् ।**
**उपप्रयन् दस्युहत्याय वज्री यद्ध सूनुः श्रवसे नाम दधे ॥**

तदूचेषुः[3] । तन्नाम ब्रुवाणाय मानुषाणीमानि युगानि कल्पन्तेऽहोरात्राः कीर्तनीयं मघवा नाम धारयन् । उपप्रयन् दस्युभनाय[4] वज्री । यन्नामान्नार्थं प्रसूतो धारयति तच्च । नाम बलमिन्द्रस्य सपत्नान्नामकमिति[5] ॥

तद्वदते नाम दिवसा एते शोभना भवन्ति कीर्तनीयं मघवा नामेन्द्राख्यं बिभ्रत् । उपगच्छन् दस्युहननाय वज्री यन्नामान्नस्य कीर्तेर्वा प्रेरको धारयति तदूचुषे ॥ (४)

**तदस्येदं पश्यता भूरि पुष्टं श्रदिन्द्रस्य धत्तन वीर्याय ।**
**स गा अविन्दत्सो अविन्ददश्वान्त्स ओषधीः सो अपः स वनानि ॥**

तदस्य । तदिदमस्य पश्यत नाम वीर्यमिन्द्रस्य भूरि पुष्टम् । श्रद्धत्तन चेन्द्रस्य तस्मै वीर्याय । स पणिभिरपहृता गा अपिदत्[6] । तथा तैरपहृतानश्वांश्च । तथा ओषधीरपश्च वनन्तीयानि[7] धनानि चेति ॥

[1] Read विभिन्दन् व्यचरदासुराणि.

[2] Read आर्यमरीणां.

[3] Read तदूचुषे.

[4] Read दस्युहननाय.

[5] Read सपत्नानान्नामकमिति.

[6] Read अविन्दत्.

[7] Read वननीयानि.

तदिन्द्रस्येन्द्रियं बहु अग्लानं पश्यत श्रद्धास्मै वीर्याय धत्तन सत्यमसौ बलवानिति । श्रद्धानस्य कार्याणि प्रदर्शयति स गा इति । वनानि धनानि ॥ (५)

**भूरिकर्मणे वृषभाय वृष्णे सत्यशुष्माय सुनवाम सोमम् ।**
**य आदृत्या परिपन्थीव शूरोऽयज्वनो विभजन्नेति वेदः ॥**

भूरि । बहुकर्मणे वृषभाय सत्यबलाय सुनवाम सोमम् । य आदृत्य विदार्याध्वनिरोधक इव शूरो यजमानस्य धनं विभजन्नुपभरन्नेतीति ॥

वृत्रवधादिबहुकर्मणे वृषभाय सेक्त्रे सत्यबलाय सुनवाम सोमम् । यो विदार्य मार्गं निरोधक इवापहर्ता शूरो यजमानस्य धनं विलोपयन् गच्छति ॥ (६)

**तदिन्द्र प्रेव वीर्यं चकर्थ यत्ससन्तं वज्रेणाबोधयोऽहिम् ।**
**अनु त्वा पत्नीर्हृषितं वयश्च विश्वे देवासो अमदन्ननु त्वा ॥**

तदिन्द्र । तदिन्द्र त्वमात्मीयं वीर्यं प्रेव चकर्थ प्रज्ञातमिवाककार्षीः[1] । यत्त्वन्तं[2] स्वपन्तमहिं वज्रेणाबोधयः । प्रबुद्धन्[3] सन् कामं करोतु वीर्यमिति । तदानीं त्वामन्वमदन् हृष्टं देववत्यो[4] वयो मरुतश्च । तथान्ये च विश्वे देवाः । मदिः स्तुत्यर्थ इति ॥

तदिन्द्र त्वं प्रकर्षेणात्मीयं वीर्यं प्रकाशितवानिव । यत् त्वं स्वपन्तमहिं हत्वा प्रबुद्धः सन् कामं युध्यतु । इति हस्तस्थेनायुधेन बोधितवानसि । त्वामन्वमदन् देवपत्न्यः छन्दांसि तदा हृष्टं मरुतश्च ॥ (७)

[1] Read प्रज्ञातमिवाकार्षीः.

[2] Read यत्ससन्तं.

[3] Read प्रबुद्धः.

[4] Read देवपत्न्यो.

शुष्णं पिप्रुं कुयवं वृत्रमिन्द्र यदावधीर्वि पुरः शम्बरस्य ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

शुष्णम् । यद्वा[1] त्वं शुष्णादीन् हतवान् तदानीं शम्बरस्य पुरो ऽव्यभिन इति[2] ॥

यदा त्वं शुष्णादीनसुरानवधीः यदा वा शम्बरस्य पुरः तदा अन्वमदन् । इति इन्द्रस्य वीर्याणि दर्शयति सूक्ते ॥ (८)

---

योनिष्ट इन्द्र निषदे अकारि तमा नि षीद स्वानो नार्वा ।
विमुच्या वयोऽवसायाश्वान् दोषा वस्तोर्वहीयसः प्रपित्वे ॥

योनिः । आसनं ते इन्द्र जिन्निषद्नायाकारि[3] । तं त्वमानिषीद शब्दायमान इवार्वा वासिं[4] । विमुच्य रश्मीनवसा च तानश्वान् । अवसोन्तं[5] विमोचनम्[6] । निशायामह्नि च प्रापणी + + + तया[7] अत्यन्तवोढृतमान् ॥

[1] Read यदा.

[2] The end of the Sūkta is not marked.

[3] Read निषद्नायाकारि or त्वन्निषद्नायाकारि.

[4] Word not clear. Perhaps to read वसतिं or व्रजम्.

[5] Read अवसोऽन्नम्.

[6] This word seems unwanted.

[7] Folio *72b* ends with प्राप. The corner of next folio broken and about 3 letters lost.

आसनं तवेन्द्र निषदनाय कृतम् । तं योनिं गृहमागत्योपविश शब्दं कुर्वन्निवाश्वो व्रजम् । अश्वबन्धनानि विमुच्य अवसाय चाश्वान् रात्रावह्नि च अतिशयेन वोढूंस्तवाभिप्राप्तौ ॥ (१)

**ओ त्ये नर इन्द्रमूतये गुर्नू चित्तान्त्सद्यो अध्वनो जगम्यात् ।**
**देवासो मन्युं दासस्य श्चम्नन्ते न आ वक्षन्त्सुविताय वर्णम् ॥**

ओ त्यं । आगच्छन्त्वमी नर इन्द्रं रक्षणाय । क्षिप्रं तानिन्द्रोध्वः[1] प्रापयतु । देवाः क्रोधमसुरस्य शोषयन्तु । ते न आवहन्तु भद्राय वर्णं वारकमिन्द्रम्[2] ॥

अमी मनुष्या इन्द्र रक्षणायाभिगताः । शीघ्रमेव तानिन्द्रो युद्धमार्गात् पारयतु । देवासो मननमसुरस्य शोषयन्तु । तेऽस्माकमावहन्तु अभ्युदयाय वारकमिन्द्रम् ॥ (२)

**अव त्मना भरते केतवेदा अव त्मना भरते फेनमुदन् ।**
**क्षीरेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे शिफायाः ॥**

अव । अवहरत्यन्तस्थितं केतवेदाः । कूयवोऽसुरः[3] । परिगृहीत-परधनः । तस्यास्य कूयवस्य[4] भार्ये द्वे नेनापहृतेन[5] क्षीरेणोदकेन स्नातः । क्षीरं क्षरतेः । हते ते योषे त्वया स्यातां शिफाख्याया नद्याः प्रवणे वर्तमाने ।

[1] Read तानिन्द्रोऽध्वन.

[2] मिन्द्रम् mostly worm-eaten. Only a guess.

[3] Read कुयवोऽसुरः A part of the text omitted here.

[4] Read कुयवस्य.

[5] Read तेनापहृतेन.

सा यत्र सिन्धुं प्रविशति तत् प्रवणमिति । यद्वा श्शेतवेदा:[1] ज्ञायमान:[2] कर्मणा ॥

स्वयमेव कुयव: प्रज्ञाधन: उदकमपहरति फेनं चोदकस्थम् । तत्र तस्य भार्ये उदकेन स्नानं कुरुत: । ते त्वत्प्रसादात् इन्द्र हते स्याताम् । शिफाख्याया नद्या: प्रवणे निम्ने । सा यत्र पतति समुद्रं प्रविशति तत्र ॥ (३)

**युयोप नाभिरुपरस्यायोः प्र पूर्वाभिस्तिरते राष्टि शूरः ।**
**अञ्जसी कुलिशी वीरपत्नी पयो हिन्वाना उदभिर्भरन्ते ॥**

युवोप । युयोप अपिहितमाहीन्नाहिस्थानं[3] उपरस्यान्तरुहस्यायोर्गन्तु: कुयवासारस्य[4] । पूर्वा आप: पूरयित्र्य: । ताभिरासुरो[5] वर्धते राजते । स च सूर:[6] तमिमंजसी[7] कुलिश[8] वीरपत्नी । तिस्रौ[9] नद्य: । स्वरसं प्रेरयन्त्य मदकै:[10] पूरयन्ति ॥

विहितमासीन्निर्गमनस्थानं मेघस्य गमनशीलस्य । कुयवासुरेण पूर्वाभिरद्भिर्वृद्धो भवति शिफानदीस्थाभि: । कुयवो राजते च ताभि: शूर: । तं चाञ्जसी कुलिशी वीरपत्नीति तिस्र उदकं प्रेरयन्त्य: तद्भार्या: तैरुदकै: ॥ (४)

[1] Read केतवेदा:

[2] First written ज्ञायमाना ; then the आ mark is corrected into Visarga.

[3] Read अपिहितम् । नाभिर्नाभिस्थानं.

[4] Read कुयवासुरस्य.

[5] Read ताभिश्शूरो.

[6] Read शूर:

[7] Read तमञ्जसी.

[8] Read कुलिशी.

[9] Read तिस्रो.

[10] Read उदकै:.

**प्रति यत्स्या नीथादर्शि दस्योरोको नाच्छा सदनं जानती गात् ।**
**अर्ध स्मा नो मघवञ्चर्कृतादिन्मा नो मघेव निष्षपी परा दाः ॥**

प्रति यत् । प्रत्ययदर्शि[1] यदियं नीथस्तुतिरसुरस्य । यासुरस्य गृहं प्रति गच्छति सा प्रत्यदर्शि । सैषा ति[2] यथा गौम्रहं[3] जानात्यभिगच्छति । तथा असुरस्य गृहं प्रति गच्छति । दृष्टायां चास्यमस्माकं[4] स त्वं मघवन्मा परादाः चककृतादस्मात्[5] । चर्कृतमिति संग्राममं[6] ब्रूते । यथा निष्कविद्धूर्तो यथाक्षतामन्निर्गतसपः धनानि परादद्दाति सविश्विश्नः सपिस्पृतिकर्मा[7] । स्तोत्रवचनो नीथवशब्दो[8]ऽन्तो दात्तः । नीथे नीथ इति[9] ॥

प्रत्यदर्शि यस्मात् सोऽयं स्तुतिर्मार्गो गृहमिवाभि । कश्चन प्रदर्शकः तस्य सदनमवगच्छन्ती गच्छति । यथा कस्यचित् गृहमार्गमन्य उपदिशन्नग्रे गच्छति एवं कुयवस्यावासं प्रज्ञापयन्ती तत्र गच्छति । एवं मार्गे ज्ञाते सति मघवन् त्वमस्माकं अत्यन्तात् परिचरणाद्धेतोरस्मान् मा परादाः । यथा विनिर्गतशिश्नः कामचरणार्थं धनानि परादद्दाति स्त्रीभ्यः ॥ (९)

**स त्वं न इन्द्र सूर्ये सो अप्स्वनागास्त्व आ भज जीवशंसे ।**
**मान्तरां भुजमा रीरिषो नः श्रद्धितं ते महत इन्द्रियाय ॥**

[1] Read प्रत्यदर्शि.
[2] Read स्तुतिः.
[3] Read गोर्गृहं
[4] Read चास्यामस्माकं.
[5] Read चर्कृतादस्मात्.
[6] Read संग्रामं.
[7] Passage from यथा not clear.
[8] Read नीथशब्दो.
[9] R. V. 7. 26. 2.

स त्वम् । स त्वमस्मानिन्द्र प्रापव[1] सूर्यादीन् आभजति योगे । कर्मणि सप्तमी चानेकत्र द्रष्टव्या:[2] । अनाशास्त्वमपापता[3] । जीवशंसं धनम् । अपि वा अनागास्त्वविशेषणम् । तन्मा हिंसी: । अन्तरां भुजं प्रियतमं धनम् । अपि वाभिभावुकं पुत्रम् । यद्वा गर्भस्थां पूजाम् । श्रद्धानं कृतमस्माभिस्ते महते बलाय । बलवानेव त्वमिति । सत्वन्त इन्द्र इति[4] चतुष्का:[5] सन्ति बहव: । तेष्वेकोऽपि सनमये[6] न युज्यते छन्दोविभक्तिभेदात् । अव न्मना[7] भरत इति त्रिकश्च[8] न सृष्ट: । आवेष्टनं हि तदिति ॥

स त्वमस्मानिन्द्र सूर्ये आभजत । स एवोदकेषु तथा दरिद्रे । तथा जीविताशंसनं च सफलं कुरु । किंच अस्माकमन्तरतमं अन्नमीषदपि मा हिंसी: । अस्माभिस्तव महते बलाय श्रद्दधानमिदं कृतं अयमस्मान् रक्षति इति ॥　　　　(६)

**अधा॑ मन्ये॒ श्रत्ते॑ अस्मा अधायि॒ वृषा॑ चोदस्व मह॒ते धना॑य ।**
**मा नो॒ अकृ॑ते पुरुहूत॒ योना॒विन्द्र॒ क्षुध्य॑द्भ्यो॒ वय॑ आसु॒तिं दाः ॥**

[1] Word not clear.

[2] Read द्रष्टव्या.

[3] Read अनागास्त्वमपापता.

[4] Read स त्वं न इन्द्र इति. The line ends with सत्वन्त इ. Then न्द्रेति starts three inches from margin as the leaf has become narrow.

[5] There are many places where this combination of four words occurs.

[6] Word not clear. Is it समये ?

[7] Read त्मना.

[8] In the 3rd verse above.

अधा । अध स्तौमि श्रद्धामि चास्मै[1] तवेन्द्रियायास्माभिः । वृषा चोदय महते धनाय । अस्मान्[2] अस्मानकृते अपर्याप्ते पुरुहूत गृहे धाः । इन्द्र बुभुक्षमाणेभ्योऽस्मभ्यमन्नं पानं च मेभिः[3] ॥

संप्रति त्वामहं स्तौमि श्रद्धायि चास्मै तुभ्यं मया । स त्वमस्मान् वर्षिता महते धनाय चोदय । बहुभिराहूत मास्मान् अपर्याप्ते गृहे प्रवेशय । इन्द्र बुभुक्षमाणेभ्योऽस्मभ्यं अन्नं अन्यांश्च रसान् देहि ॥ (७)

**मा नो॑ वधीरिन्द्र॒ मा परा॑ दा॒ मा नः॑ प्रि॒या भोज॑नानि॒ प्र मो॑षीः ।**
**आ॒ण्डा मा नो॑ मघवञ्छक्र॒ निर्भे॒न्मा न॒: पात्रा॑ भेत्स॒हजा॑नुषाणि ॥**

मा नः । मास्मान्वधीरिन्द्र । मा च परित्याक्षीः । मा चास्माकं प्रियाण्यन्नान्यपहार्षीः । आण्डानि निषिक्तानि मघवन्नपत्यानि निर्भेत् । मा च । पात्राणि पातेः । जङ्गमान्यपत्यानि । सहजानुषाणीति सजातवचन इति ॥

मास्मान् वधीरिन्द्र मा च परित्याक्षीः । मा चास्माकं प्रियाण्यन्नानि अपहार्षीः । अण्डस्थानि मास्माकं मघवन् शक्र निर्भेः । मा चास्माकं शिक्षितपतनान्यपत्यानि सहजातानि च भेः ॥ (८)

**अ॒र्वाङेहि॒ सोम॑कामं त्वाहुर॒यं सु॒तस्तस्य॑ पिबा॒ मदा॑य ।**
**उ॒रु॒व्यचा॑ ज॒ठर॒ आ वृ॑षस्व पि॒तेव॑ नः शृणुहि हू॒यमा॑नः ॥**

[1] Folio 73*a* ends here.

[2] Read मा for अस्मान्.

[3] Perhaps to read देहि.

अर्वाङ् । अभिमुखमागच्छ[1] । सोमकामं त्वा आहुः । अयं[2] सोमस्सुतः । तं पिब । मतार्थम्[3] । उरुव्यचाः महान् उरुव्यचास्तितिः[4] जठरे आसिञ्च सोमम् । पितेच[5] चास्माऋणं[6] हूयमानः । याभिः पर्वो[7] जठरस्य इत्याद्युदात्तं[8] जाठरोग्निवचनं[9] ब्रूते[10] ॥

अभिमुखमागच्छ । सोमकाममाहुस्त्वां जनाः । अयं च सुतः सोमः । तं पिब मदाय । बहुव्याप्तस्त्वं जठरे आसिञ्चस्व । पितेव चास्मान् शृणु हूयमानः ॥ (९)

---

चन्द्रमा अप्स्व१न्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो
वित्तं मे अस्य रोदसी ॥ १ ॥

[1] The letter ख is mostly worm-eaten; only a guess.

[2] अ mostly worm eaten; only a guess.

[3] Read मदार्थम्.

[4] This word not clear; may also be read as उरुव्यचास्ततः:

[5] Read पितेव.

[6] Read चास्मान् शृणु.

[7] Read पर्वा.

[8] In R. V. 1. 112. 17.

[9] Read जाठराग्निवचनं.

[10] Here there is the figure 10 to mark the end of the Sūkta.

चन्द्रमाः । आप्त्यस्त्रित ऋषिः । तथाच वक्ष्यति—त्रितः कूप इति[1] । स्पष्टं च त्रितमृषिं ब्रूते[2] । शाट्यायनकम्—अमितऋषिः कुत्सश्च कूपे पतितः । तच्च वक्ष्यति—इन्द्रं कुत्सो वृत्रहणम् इति[3] । तस्मात् प्रसङ्गादिदमत्र सूक्तं निविष्टम् । यत्त्विदं शौनकेनोक्तं त्रितः कुत्सो वेतीति[4] तत् बहुविद्भिर्निरूपणीयम् । अत्र शाट्यायनकम्—आप्त्यान् सा ते पेनयतो[5]ऽरण्ये पिपासाविन्दत् । ते धन्वन् कूपमविन्दन् । द्वितोऽवरोवममकामयत[6] । तमेकस्तृतोऽवरोहत्[7] । तौ यदापिबतां अतृप्यताम्[8] । अथ हैनं तदैव रथचक्रेकणापिधाय[9] गोभिः प्रैताम् । सोमकामयत[10] । उदित इयां गातुं नाथं विन्देय[11] इत्यादि । तत्रेदं सूक्तं ददर्श । तत्र रात्रौ कूपस्यान्तश्चन्द्रमसो रश्मीनपश्यत् । परिदेवयते । चन्द्रमा अन्तरिक्षास्वप्सु[12] अन्तराधावने नभसि । तथा सति न युष्माकं हे हिरण्यसदृशपर्यन्ताः पदं पादमग्रं जानन्ति विद्युतः । इति चन्द्रमसो रश्मीनामन्त्रयते । तमिमं त्रितं मां जानीत द्यावापृथिव्यौ ॥

त्रित आप्त्यः । आपेय इति कठाः । आप्त्य इति ब्राह्मणम् । अथ शाट्यायनकम् । आप्त्यान् सा ते येन यतो(?)ऽरण्ये पिपासाविन्दत् । ते

[1] verse 17 below.

[2] The sentence is defective.

[3] R. V. 1. 106. 6.

[4] Cf. Skandaswamibhāṣya. Ed. by C. Kunhan Raja, Madras University Sanskrit Series, under this verse.

[5] Reading not certain. Perhaps to Read संतापेन यतो.

[6] Perhaps to read द्वितोऽवरोढुमकामयत.

[7] Read तमेकतः तं त्रितोऽवारोहत्.

[8] Another letter corrected into अ.

[9] Read रथचक्रेणापिधाय.

[10] Read सोऽकामयत.

[11] Reading not certain ; passage not clear.

[12] Read आन्तरिक्षास्वप्सु.

ध्वन्वन् कूपमविन्दन् । तद्वितोऽवरोढुमकामयत । तमेकतस्तं त्रितोऽवारोहत् । तौ यदापिबतां अतृप्यताम् । अथ हैनं तदेव रथचक्रेण पिधाय गोभिः प्रेताम । सोऽकामयत । उदिते इमां गातुं नाथं विन्देयेति । रात्रौ कूपे पतितः तत्र चन्द्रमसो रश्मीनपश्यत् । वदति । दिव्युदकस्य मध्ये युष्माकमाधारभूतः चन्द्रमाः सुपतनः आधावते । तथा सति हिरण्यसदृशपर्यन्ताः तस्य विद्युतो नैव युष्माकं जनाः पदं लभन्ते प्रकाशम् । जानीतं ममेदं परिदेवनं द्यावापृथिव्यौ ॥ (१)

अर्थमिद्वा उ अर्थिन आ जाया युवते पतिम् ।
तुञ्जाते वृष्ण्यं पयः परिदाय रसं दुहे
वित्तं मे अस्य रोदसी ॥ २ ॥

अर्थमित् । तदिदं परिदेवनम्[1] । अर्थमित् अपेक्षितमपेक्षमाणाः प्राप्नुवन्ति । तथा युवतेऽभिव्याप्नोति जायमाना च पतिम् । प्रेरयतश्च जायापती वृष्ण्यं सार[2] मैथुने पुत्रजनकस्तत्र रसं पत्युरादाय[3] जाया दुहे[4] । जनयति पुत्रमित्यर्थः । अहं च पुत्रोऽनुशासनं चार्थं प्राप्नोमीति ॥

अभिलषितमर्थमर्थिनो लभन्ते । स्त्री च पतिमाश्रयते । द्यावापृथिव्यौ च वर्षणनिमित्तं स्वसारं मनुष्येभ्यः प्रयच्छतः । आदित्यरश्मिभिः सर्वत आदायोदकं क्षरति । इति मुमूर्षोः परिदेवनम् ॥ (२)

मो षु देवा अदः स्व१रव पादि दिवस्परि ।
मा सोम्यस्य शंभुवः शूने भूम कदा चन
वित्तं मे अस्य रोदसी ॥ ३ ॥

[1] As the leaf is narrow, the last line starting with वनं begins 3 inches away from margin.

[2] Read सारं.

[3] Folio 73*b* ends with पत्युरा.

[4] The word mostly worm-eaten ; only a guess.

मो षु । सैषा दैवी । मो षु देवा अदस्सर्वं पितृपितामहात्मकं सन्तानं मम पुत्राभावादवपन्नं भवति स्वर्गात् । न वयं सोमार्हस्य पितृगणस्य सुखस्य भावयितुः शुनो[1] विनाशाय भवेम कदाचन ॥

यज्ञाभावादेतत् सर्वं देवा न स्वर्गादवपाति । न वयं सोमार्हस्य पितृगणस्य सुखस्य भावयितुः केवलत्वाय कदाचिदपि भवाम । इत्यानृण्याय यज्ञमाशास्ते ॥ (३)

यज्ञं पृच्छाम्यवमं स तद्दूतो वि वोचति ।
क्व ऋतं पूर्व्यं गतं कस्तद्बिभर्ति नूतनो
वित्तं मे अस्य रोदसी ॥ ४ ॥

यज्ञम् । यष्टव्यमवममग्निमहमिदं पृष्ठामि[2] । स दूतोऽग्निर्मया पृषं[3] तद्विस्पष्टं ब्रवीतु । क्व गतं तव पूर्वममृतं भद्रं स्तोतृविषयम् । कस्तदिदानीं बिभर्ति त्वया दत्तं नवतर इति ॥

यज्ञं पृच्छामि विस्पष्टं वदतु यज्ञः सत्यमेवाश्रितं रक्षतीति । यज्ञस्य पुरा दृष्टमानृशंस्यं क्व गतम् । कस्तदिदानीं संप्रतिपन्नो बिभर्ति ॥ (४)

अमी ये देवाः स्थन त्रिष्वा रोचने दिवः ।
कद्व ऋतं कदनृतं क्व प्रत्ना व आहुति-
र्वित्तं मे अस्य रोदसी ॥ ५ ॥

[1] Read शुने.
[2] Read पृच्छामि.
[3] Read पृष्टं.

अमी[1] ये देवा भवथ त्रिषु स्थानेषु यानि स्थानान्यादित्यस्य रोचने भवन्ति । क्व गतं व ऋतमार्यविषयम् । क्व वा अनार्यविषयमनृतम् । क्व प्रत्ना व आहुतिर्गता । आहुतिर्दानमपेक्षितानाम् ॥

अमी ये दिव आरोचने आदित्ये त्रिषु स्थानेषु पौर्वापर्यभावैः ये देवा भवथ पार्थिवाश्च देवगणा आदित्यतेजोभिरवष्टब्धा वर्तन्ते । एवं माध्यमिकाः । क्व वो गतमानृशंस्यं क्व वा शाठ्यमयजमानविषयम् । क्व वास्माभिः पुरा भवद्भ्यो हुता आहुतिः ॥ (५)

**कद्व॑ ऋ॒तस्य॑ ध॒र्ण॒सि कद्वरु॑णस्य॒ चक्ष॑णम् ।**
**कद॑र्य॒म्णो म॒हस्प॒थाति॑ क्रामेम दू॒ढ्यो॑**
**वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥ ६ ॥**

कद्वः । क्व गतं युष्माकं आनृशंस्यधारणम् । क्वा[2] गतं वरुणस्य चक्षणं दर्शनम् । क्व वा गतमर्यम्णो महनः[3] पथा नयनम् । वयमनिक्रमेम[4] दुर्बुद्धीनिति ॥

क्व युष्मत्कमानृशंस्यस्य धारणं गतम् । क्व वा वरुणस्य पुण्यपापकृद्विषयं दर्शनम् । क्व वार्यम्णो दानादिविषयं महत्त्वम् । वयं मार्गेण कूपादुत्तीर्णा दुर्बुद्धीनतिक्रामेम ॥ (६)

**अ॒हं सो अ॑स्मि॒ यः पु॒रा सु॒ते वदा॑मि॒ कानि॑ चि॒त् ।**
**तं मा॑ व्यन्त्या॒ध्यो॒३ वृको॒ न तृ॒ष्णजं॑ मृ॒गं**
**वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥ ७ ॥**

[1] The Pratīka is not separately given.

[2] Read क्व or क्व वा.

[3] Read महतः

[4] Read वयमतिक्रमेम.

अहम् । अहं सो अस्मि यः पुरा सुते मोमे वदानि कामिचित्[1] स्तोत्राणि । तमिति सुखनाम । तम्मा खानन्त्याध्यः[2] आध्यानान्निकामा[3] अनुपनताः । सोऽयं पञ्चकः पादः[4] । यथा जाततृष्ण[5] मृगमुदकं प्रति गच्छन्तं वृको भक्षयतीति ॥

अहं सोऽस्मि यः पुरा भवतां सुते सोमे स्तोत्राणि कानिचिद्वदामि । तं मां खादन्त्याध्यः कामाः । न यक्ष्ये न दास्यामि न भोक्ष्यामि इति । वृकश्च तृष्णा जाता यस्य तं तृष्णजं उदकस्थानं प्रति गच्छन्तं मृगमिव ॥ (७)

**सं मा॑ तपन्त्य॒भित॑ः स॒पत्नी॑रिव॒ पर्श॑वः ।**
**मूषो॒ न शि॒श्ना व्य॑दन्ति मा॒ध्य॑ः स्तो॒तारं॑ ते शतक्रतो**
**वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥ ८ ॥**

सं मा । सं मा तपन्त्याध्यः सपत्नीरिव पशवः[6] पत्युः पार्श्वे शयानाः । इतराः मूषिका इव शिश्ना सूत्राणि मां खादन्त्याध्यः । स्तोतारं ते शतक्रतो । यास्कस्त्वाह—सन्तपन्ति मामनभिमतः[7] सपत्यश्तेवमाः[8] कूपपर्शवो मूषिका इव श्न्यथितानि[9] सूत्राणि स्यदन्ति[10] । तदिदमनभिमतं शाकल्यस्य ।

[1] Read वदामि कानिचित्.

[2] Read खादन्त्याध्यः

[3] Reading not certain.

[4] Meaning not clear.

[5] Read जाततृष्णं.

[6] Read पर्शवः

[7] First written मामभिमतः; then न written below the line. Read मामभितः ।

[8] Read सपत्न्य इवेमाः

[9] Printed edition has इवास्नातानि.

[10] Read व्यदन्तिः N. 4. 6.

स ह्यर्धर्चमिमं सप्तमे[1] विसृजति । न च तत्र सन्ति कूपस्य पर्शव[2] इति ॥

संतपन्ति मामभितः सपत्नीमिव सपत्न्यः कूपपर्शवः । मूषिका इवाम्नातानि सूत्राणि व्यदन्ति । स्वाङ्गाभिधानं वा स्यात् शिश्नानि व्यदन्ति इति । संतपन्ति आध्यः कामाः । स्तोतारं ते शतक्रतो । यथा प्रजननानि वेष्टनत्वच आवृतानि तद्वत् कामा मां परिवृण्वन्ति ॥　　　　(८)

**अमी ये सप्त रश्मयस्तत्रा मे नाभिरातता ।**
**त्रितस्तद्वेदाप्त्यः स जामित्वाय रेभति**
**वित्तं मे अस्य रोदसी ॥**

अमी ये । अमी ये सप्तादित्यस्य रश्मयो नाभिमनुप्रविश्य प्राणा भवन्ति । तदिदं त्रितमाप्त्य[3] ऋषिर्वेदेत्यात्मानमेव परोक्षमाह । आप्त्यो परमपुत्रः[4] । तमिममापेय इति कठा वदन्ति । आप्त्य इति तैत्तिरीयिणः । सोऽयं तात्रश्मीन्[5] जामित्वाय स्तौति । जामित्वां दुःखादुःखार्थानम्[6] ॥

अमी ये सप्त आदित्यरश्मयः तेषु मम नाभिरातता । ते हि सर्वेषां नाभिषु संबद्धा भवन्ति । तमिममर्थं अपां पुत्रः त्रितो जानाति । स तेनादित्येन जामित्वाय तदनुपालयितुं स्तौति तान् रश्मीन् ॥　　　　(९)

[1] R. V. 10. 33. 2.

[2] In both the places the meaning must be exactly identical.

[3] Read त्रित आप्त्य.

[4] Read आप्त्योऽपां पुत्रः

[5] Read तान् रश्मीन्.

[6] Passage not clear,

अमी ये पञ्चोक्षणो मध्ये तस्थुर्महो दिवः ।
देवत्रा नु प्रवाच्यं सध्रीचीना नि वावृतु-
र्वित्तं मे अस्य रोदसी ॥

अमी । ये पञ्चमी[1] सेक्तारो मध्ये तिष्ठन्ति महतो दिवः । देवत्रेति प्रथमान्तमते[2] देवाः क्षिप्रमेव[3] प्राच्यं शंसंयमिदं[4] स्तोत्रं प्रति संगता निवर्तन्ते च । पञ्च देवताः तत्र इन्द्र इत्यर्धर्चेदिता[5] इत्येकम् । शाट्यायनकोक्ताः पञ्च देवता इत्यपरम् । तत्र ह्युक्तम्—एतान्येव पञ्च ज्योतींषि यान्येषु लोकेषु दीप्यन्ते अग्निः पृथिव्यां वायुरन्तरिक्षे आदित्यो दिवि चन्द्रमा नक्षत्रे विद्युदप्स्विति ॥

तत्र इन्द्रस्तद्वरुण इत्यस्यामृचि (१. १०७. ३) वक्ष्यमाणाः पञ्चामी वर्षितारो ये मध्ये दिवः तिष्ठन्ति तेषु देवेषु क्षिप्रं मयाभिलषितं वाच्यन्ते सहभूतानि वर्तन्तु मां प्रति ॥ (१०)

सुपर्णा एत आसते मध्य आरोधने दिवः ।
ते सेधन्ति पथो वृकं तरन्तं यह्वतीरपो
वित्तं मे अस्य रोदसी ॥

सुपर्णाः । सुपनता एत[6] रश्मय आसते दिवो मध्ये आरोधने ।

[1] Read पञ्चामी.

[2] Read प्रथमान्तम् । एते.

[3] Folio 74 *a* ends with क्षि.

[4] Perhaps to read प्रवाच्यं शंस्यमिदं.

[5] R. V. 1. 107. 3. Read इत्यर्धर्चोदिता.

[6] Read सुपतना एते.

आरोधनं हि नह[1] । उद्गच्छतां ते निषेधन्ति मार्गाद्वृकं तान्तं[2] महतीर-
पर:[3] । कूपपतनात् पूर्वमपराह्णे उत्तीर्य सरस्वतीं गच्छत एकतद्वितत्रितान्
कूलस्थितः कश्चिद्वृको ददर्श । दृष्ट्वार्थमांसेच्छया आपस्तितिषुः[4] अस्तेमित-
त्वान्द्रश्मीन्[5] दृष्ट्वा निवृत्त आसीदिति शाकल्यस्य पक्षः । यास्कस्त्वाह—
वृकश्चन्द्रमाः । तमादित्यरश्मयो निरुन्धन्तीति । तस्य पथ इति । पदं न
संगतमिवेति[6] ॥

सुपतना एते रश्मयो निवसन्ति स्वर्गलोकस्यापिधाने आदित्यमण्डले । ते निषेधन्ति मार्गादनुगच्छन्तं वृकं यः पशुषु हतेषु मां भक्षयितुं कूपेऽवरूढं दृष्ट्वा सरस्वत्याः परस्मात् कूलात् तस्या महतीरपः तरन्तं कंचन मृगम् ॥ (११)

**नव्यं तदुक्थ्यं हितं देवासः सुप्रवाचनम् ।**
**ऋतमर्षन्ति सिन्धवः सत्यं तातान सूर्यो**
**वित्तं मे अस्य रोदसी ॥**

नव्यं तत् । नवतरं स्तुत्यं तद्वीर्यं । अभवत् । सुनिहितं देवा सुप्रवाचनम् । सर्वलोकप्रसिद्धत्वाद्धिततमेव वक्तुं शक्यम् । तदेव दर्शयति । उदकं प्रेरयन्ति सिन्धवः । सत्यं तेजस्तनोति सूर्यः । सत्यमेवातनोति प्रकाशनादिति ॥

[1] Read नभ.

[2] Read तरन्तं. In Grantha the आ mark and र are very much alike.

[3] Read महतीरपः

[4] Read दृष्ट्वार्थमांसेच्छया अपस्तितीर्षुः

[5] Perhaps to read अस्तमितान् रश्मीन्.

[6] Not traced.

नवतरमुक्थार्हं तत् स्तोत्रं भवत्सु निहितं देवाः शोभनप्रवचनम् । उदकं गमयन्ति नद्यः । भवद्भिः प्रहितः सूर्यश्च तेजोभिः सत्यं विस्तारयति ॥ (१२)

**अग्ने॒ तव॒ त्यदु॒क्थ्यं॑ दे॒वेष्व॒स्त्याप्यम्॑ ।**
**स नः॑ स॒त्तो म॑नु॒ष्वदा दे॒वान्य॑क्षि वि॒दुष्ट॑रो**
**वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥**

अग्ने । अग्ने तवैतत् प्रशस्यं देवेष्वस्ति बान्धवम् । स त्वमस्माकं निषण्णो मनुष्वदायज देवारिद्वत्तरः[1] ॥

अग्ने तवैतत् प्रशस्यं देवेषु ज्ञातेयमस्ति । स त्वमस्माकं मनुष्यवत् वेद्यां निषण्णो देवान् यज विद्वत्तरः ॥ (१३)

**स॒त्तो होता॑ मनु॒ष्वदा दे॒वाँ अच्छा॑ वि॒दुष्ट॑रः ।**
**अ॒ग्निर्ह॒व्या सु॑षूदति दे॒वो दे॒वेषु॒ मेधि॑रो**
**वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥**

सत्तः । सत्तो होता मनुष्वदायज नां[2] हविर्देवान् प्रति विद्वत्तरः । तदेवोक्तं अग्निर्हव्येति ॥

निषण्णो होता वेद्यां मनुष्वत् विद्वत्तरोऽग्निर्हव्यान्यादाय देवान् प्रति प्रेरयति । देवो देवेषु यज्ञियः ॥ (१४)

**ब्रह्मा॑ कृणोति॒ वरु॑णो गातु॒विदं॒ तमी॑महे ।**
**व्यू॑र्णोति हृ॒दा म॒तिं नव्यो॑ जायतामृ॒तं**
**वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥**

[1] Read देवान् विद्वत्तरः

[2] Perhaps to read नय.

ब्रह्म । परिबृढं तत्कर्म करोति । उपद्रुतानां निस्तारकस्य मार्गस्य लम्भकं तं याचामाहे । तस्मै स्तोतायं हृदयेन मतिं स्तुतिं विवृणोति प्रकाशयति । यद्वा तमसा तिरोहितं विवृणोति वरुणः । सोऽयमस्माकममतं[1] जायतां भवतु सत्यमिति ॥

स्तोतृभ्यः परिवृढं कर्म वरुणः करोति । मार्गस्य लम्भयितारं तं वयमभियाचामहे कूपादुत्तरणम् । स हृदयेनैव सुमतिं स्तोतृभ्यः प्रकाशयति । सत्कृतः सन् अधुनास्माकमस्मिन् कूपे पूर्णमुदकं जनयतु ॥ (१५)

**असौ यः पन्था आदित्यो दिवि प्रवाच्यं कृतः ।**
**न स देवा अतिक्रमे तं मर्तासो न पश्यथ**
**वित्तं मे अस्य रोदसी ॥**

असौ । असौ यस्सर्वेषां पन्था आदित्यो दिवि प्रवाच्यं यथा भवति तथा कृष[2] स्पष्टं कृतः । + + देवा[3] अतिक्रमितुं शक्यः केनचित । तं यूयं मर्ता न पश्यथ पापकृत इत्येकतं द्रिकं[4] च निन्दमिति[5] ॥

सर्वेषां स्तोत्रार्थं योऽयमादित्याख्यः पन्था दिवि कृतः स देवा मनुष्यैः क्षुद्रैः अतिक्रमितुं न शक्यते । तमिमं मनुष्या न पश्यन्ति अभ्युदयावहम् ॥ (१६)

[1] Read सोऽयमस्माकममृतं.

[2] Read कृतः

[3] A letter or two completely worm-eaten before देवाः. They must be न सः

[4] Read द्वितं.

[5] Read निन्दतीति.

त्रितः कूपेऽवहितो देवान् हवत ऊतये ।
तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु
वित्तं मे अस्य रोदसी ॥

त्रितः । त्रितः कूपेऽवहितो देवान् हवते रक्षणाय । कूपं कुत्सितपानं भवति । तच्छुश्राव बृहस्पतिः[1] स्तोतारमंहूरणादवर्तेः[2] । अपि वा पापादुन्नीय तस्मै करोति उरु शुभम् । यद्वा अहूरणमेनस्वान्[3] । तस्मादपनीतमुर[4] धनं स्तोत्रैः कुर्वन्निति ॥

यदास्य सूक्तस्य कुत्स एव द्रष्टेति दर्शनं तदानीमियं योजना । पुराहमिव त्रितश्च कूपे पतितः सन् देवान् हवते स्म रक्षणाय । तदानीं तस्य वचनं बृहस्पतिरेव शुश्राव । तस्याह्वानात्तस्य विस्तीर्णं गमनमार्गं कृण्वन् ॥ (१७)

अरुणो मा सकृद्वृकः पथा यन्तं ददर्श हि ।
उज्जिहीते निचाय्या तष्टेव पृष्ट्यामयी
वित्तं मे अस्य रोदसी ॥

अरुणः । अरुणवर्णो वृकः क्रोष्टा भवति । समांमाधेयन्त[5] ददर्श हि । स तु दृष्ट्वा च जिघृक्षुर्मामुज्जिहीते तस्तू[6] यथा तत्क्षणाज्जनितक्लेशः

[1] Folio 74*b* ends here.

[2] The letters मंहूर completely worm-eaten. Only a guess.

[3] Read अंहूरण एनस्वान्.

[4] Read तस्मादपनीतमुरु.

[5] Passage not clear. The leaf is worm-eaten and the letters are noted as they could be identified. Perhaps to read स मां पथा यन्तं.

[6] This word not clear. विचाय्य is not explained.

तष्टा पृष्ठ्यामयी जनितपृष्ठक्लेशः । निरुक्तं तु भवति—वृकश्चन्द्रमा भवति । विवृतज्योतिष्को वा । मासकृन्मासानां चार्धमासानां कर्ता । वृकश्चन्द्रमाः । पथायन्तं ददर्श हि । नक्षत्रगणमभिजिहीते । निचाय्य योक्षमाणो भवति । तक्ष्णुवन्निव पृष्ठरोगीति[1] ॥

तृषितं मां मार्गेण गच्छन्तं पृष्ठतः स्थितः कश्चिदरुणवर्णो वृको ददर्श हि । दृष्ट्वा चागमनार्थमुज्जिहीते । यथा तष्टा अनवरततक्षणाज्जातपृष्ठवेदनः सन्नुत्तिष्ठति । यास्कपक्षे तु—उदितश्चन्द्रमा इति मन्त्रार्थः । तदुक्तम् । वृकश्चन्द्रमा भवति विवृतज्योतिष्को वा विक्रान्तज्योतिष्को वा । अरुण आरोचमानः । मासानां चार्धमासानां च कर्ता चन्द्रमाः । वृकः पथा यन्तं दर्शनक्षत्रगणमभिजिहीते निचाय्य येन येन योक्ष्यमाणो भवति चन्द्रमाः तक्ष्णुवन्निव पृष्ठरोगी ॥ (१८)

**ए॒नाङ्गू॒षेण॑ व॒यमिन्द्र॑वन्तो॒ऽभि ष्या॑म वृ॒जने॒ सर्व॑वीराः ।**
**तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑ति॒ः सिन्धु॑ः पृथि॒वी उ॒त द्यौः ॥**

स्पष्टार्थोत्तरा[2] ॥

अनेन स्तोत्रेण वयमिन्द्रवन्तः सन्तोऽभिभवेम युद्धे शत्रून् अखण्डितास्मदीयवीराः । अत्र वदन्ति ।

त्रितं गास्त्वनुगच्छन्तं क्रूराः सालावृकीसुताः ।
कूपे प्रक्षिप्य तं सर्वे तत एवापजह्रिरे ॥
स तत्र सुषुवे सोमं मन्त्रवन्मन्त्रवित्तमः ।
देवांश्चाहूतवान् सर्वान् तच्छुश्राव बृहस्पतिः ॥

[1] N. 5. 21. There is much variation in reading.
[2] There is no mark for the end of the Sūkta.

बृहस्पतिप्रचोदिता विश्वे देवगणास्त्रयः ।
जग्मुस्त्रितस्य तं यज्ञं भागांश्च जगृहुः सह ॥

इति ।

कुत्सश्च कूपे पतितस्तेनैवेहानुधावति ।
सूक्तेन त्रितदृष्टेन स्वयं वा दृष्टवानिदम् ॥
त्रित एवाथवा द्रष्टा न तु कुत्सस्य दर्शने ।
विरुध्यतेऽरुणो मेति माशब्दस्तत्र का गतिः ॥
उच्यते पदकारस्य त्रितस्यार्षमिदं मतम् ।
अन्यथापि पदच्छेदस्तत्र यास्केन दर्शितः ॥ (१९)

---

**इन्द्रं॑ मि॒त्रं वरु॑णम॒ग्निमू॒तये॒ मारु॑तं॒ शर्धो॒ अदि॑तिं हवामहे ।**
**रथं॒ न दु॒र्गाद्व॑सवः सुदानवो॒ विश्व॑स्मान्नो॒ अंह॑सो॒ निष्पि॑पर्तन ॥**

इन्द्रम् । इन्द्रादीन् क्षराणाय[1] हवामहे रथमिव दुर्गाद्वासयितारः सुना[2] विश्वस्मादस्मानंहसो निष्पारयत ॥

कुत्स इन्द्रादीन् मारुतं च वेगं रक्षणार्थं हवामहे । एषु च आहूयमानेषु यूयं च वसवो रथमिव सारथयो दुर्गादस्मान् सर्वस्मात् पापात् निष्पारयत ॥ (१)

**त आ॑दि॒त्या आ ग॑ता स॒र्वता॑तये भू॒त दे॑वा वृत्र॒तूर्ये॑षु श॒म्भुवः॑ ।**
**रथं॒ न दु॒र्गाद्व॑सवः सुदानवो॒ विश्व॑स्मान्नो॒ अंह॑सो॒ निष्पि॑पर्तन ॥**

स्पष्टार्थोत्तरा । सर्वतातिर्युद्धमिति ॥

[1] Read रक्षणाय.

[2] Read सुदान.

ते यूयमादित्या आगच्छत वज्राय। भवत च देवाः संग्रामेषु सुखस्य भावयितारः॥ (२)

**अवन्तु नः पितरः सुप्रवाचना उत देवी देवपुत्रे ऋतावृधा।**
**रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन॥**

अस्तु[1]। स्पष्टैव। ययोर्देवास्सर्वे पुत्रा ये च सत्यं वर्धयतो द्यावापृथिव्याविति॥

रक्षन्त्वस्मान् पितरः सुस्तोत्राः। अपि च देव्यौ द्यावापृथिव्यौ यज्ञस्य वर्धयित्र्यौ ययोः सर्वे देवाः पुत्राः॥ (३)

**नराशंसं वाजिनं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे।**
**रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन॥**

स्पष्टैवोत्तरा। वाजयन्निति णिजन्तः इच्छायामपि जस्ति[2] यथाश्वायन्तो गव्यन्तो. वाजयन्त इति। वाजयन्तो हवामहे इति[3] क्यजन्तः। तस्मादवगृहीतः। वाजयन्निव क्र[4] रथान् इत्यपि[5] क्यजन्त एवेति। क्षयद्वीर इति बलिनं ब्रूते। यस्मिन् वीराः क्षीणा भवन्ति। सुम्नैः स्तोत्रैरिति॥

नराशंसमग्निं वयं हविष्मन्तोऽर्चयन्तोऽस्मिन् कर्मणि क्षपितवीरं बलिनं पूषणं च॥ (४)

[1] Read अवन्तु.
[2] Read अस्ति.
[3] R. V. 8. 11. 9.
[4] Read नू. What is written is either क्र or कृ,
[5] R. V. 2. 8. 1.

**बृहस्पते सदमिन्नः सुगं कृधि शं योर्यत्ते मनुर्हितं तदीमहे ।**
**रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥**

बृहस्पते । बृहस्पते सदैवास्माकं सुखं कुरु । यत्ते स्वभूतं शं च योश्च मनुष्यहितं तद्याचामहे ॥

बृहस्पते सदैवास्माकं सुखं कुरु । यत्तव शं च योश्च मनुष्यहितं तद्याचामहे ॥ (५)

**इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाळ्ह ऋषिरह्वदूतये ।**
**रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥**

स्पष्टोत्तरा । काद:[1] कूपः । कटिर्भेदनार्थः । तस्मिन्निहार्थः ळ्हः पतित[2] इति ॥

इन्द्रं कूपे पतितः कूपे निबध्यमानो वा कुत्स ऋषिः कर्मपतिं शत्रूणां हन्तारं रक्षणायाह्वत् ॥ (६)

**देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् ।**
**तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥**

देवैः । देवैः सहास्मा[3] देव्यदितिन्निपातु[4] । देवस्त्राता सविता च त्रायतामप्रमाद्यन्निति[5] ॥

[1] Read काटः.

[2] I am not certain of the reading.

[3] Read सहास्मान्.

[4] Read देव्यदितिर्निपातु.

[5] There is nothing here to mark the end of the Sūkta

देवैः सह देव्यदितिः अस्मान् रक्षतु । देवत्राता सविता च त्रायतां अप्रमाद्यन् ॥ (७)

---

य॒ज्ञो दे॒वानां॒ प्रत्ये॑ति सु॒म्नमादि॑त्यासो॒ भव॑ता मृळ॒यन्तः॑ ।
आ वो॒ऽर्वाची॑ सुम॒तिर्व॑वृत्याद॒ंहोश्चि॒द्या व॑रिवो॒वित्त॒रास॑त् ॥

यज्ञः । यजमानो देवानां प्रति गच्छति सुखम् । आदित्या भवतास्मभ्यं मृळयन्तः । आवर्ततां वस्सुमतिरस्मदभिमुखम् । या वस्सुमतिरंहोश्चित् कृशस्यापि[1]पुरुषस्य धनस्यास्मभ्यं लम्भयित्री भवति ॥

यज्ञो देवानां प्रति गच्छति । आदित्या भवत सुखयन्तः । युष्माकमस्मद्विषया सुमतिः पुनः पुनरावर्ततां अत्यन्तपापस्यापि दरिद्रस्य या अत्यन्तधनस्य लम्भयित्री भवति ॥ (१)

उप॑ नो दे॒वा अव॒सा ग॑म॒न्त्वङ्गि॑रसां॒ साम॑भिः स्तू॒यमा॑नाः ।
इन्द्र॑ इन्द्रि॒यैर्म॒रुतो॑ म॒रुद्भि॑रादि॒त्यैर्नो॒ अदि॑तिः॒ शर्म॑ यंसत् ॥

स्पष्ट उत्तरो द्वृचः[2] । आदित्यैर्नो अदितिः शर्म यंसत् इति पादः तृतीयेऽष्टके[3] न विसृजति । तत्र हि स पादस्सावित्र इति[4] ॥

उपगच्छन्त्वस्मान् देवा रक्षणेन सह अङ्गिरसां सामभिः स्तूयमानाः । इन्द्रो बलैर्मरुतश्च प्राणैरादित्यैश्च अदितिरस्मभ्यं सुखं यच्छतु ॥ (२)

[1] स्यापि mostly worm-eaten.

[2] Verses 2 and 3.

[3] R. V. 4. 54. 6.

[4] Here there is the figure 13 to mark the end of the Sūkta.

तन्न इन्द्रस्तद्वरुणस्तदग्निस्तदर्यमा तत्सविता चनो धात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

तदस्मदभिलषितमस्माकमिन्द्रः प्रयच्छतु अन्नम् । एवमितरे च ॥ (३)

---

य इन्द्राग्नी चित्रतमो रथो वामभि विश्वानि भुवनानि चष्टे ।
तेना यातं सरथं तस्थिवांसाथा सोमस्य पिबतं सुतस्य ॥

य इन्द्राग्नी चामनीयुतमो[1] रथो मामभिपश्यन्ति[2] सर्वाणि भुवनानि[3] तेन रथेनागच्छतं[4] समानं तं रथमातस्थिवांसौ । अथ सोमं पिबतं सुतमिति ॥

य इन्द्राग्नी पूज्यतमो रथो युवयोः सर्वाणि भुवनानि अभिविचष्टे तेन रथेनागच्छतमेकं रथमधितिष्ठन्तौ । अथ सोमं पिबतं सुतम् ॥ (१)

यावदिदं भुवनं विश्वमस्त्युरुव्यचा वरिमता गभीरम् ।
तावाँ अयं पातवे सोमो अस्त्वरमिन्द्राग्नी मनसे युवाभ्याम् ॥

यावत् । यावदिदं सर्वं भुवनं भवति बहुव्याप्तिकेनोश्रत्वेन[5] युक्तं

[1] Read चायनीयतमो.

[2] म of मा completely worm-eaten. Read वामभिपश्यन्ति.

[3] Folio 75a ends here.

[4] The letter छ mostly worm-eaten.

[5] Read बहुव्याप्तिकेनोरुत्वेन.

गभीरं अत्यन्त + + + + + तावानयं[1] पातुं युवयोर्भवतु सोमः पर्याप्तश्च भवतु युवयोर्मनस इति ॥

यावदिदं भुवनं सर्वं भवति बहुव्याप्तिकेन पृथुत्वेन गम्भीरं यावत्परिमाणमिदं दृश्यमानं त्रैलोक्यात्मकं भुवनमस्ति सकलं अयं सोमस्तावानस्तु युवयोः पानाय। यथा युवयोर्मनसे पर्याप्तं भवत्येतस्य यजुषोर्वीर्येण यावदेका देवता कामयते यावदेका तावदाहुतिः प्रथमे तेन हि तदस्ति यत्तावदेव स्यात् यावज्जुहोति इति तैत्तिरीयकम्। अपि गिरिमात्रं वर्धते तथा परिमितमेव च इति वाजसनेयकम् ॥ (२)

चक्राथे हि सध्र्य१ङ्नाम भद्रं सध्रीचीना वृत्रहणा उत स्थः।
ताविन्द्राग्नी सध्र्यञ्चा निषद्या वृष्णः सोमस्य वृषणा वृषेथाम् ॥

चक्राथे। चक्राथे हीन्द्राग्नी इति संगतं नाम भद्रम्। अपि च संगतौ वृत्रहणौ भवत[2]। तथा सति तौ युवामिन्द्राग्नी सहितावेव निषिद्य[3] वृषणौ वर्षितारं सोममासिञ्चेथां जठरे। इन्द्रावण[4]मधुमत्तमस्य इत्यत्र[5] पादो[6] न सृष्टः। तत्र हि सध्यङ्क्त्वे[7] तात्पर्यमस्तीति ॥

[1] After अत्यन्त seven letters are completely worm-eaten. The last two are identified as तावा. Five letters before this could not be decyphered.

[2] Read भवथः

[3] Read निषद्य.

[4] Read इन्द्रावरुणा.

[5] R. V. 6. 68. 11.

[6] The line वृष्णः सोमस्य वृषणा वृषेथाम्.

[7] The word is not clear.

इन्द्रोऽग्निरित्येतन्नामद्वयं कल्याणं सहाह्वनं कृतवन्तावैक्यात् । तथा युवां सहागमनौ च भवथ: उपद्रवाणां हन्तारौ । ताविन्द्राग्नी अस्मद्वेद्यां संगतौ सन्तावुपविश्य वर्षितारं सोमं वर्षितारावासिञ्चतं जठरम् ॥ (३)

**समिद्धेष्वग्निष्वानजाना यतस्रुचा बर्हिरु तिस्तिराणा ।**
**तीव्रैः सोमैः परिषिक्तेभिरर्वागेन्द्राग्नी सौमनसाय यातम् ॥**

समिद्धेषु । समिद्धेष्वग्निष्वागच्छन्तौ गृहीतस्रुचाध्वर्युर्बर्हिश्च स्तरन्तो भवक:[1] । प्रैस्सोमै:[2] परित: पात्रेषु सिक्तैरभिमुखमिन्द्राग्नी सोमनसार्थं[3] यातम । अपि तैर्भवति सौमनसमिति । इमामु षु सोमसुतिम् इत्यत्र[4] इन्द्राग्नी इति[5] पादस्सकत्वाह[6] विसृष्ट इति ॥

समिद्धेष्वग्निषु व्याप्रियमाणावध्वर्यू बर्हिश्चासनाय भवतो स्तरन्तौ । तीव्रान् सोमान् परित: पात्रेषु सिक्तान् पातुमस्माकं सौमनसं च प्रकाशयितुमिन्द्राग्नी अभिमुखमागच्छतम् ॥ (४)

**यानीन्द्राग्नी चक्रथुर्वीर्याणि यानि रूपाण्युत वृष्ण्यानि ।**
**या वां प्रत्नानि सख्या शिवानि तेभिः सोमस्य पिबतं सुतस्य ॥**

यानि । यानि वृत्रवधादीनि वीर्याणीन्द्राग्नी कृतवन्तौ । यानि च नानाविधानि शरीराणि अपि च वृष्ण्यानि कर्माणि । यानि च युवयो: प्रत्नानि शिवानि सख्याती[7] तै: सर्वै· सध्यञ्चावेव[8] पिबतं सुतं सोममिति ॥

[1] Read गृहीतस्रुचावध्वर्यू बर्हिश्च स्तरन्तौ भवत:.
[2] Read तीव्रै: सोमै:.
[3] Read सौमनसाय.
[4] R. V. 7. 93. 6. Written as इत्यत्रोन्द्राग्नी.
[5] The second Pāda.
[6] Word not certain.
[7] Read सख्यानि.
[8] Read सध्य्रञ्चावेव.

यानि वृत्रवधादीनीन्द्राग्नी कृतवन्तौ यानि च नानाशरीराणि अपि च कामप्रदानि यानि च युवयोरस्माभिः पुराणानि शिवतमानि सख्यानि तैः सर्वैर्हेतुभिः सोमं पिबतं सुतम् ॥ (५)

**यदब्र॑वं प्रथ॒मं वां वृणा॒नो३॒॑ऽयं सोमो॒ असु॑रैर्नो वि॒हव्यः॑ ।**
**तां स॒त्यां श्र॒द्धाम॒भ्या हि या॒तमथा॒ सोम॑स्य पिबतं सु॒तस्य॑ ॥**

यत् । यदयमब्रवं कर्मोपक्रमे एव वावृणानो यक्ष्ये वां सोमेनेति तत्र या मम श्रद्धा समजनि तां सत्यां श्रद्धामभ्या हि गच्छतम । अथ पिबतं सोमम् । तथा चायं सोमोऽस्माभिर्ऋत्विग्भिर्विशेषेण होतव्यो भवतीति ॥

यदब्रवमभिलषितं युवां वृणानः प्रथममेवाहं यत् करिष्यामीति प्रत्यज्ञासिषं अयं सोमोऽस्माकं प्राज्ञैर्ऋत्विग्भिर्विविधं युवाभ्यां होतव्यः तामिमां मदीयां श्रद्धामभ्यागच्छतम् । अथ सोमं पिबतम । इति श्रद्दधाने मयि आगत्य पिबतम ॥ (६)

**यदि॑न्द्राग्नी॒ मद॑थः॒ स्वे दु॑रो॒णे यद्ब्र॒ह्मणि॒ राज॑नि वा यजत्रा ।**
**अत॒ः परि॑ वृषणा॒वा हि या॒तमथा॒ सोम॑स्य पिबतं सु॒तस्य॑ ॥**

यत् । यदिन्द्राग्नी मदथ स्वे दुरोणे नभसि यदि वा ब्राह्मणेषु राजनि वा यष्टव्यौ । अतः परि सर्वस्मादिहागच्छतं वृषणाविति । राजनीति भावंपरमन्तोदात्तम्[1] । अहं भुवं यजमानस्य राजनि इति[2] ॥

यदिन्द्राग्नी तृप्यथ स्वे गृहे यदि वा ब्राह्मणेषु राजसु वा यष्टव्यौ तत्सर्वं परिहाय इहागच्छतं वर्षितारौ ॥ (७)

[1] Perhaps to read भुवंपरमन्तोदात्तम्,
[2] R. V. 10. 49. 4,

**यदि॑न्द्राग्नी यदु॑षु तु॒र्वशे॑षु यद्द्रु॒ह्युष्वनु॑षु पू॒रुषु॒ स्थः ।**
**अत॒: परि॑ वृषणा॒वा हि या॒तमथा॒ सोम॑स्य पिबतं सु॒तस्य॑ ॥**

स्पष्टोत्तरा ॥

यदुप्रभृतयो बहुयज्ञाः कुत्ससमकालीनाः ॥ (८)

**यदि॑न्द्राग्नी अव॒मस्यां॑ पृथि॒व्यां म॑ध्य॒मस्यां॑ प॒रमस्या॑मु॒त स्थः ।**
**अत॒: परि॑ वृषणा॒वा हि या॒तमथा॒ सोम॑स्य पिबतं सु॒तस्य॑ ॥**

यदिन्द्राग्नी । स्पष्टो द्वृचः[1] । श्रुतिरेकप्रदर्शनार्थमितितोऽमुतश्चाह्वानमिति[2] ॥

अन्तरिक्षं मध्यमा पृथिवी । द्यौः परमा ॥ (९)

**यदि॑न्द्राग्नी प॒रमस्यां॑ पृथि॒व्यां म॑ध्य॒मस्या॑मव॒मस्या॑मु॒त स्थः ।**
**अत॒: परि॑ वृषणा॒वा हि या॒तमथा॒ सोम॑स्य पिबतं सु॒तस्य॑ ॥**

प्रकारान्तरेणापि श्रद्धाप्रकाशनायाह्वानम् ॥ (१०)

**यदि॑न्द्राग्नी दि॒वि ष्ठो यत्पृ॑थि॒व्यां यत्पर्व॑ते॒ष्वोष॑धीष्व॒प्सु ।**
**अत॒: परि॑ वृषणा॒वा हि या॒तमथा॒ सोम॑स्य पिबतं सु॒तस्य॑ ॥**

यदिन्द्राग्नी[3] दिवि ओषधीष्वप्सु चेन्द्रो वसतीति वादात प्रतीमः ॥

उत्तरा निगदव्याख्या ॥ (११)

[1] The verses 9 and 10.

[2] The passage is not clear. The latter part must be प्रदर्शनार्थमितोऽमुतश्चाह्वानमिति. The early part may be श्रद्धातिरेक,

[3] Pratika not separately given.

**यदिन्द्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वधया मादयेथे ।**
**अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥**

स्पष्टोत्तरा । मध्ये दिवो मध्येह्नः ॥

उदयवेलायां यदिन्द्राग्नी कस्यचन यज्ञे सोमेन मदथः । अथवा अह्नो मध्ये । ततः कालादपि मामेवागच्छतं सर्वदा ॥ (१२)

**एवेन्द्राग्नी पपिवांसा सुतस्य विश्वास्मभ्यं सं जयतं धनानि ।**
**तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥**

एव । सुतमेवं पपिवांसाविति[1] ॥

एवमुक्तेन प्रकारेणागत्य सोमं पीतवन्तौ अस्मभ्यं सर्वाणि धनानि शत्रुभ्यः सह जयतम् ॥ (१३)

---

**वि ह्यख्यं मनसा वस्य इच्छन्निन्द्राग्नी ज्ञास उत वा सजातान् ।**
**नान्या युवत्प्रमतिरस्ति मह्यं स वां धियं वाजयन्तीमतक्षम् ॥**

वि हि । विह्यहमपश्यं मनसा श्रेय इच्छन् इन्द्राग्नी[2] युवामेव ज्ञातीन् अपिच सजातान् । तेऽसि श्रेयसो दाताः[3] । नान्या भवद्भ्या-

[1] Here there is the figure 14 to mark the end of the Sūkta.
[2] Folio 75*b* ends with इन्द्रा.
[3] Read दाता.

मन्येन दीयमाना प्रमतिरस्ति मह्यम्। पुनः कलेरकृणुतं युवद्वयं[1] इति[2] मनुबन्धमाद्युदात्तम्[3]। स्वां स्तुतिमश्वमिच्छन्तीं[4] अक्षम्[5] ॥

मनसाहमभ्युदयमिच्छन् विह्यपश्यम्। किमित्याह। इन्द्राग्नी एव मातृकुलजातान् ज्ञातीन् अपिच सजातांश्च। तावेवाहमपश्यम। तथा सति युवाभ्यां विना नान्येन देवेन दीयमाना प्रमतिरस्ति मह्यम्। तथा कृत्वाहं युवयोरेवान्नमिच्छन्तीमन्नप्रवणां धियं कर्म करोमि ॥ (१)

**अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात्।**
**अथा सोमस्य प्रयती युवभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यम् ॥**

अश्रवम्। अश्रौषं हि बहुदातारौ वां विजामातुः[6]। असमाप्तगुणो जामाता विजामातेति शश्वद्दाक्षिणाद्याः[7] क्रीताः पतिमाचक्षते[8]। सुसमाप्तगुणश्च ह वरोऽभिप्रेतः। अपिचस्यालात्[9]। स्यं शूर्प[10] स्यतेः। तस्माद्यो लाजानावपति स स्यालः। स भगिनीपीत्यर्थे[11] वहन्तुं[12]

[1] Read वयः It is written as युवद्वयमिति.

[2] R. V. 10. 39. 8.

[3] Read मतुबन्तमाद्युदात्तम्. This refers to the word युवत्.

[4] Read स्तुतिमन्नमिच्छन्तीं.

[5] The word is mostly worn-eaten.

[6] The Visarga looks only like Anusvāra; perhaps partly worm-eaten.

[7] Read शश्वद्दाक्षिणात्याः.

[8] Perhaps to read क्रीतापतिमाचक्षते.

[9] Read अपि च स्यालात्.

[10] स्यं शू completely worm.-eaten.

[11] Read भगिनीप्रीत्यर्थं.

[12] Read वहतुं.

प्रयच्छति। ततोऽप्येतौ दातारौ भवथः[1]। अथ सोमस्य प्रदानेन युवाभ्यामिन्द्राग्नी स्तोमं जनयामि नवतरमिति ॥

अश्रौषं हि बहुदातृतरौ वयं वां विजामातुः असमाप्ताज्जामातुः। विजामातेति शश्वद्दाक्षिणात्याः क्रीतापतिमाचक्षते। सुसमाप्तगुणश्च वरोऽभिप्रेतः। अपि च स्यालात्। स्यं शूर्पम्। तस्माद्यो लाजानावपति स स्यालः। स भगिनीप्रीत्यर्थं वहतुं प्रयच्छति। तस्मादपि। अथ सोमस्य प्रदानेन युवाभ्यामिन्द्राग्नी स्तोमं जनयामि नवतरम् ॥ (२)

मा च्छेद्म रश्मीँरिति नाधमानाः पितॄणां शक्तीरनुयच्छमानाः।
इन्द्राग्निभ्यां कं वृषणो मदन्ति ता ह्यद्री धिषणाया उपस्थे ॥

मा छेद्म। मा विच्छिन्नानि कुर्मः सन्तानानीति वां याचमानाः पितॄणां शक्तिः सन्ततीरनुक्रमेण यच्छन्त इन्द्राग्निभ्यां कं वृषणः स्तोतारः स्तोत्रं कुर्वन्ति। तौ ह्यद्री स्तुत्या[2] समीपे भवतः। वीरोऽद्रिराद्दणातीति। यचा[3] सोममिन्द्राग्निभ्यां ग्रावाणो मदन्ति। धिषणा अधिषवणचमूरिति ॥

इन्द्राग्नी इत्थं याचमानाः पितॄणां पितृपितामहादिवदनुक्रमेण वयमपि नियच्छन्तो रश्मीन् पुत्रान् मा छेद्मेति पुत्रानाशास्ते। इन्द्राग्निभ्यामन्यं कं देवं ग्रावाणो मदन्ति। तौ हि शत्रूणां मादयितारौ सोमाभिषवणसाधनभूताया धिषणायाः समीपे भवतः। धिषणासि पर्वत्या। धिषणासि पार्वतेयी। इति यजुषी भवतः। हविर्यज्ञस्य सोमयज्ञसाम्यं ते सम्पादयतः। तयोर्दृष्टो धिषणाशब्दः। अपि वा कमन्यं यजमानाः स्तुवन्ति। तौ हि स्तुवतः समीपे भवतः ॥ (३)

[1] Read भवतः.

[2] Read स्तुत्याः.

[3] Word not certain.

युवाभ्यां देवी धिषणा मदायेन्द्राग्नी सोममुशती सुनोति ।
तावश्विना भद्रहस्ता सुपाणी आ धावतं मधुना पृङ्क्तमप्सु ॥

युवाभ्याम् । युवाभ्यां देवी धिषणाधिषवणचमू[1] कामयमाना सोममभिषुणोति । तावश्ववन्तो[2] भद्रहस्तौ शोभनपाणी आधावतं मधुना सह वृङ्क्तां[3] चास्मानप्सु । अपिवा तं मध्विति ॥

देवी युवयोर्मदाय श्रद्दधाना धिषणा सोममभिषुणोति । तावश्ववन्तौ भजनीयबाहू कल्याणपाणी भवदीयेन मधुना आगच्छतम् । तदस्मिन्नभिषूयमाणे सोमे संपर्चयतम् ॥ (४)

युवामिन्द्राग्नी वसुनो विभागे तवस्तमा शुश्रव वृत्रहत्ये ।
तावासद्या बर्हिषि यज्ञे अस्मिन्प्र चर्षणी मादयेथां सुतस्य ॥

युवाम् । युवामिन्द्राग्नि[4] वसुनो[5] दाने वर्तमानौ बलवत्तमौ वृद्धतमौ वाश्रौषं संग्रामे । तौ यज्ञेऽस्मिन् बर्हिष्यासद्य प्रकर्षेण माद्यकं[6] सोमेन द्रष्टाराविति ॥

युवामिन्द्राग्नी संग्रामे बलवत्तमौ वसुनो विभागे उद्युक्तौ अहमश्रौषम् । अस्मिन् यज्ञे तौ स्तीर्णे बर्हिष्यासद्य द्रष्टारौ प्रकर्षेण माद्यतं सोमेन ॥ (५)

[1] Read धिषणाधिषवणचमू.

[2] Read तावश्ववन्तौ.

[3] Read पृङ्क्तं.

[4] Read युवामिन्द्राग्नी.

[5] First written वसुना. Then ए mark added before ना below line.

[6] Read माद्यत.

प्र चर्षणिभ्यः पृतनाहवेषु प्र पृथिव्या रिरिचाथे दिवश्च ।
प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनात्यन्या ॥

प्रचर्षणिभ्यः । प्ररिरिचाथे[1] सर्वाभ्यश्च चर्षणिभ्यः पृतनाह्वानेषूपतिष्ठन्ताविति वाक्यशेषः । शिष्टं स्पष्टम् । अन्यानि च भुवनान्यतिप्ररिरिचार्थे[2] ॥

असुराणां संग्रामाह्वानेषु तत्रत्येभ्यः सर्वेभ्योऽपि मनुष्येभ्यः अतिशयेन बलेन अतिरिक्तौ भवतः । एवं पृथिव्यादिभ्योऽपि युवयोर्बलं अतिरिक्तं महत्त्वेन प्ररिरिचाथे। इन्द्राग्नी सर्वाण्येवान्यानि भुवनानि उक्तेभ्यो यद्यन्यानि सन्ति तानि चेति समानार्थमति दृष्ट्वा निवर्तते (?) ॥ (६)

आ भरतं शिक्षतं वज्रबाहू अस्माँ इन्द्राग्नी अवतं शचीभिः ।
इमे नु ते रश्मयः सूर्यस्य येभिः सपित्वं पितरो न आसन् ॥

आभरतम् । आभरतं धनम् । दत्तं च तदस्मभ्यं वज्रबाहू अस्मान् इन्द्राग्नी अवतं कर्मभिः । इमे नु ते रश्मयस्सूर्यस्य भवन्ति यै रश्मिभिरस्माकं पितरस्सपित्वं सह प्राप्तव्यः[3] स्थानमासन् । सूर्यस्यरन्वारभ्य नूनं पितॄन्नभिगच्छन्ति भृताः सूर्य इन्द्र इति तद्रश्मीनां स्तुतिः[4] ॥

आभरतं धनानि । आहृत्य चास्मभ्यं प्रयच्छतमायुधहस्तौ अस्मानिन्द्राग्नी रक्षतं कर्मभिः । इमे खलु ते रश्मयः सूर्यस्य यैरिन्द्राग्न्योः स्वभूतैरस्माकं पितर ऐक्यं गताः अङ्गिरसः । सूर्यरश्मिभिराप्याययन्त ॥ (७)

[1] The second रि added after the first below line.

[2] Read भुवनान्यतिप्ररिरिचाथे.

[3] Read प्राप्तव्यं.

[4] The passage is not clear.

पुरंदरा शिक्षतं वज्रहस्तास्माँ इन्द्राग्नी अवतं भरेषु ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

स्पष्टोत्तरा[1] ॥

असुरपुराणां दारयितारौ धनानि प्रयच्छतं वज्रहस्तौ अस्मानिन्द्राग्नी रक्षतं च संग्रामेषु । तन्नः ॥ (८)

---

ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते ।
अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृप्णुत ऋभवः ॥

ततम् । ततम्मया कर्म । तदु तायते । स्वादुतमाहुतिः[2] स्तुत्याय शस्यते गणाय । अपिचायं समुद्रः सोमरसः सर्वेभ्यो देवेभ्यः पर्याप्तः । आयं[3] च स्वाहाकृतेनाने[4] ऋभवस्संतृप्यत ॥

ततं मे कर्म । तदेव पुनस्तायते । स्वादुतमा स्तुतिश्च स्तुत्याय ऋभूणां गणाय शस्यते । अपि च अयं समुद्रसदृशो विश्वदेव्यः सोम इह सुतः । तेन ऋभवः संतृप्यत ॥ (१)

आभोगयं प्र यदिच्छन्त ऐतनापाकाः प्राञ्चो मम के चिदापयः ।
सौधन्वनासश्चरितस्य भूमनागच्छत सवितुर्दाशुषो गृहम् ॥

[1] Here there is the figure 15 to mark the end of the sūkta.

[2] Folio 76 a ends with तमाहु.

[3] Read अयं.

[4] Read स्वाहाकृतेन.

आभोगयम् । आभोगय आभोग्यस्सोमः । तमिच्छन्तो ये आयं[1] प्रैतनारण्या[2] तपसे अपाज्ञाः[3] प्राज्ञाः[4] प्राश्वः पूर्वे मम केचन ज्ञातयः । कुत्सश्चाङ्गिरसः । ऋभवः सौधन्वनासश्चरितस्य तपसो भूम्नागच्छत सवितुर्दाशुषो गृहं: तदानीम् ॥

सुधन्वन आङ्गिरसस्य कुत्सस्य पुरातनाः केचन ज्ञातयो भवन्ति अपक्तव्यप्रज्ञा अभोगयं अभोग्यम् । अकारलोपाभावः छान्दसः । यज्ञे सोममिच्छन्तः तपश्चरणाय यदा यूयमपक्तव्यप्रज्ञा गतवन्तः तदा सुधन्वनः पुत्रा ऋभवः तपश्चरणस्य महत्तया अमृतत्वप्रदातुः सवितुः तपसोऽन्ते देवैरमृतत्वमेषां प्रदातव्यमिति प्रार्थितस्य गृहमगच्छत ॥ (२)

**तत्सविता वोऽमृतत्वमासुवदगोह्यं यच्छ्रवयन्त ऐतन ।**
**त्यं चिच्चमसमसुरस्य भक्षणमेकं सन्तमकृणुता चतुर्वयम् ॥**

तत्सविता[5] । तदानीं सविता रंपदापेक्षितं श्रावयन्तः[6] ऐतन । तं च चमसं त्वष्ट्रा कृतं सोमस्य भक्षणमेकं सन्तमकृणुत श्चतुर्व्यूहम्[7] ॥

ततः कथमभूदित्याह । तदा सविता युष्माकममृतत्वं प्रायच्छत् । यदा गूहितुमशक्यं सवितारमन्नमिच्छन्तो गतवन्तः । तं चमसं सोमस्य भक्षणमेकं सन्तं अकृणुत चतुर्व्यूहम् ॥ (३)

[1] Read आपयः.
[2] Read प्रैतनारण्यं.
[3] Read अप्राज्ञाः.
[4] This word not wanted.
[5] ता at the end completely worm-eaten.
[6] Something is evidently missing after सविता.
[7] Read चतुर्व्यूहम्.

**विष्ट्वी शमी॑ तरणि॒त्वेन॑ वा॒घतो॒ मर्ता॑सः॒ सन्तो॑ अमृत॒त्वमा॑नशुः ।**
**सौ॒ध॒न्व॒ना ऋ॒भवः॒ सूर॑चक्षसः संवत्स॒रे सम॑पृच्यन्त धी॒तिभिः॑ ॥**

विष्ठी । निरुक्तम्---कृत्वा कर्माणि क्षिप्रत्वेन वोघारो[1] मेधाविनो वा मर्तासः सन्तोऽभृततत्वमानशिरो[2] । सौधन्वना ऋभवः सरणप्रख्यानाः सरणप्रज्ञा वा संवत्सरे समपृच्यन्त धीतिभिः कर्मभिर्देवैरैक्यं प्राप्ता इति[3] ॥

कृत्वा कर्माणि क्षिप्रत्वेन वोढारोऽमरणधर्माणः सन्तोऽमृततत्वमानशिरे । सौधन्वना ऋभवः सूक्ष्मदर्शनाः संवत्सरे देवैः संगता आसन् चमसव्यूहादिभिः कर्मभिः । ऋभूणामादित्यरश्मिभिरैक्यं अगोह्यस्य यदसस्तना इत्यस्यां (ऋ. वे. १. १६१. ११) उक्तम् ॥ (४)

**क्षेत्र॑मिव॒ वि म॑मु॒स्तेज॑नेनँ॒ एकं॒ पात्र॑मृ॒भवो॒ जेह॑मानम् ।**
**उप॑स्तुता उप॒मं नाध॑माना॒ अम॑र्त्येषु॒ श्रव॑ इ॒च्छमा॑नाः ॥**

क्षेत्रमिव । मानदण्डेन क्षेत्रमिव विममुः शस्त्रेण एकं पात्र[4] ऋभव इतरेतरं हस्तेषु[5] प्रर्यमाणम्[6] । उपस्तुतास्समीपस्थैरुपमं नाथमाना उपमं प्रशस्तमन्नं याचमानाः देवोक्तं अमर्त्येषु श्रव इच्छमाना[7] इति ॥

मानदण्डेन भूमिमिव शस्त्रेण विकर्तनार्थं हस्ताद्धस्ते संचरमाणमेकं पात्रं विविधं कृतवन्तः समीपस्तुता देवानां समीपं कामयमाना देवेषु सोममिच्छमानाः ॥ (५)

[1] Read वोढारो.

[2] Read सन्तोऽमृततत्वमानशिरे.

[3] N. 11. 10.

[4] Read पात्रं.

[5] ह is omitted and space left blank.

[6] Read प्रेर्यमाणम्.

[7] The letter ना is not at all legible. Some other letter seems to have been corrected into it.

**आ म॒नी॒षाम॒न्तरि॑क्षस्य॒ नृभ्यः॑ स्रु॒चेव॑ घृ॒तं जु॑हवाम वि॒द्मना॑ ।**
**त॒र॒णि॒त्वा ये पि॒तुर॑स्य सश्चि॒र ऋ॒भवो॒ वाज॑मरुहन्दि॒वो रजः॑ ॥**

आ मनीषां यथा स्रुचा घृतमाजुहुवति[1] एवं वयमन्तरिक्षस्य नेतृभ्यो मध्यमस्थानपठितेभ्यः स्तुतिं कुर्मः प्रज्ञाने[2] । तराणि[3] तानि कौशलानि ये पितरस्य[4] सवितुः सश्चिरे रस्मिभूताः[5] तेन सह तरन्तीत्यर्थः । त ऋभवो दिवो रजसो वाजमरुहन् । दिवोऽन्नं सोमात्मकं तदलभ्यतेत्यर्थः ॥

यथा स्रुचा घृतमाजुह्वति एवं वयमन्तरिक्षस्य नेतृभ्यो मध्यमस्थानपठितेभ्यः स्तुतिं कुर्मः प्रज्ञानेन । क्षिप्रत्वेन ये पितृभूतस्यास्य सवितुरमृतत्वमासादितवन्तः ते दिवो लोकादन्नं सोमात्मकमधिष्ठितवन्तो देवेभ्यः सोमपीथं प्राप्ताः ॥ (६)

**ऋ॒भुर्न॒ इन्द्रः॒ शव॑सा॒ नवी॑यानृ॒भुर्वाजे॑भि॒र्वसु॑भि॒र्वसु॑र्द॒दिः ।**
**यु॒ष्माकं॑ देवा॒ अव॒साह॑नि प्रि॒ये३॑ऽभि ति॑ष्ठेम पृत्सु॒तीरसु॑न्वताम् ॥**

ऋभुर्नः । ऋभुरस्माकमिन्द्रो दीप्तो बलेन नवतः[6] । ऋभुरन्नैर्वसुभिश्च वासयिता ददिर्भवतु तेषां यैर्वासयति[7] । युष्माकं देवा ऋभवो रक्षणेनास्मिन्नहनि प्रियेऽभितिष्ठेः[8] । पृत्सुस्सेना[9] असुन्वताम ॥

[1] Read घृतमाजुह्वति.
[2] Read प्रज्ञानेन.
[3] Perhaps to read तरणानि.
[4] Read पितुरस्य.
[5] Read रश्मिभूताः.
[6] Read नवतरः.
[7] Passage not quite clear.
[8] Read भितिष्ठेम.
[9] Read पृत्सुतीस्सेनाः.

ऋभुरस्मभ्यं बलेन सर्वदा नवतरो भवति । तदा वासयितृभिर्वाजेभिः सह वसूनां दाता भवति । ऋभुर्विभ्वा वाज इति त्रयः ऋभवः । तत्र प्रथमोत्त-माभ्यां बहुवन्निगमा भवन्ति । युष्माकमृभवो रक्षणेन प्रकाशकानां प्रियेऽस्मिन् दिवसे यजमानानां सेना वयमभिभवेम ॥ (७)

**निश्चर्मण ऋभवो गामपिंशत सं वत्सेनासृजता मातरं पुनः ।**
**सौधन्वनासः स्वपस्यया नरो जिव्री युवाना पितराकृणोतन ॥**

निश्च + मु[1] । कस्यचिदृषेर्धेनुमृषात[2] । सेनोरनुत्पन्नं[3] वत्सं दृष्ट्वा ऋभूंस्तुष्टाव । तत ऋभवः तस्माश्चर्मादाय[4] तादृशीमन्यां धेनुं कृत्वा तच्चर्मणा[5] संवीय वत्सेन तेन तां पुनस्समयोजयन् । स्यादिदं[6] पूर्वार्धेनोक्तम् । सौधन्वनाः शोभनेन[7] कर्मणा नेतारौ[8] जीर्णौ पितरौ पुनश्च युवानौ कृणोतनेति ॥

कस्यचिदृषेर्धेन्वां मृतायां तस्याश्चर्म संन्यदधात् । अथ वत्सं रुदन्तं दृष्ट्वा ऋभूनस्तौत् । अथ ते तच्चर्मादाय कांचन धेनुं शिल्पकौशलेन कृत्वा बहिश्चर्मणा संधाय तपोमाहात्म्येन तां सप्राणां चक्रुः । अथ तेन वत्सेन पुनरपि तां मातरं समसृजन् । निष्पिंशतिः संघटनकर्मा । सौधन्वनाः शोभनकर्मेच्छया नेतारो जीर्णावात्मीयौ पितरौ युवानौ कृणोतन ॥ (८)

[1] Read निश्चर्मणः. Space for a letter left blank before मु.
[2] Perhaps to read कस्यचिदृषेर्धेनुर्मृता.
[3] Read धेनोरनुतपन्तं.
[4] Read तस्याश्चर्मादाय.
[5] Read तच्चर्मणा.
[6] Read इदं.
[7] Folio 76*b* ends with शोभने.
[8] Read नेतारो.

**वाजेभिर्नो वाजसातावविड्ढ्यृभुमाँ इन्द्र चित्रमा दर्षि राधः ।**
**तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥**

वाजेभिः । ऋभुर्विभ्वा वाज इति त्रय ऋभवः । ते चेन्द्रेण संयुक्ता इति तद्विशिष्टस्येन्द्रस्य स्तवः[1] ॥

वाजेन भ्रात्रा सहितैर्भवद्भिः सहास्मान् संग्रामे रक्ष । ऋतुभिः सहितं चित्रं धनमिन्द्र शत्रूणामादारय । इति साहचर्यात् इन्द्रस्य स्तुतिः ॥ (९)

---

**तक्षन् रथं सुवृतं विद्मनापसस्तक्षन् हरी इन्द्रवाहा वृषण्वसू ।**
**तक्षन् पितृभ्यामृभवो युवद्वयस्तक्षन् वत्साय मातरं सचाभुवन् ॥**

तक्षन् । तक्षन् रथमश्विनोः सुवर्तने[2] सुचक्रं वा । विद्रत्नपसः[3] परिज्ञानेन व्याप्नुवानाः । यद्वा वब्धकर्माणः[4] । तक्षंश्च हरीन्द्रस्य वोढारौ । वृष्यमाणधनो[5] वृषण्वसू ब्रुवते । तक्षंश्च पितृभ्यां यौवनयुक्तं वय ऋभवः । शरीरवयश्शब्दः[6] । तक्षंश्च वत्साय मातरं सचाभुं[7] संगताम् । अपिवा यातस्य वत्सस्य सचाभूस्सहचारिणी । तत्सदृशीमेवेत्यर्थः ॥

[1] Here there is the figure 16 to mark the end of the sūkta.
[2] Read सुवर्तनं.
[3] The first letters are not at all legible. अपसः परिज्ञानेन is clear.
[4] Perhaps to read लब्धकर्माणः
[5] Read वृष्यमाणधनौ.
[6] Perhaps to read शरीरवचनो वयःशब्दः.
[7] Read सचाभुवं.

अकुर्वन् रथं सुवर्तनं ज्ञानेन शिल्पकर्मणोऽश्विभ्याम् । तक्षन् अश्वाविन्द्रस्य वोढारौ प्रदीयमानधनौ । तक्षन् पितृभ्यामृभवो युवत्वयुक्तं वयः । तक्षंश्च वत्साय मातरं सहजातामात्मीयाम् । इति कर्ममात्रसमुद्देशः सूक्ते ॥ (१)

**आ नो॑ य॒ज्ञाय॑ तक्षत ऋभु॒मद्व॒यः क्रत्वे॒ दक्षा॑य सुप्र॒जाव॑ती॒मिष॑म ।**
**यथा॒ क्षया॑म॒ सर्व॑वीरया वि॒शा तन्नः॒ शर्धा॑य धासथा॒ स्वि॑न्द्रि॒यम् ॥**

आ नः । आतक्षतास्माकं यज्ञार्थं दीप्तिमदन्नम् । तदेवाह । कर्मणो बलाय सुप्रजावतीमिषं आतक्षत । यथा निवसेम सर्वैर्वीरैर्युक्तया विशा सह । कीदृशं[1] धनमस्मभ्यं बलाय सुष्ठु धत्त । धननामेन्द्रियमिति ॥

आकुरुतास्माकं यज्ञकरणाय दीप्तमायुः कर्मणो वृद्धये च शोभनप्रजायुक्तमन्नं च । यथा निवसेम सर्वैर्वीरैर्युक्तया विशा तादृशं धनमस्मभ्यं सुष्ठु दत्त बलाय ॥ (२)

**आ त॑क्षत सा॒तिम॒स्मभ्य॑मृभवः सा॒तिं रथा॑य सा॒तिमर्व॑ते नरः ।**
**सा॒तिं नो॒ जैत्रीं॒ सं म॑हेत वि॒श्वहा॑ जा॒मिमजा॑मि॒ पृत॑नासु स॒क्षणि॑म् ॥**

आतक्षत । कुरुत धनमस्मभ्यमृभवः । धनं रथाय । रथो रंहणो वीरः । धनं वीराय धनमश्वाय । धनमस्माकं च ददत्त[2] जयशीलं बहुत्वात । संमहेत । आजयन्तु[3] सर्वोजः[4] सर्वदा जामिमजामिं वा शत्रुं पृतनास्वभिभवन्तं वयमभिभवेमेति ॥

[1] Read तादृशं.

[2] Perhaps to read ददत । But there is no corresponding word in the text.

[3] The first letter is not at all legible. It is read as आ only as a guess. There is no corresponding word in the text.

[4] For this too there is no corresponding word in the text.

आकुरुत धनमस्मभ्यमृभवो धनं रथाय धनमर्वते नेतारः । सर्वो लोको भवदीयामस्मद्विषयां सातिं शत्रूणां जयशीलां सर्वदा संपूजयेत् । ज्ञातिमज्ञातिं च युद्धेषु सहमानम् ॥ (३)

**ऋभुक्षणमिन्द्रमा हुव ऊतयं ऋभून् वाजान् मरुतः सोमपीतये ।**
**उभा मित्रावरुणा नूनमश्विना ते नो हिन्वन्तु सातये धिये जिषे ॥**

ऋभुक्षणम् । महान्तमिन्द्रं रक्षणार्थमाह्वयामि । तथा ऋभून् वाजान् मरुतश्च सोमपानार्थम् । ऋभून् वाजनिन्ति[1] प्रथमोत्तमाभ्या[2] अभूनेवाह[3] । तथा मित्रावरुणावश्विनौ । तेऽस्मान् प्रेरयन्तु सनाय[4] कर्मणे जयाय चेति ॥

महान्तमिन्द्रं रक्षणार्थमाह्वयामि । एवमृभून् वाजेन युक्तान् मरुतश्च सोमपानाय आह्वयामि । तथोभौ मित्रावरुणौ अश्विनौ च । तेऽस्मान् प्रेरयन्तु धनाय कर्मणे जयाय च ॥ (४)

**ऋभुर्भराय सं शिशातु सातिं समर्यजिद्वाजो अस्माँ अविष्टु ।**
**तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥**

ऋभुः । ऋभुः संग्रामायास्माकं धनं तीक्ष्णीकरोतु । संग्रामजिद्वाजश्चास्मानवतु[5] ॥

ऋभुः संग्रामाय धनं तीक्ष्णीकरोतु । संग्रामजिद्वाजश्चास्मान् अवतु ॥ (५)

---

[1] Read वाजानिति.
[2] Read प्रथमोत्तमाभ्यां.
[3] Read भ्रातॄनेवाह.
[4] Read सननाय.
[5] Here there is the figure 17 to mark the end of the sūkta.

ईळे द्यावापृथिवी पूर्वचित्तयेऽग्निं घर्मं सुरुचं यामन्निष्टये ।
याभिर्भरे कारमंशाय जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतम् ॥

ईळे । स्तौति[1] द्यावापृथिव्यौ पूर्वचित्तये । अश्विनावागच्छतमिति पूर्वमेव प्रज्ञापनं पूर्वचित्तिः । द्यावापृथिव्यौ हि अश्विनौ[2] पूर्वं यज्ञे आगच्छतः । तथाग्निं च स्तौमि । सुरुचः[3] प्रव्रजनेन रुचिरमपि नेह विभृतम्[4] । यामन् आगमने अश्विनोरिष्टयर्थम् । क्लृप्तं[5] कार[6] इति शंखं ब्रुवते । कारं न विश्वे अह्वन्त देवाः इति[7] । याभिरूतिभिस्त्राणैरभिगम्य संग्रामेऽशस्य विजयार्थं शंखं शब्देन पूरयामासथुः ताभिरूतिभिः सहेदानी-मस्मानपि सुष्ठोगच्छतमिति[8] ॥

स्तौमि द्यावापृथिव्यौ यजमानाय पूर्वं मुख्यमस्माकमग्निम् । घर्म आदित्यः । तं च सुदीप्तिं यज्ञेऽभिलषितसिद्धयर्थम् । याभिः संग्रामे शंखमंशाय ऋषये शब्देन पूरयामासथुः तैः परिरक्षणैः अस्मानपि सुष्ठागच्छतमश्विनौ ॥ (१)

युवोर्दानाय सुभरा असश्चतो रथमा तस्थुर्वचसं न मन्तवे ।
याभिर्धियोऽवथः कर्मन्निष्टये ताभिरू षु ऊतिभिरश्विना गतम् ॥

[1] Read स्तौमि.

[2] Read अश्विनोः

[3] Read सुरुचं.

[4] The portion after रुचिरं not clear.

[5] This word seems not wanted.

[6] Read कारं.

[7] R. V. 5. 29. 8.

[8] Read सुष्ठागच्छतमिति. Folio 77*a* ends with सु.

युवोः । युवोरथं धनार्थं[1] सुभराः शोभनस्तोत्रभरणाः स्तोतारोऽसक्ता आतिष्ठन्ति । वचसं वाश्मिनमिव[2] मन्तवेऽर्थज्ञानार्थम् । याभिः स्तोतॄनवथः कर्मणीष्टये प्रवृत्तानिति ॥

युवयोः स्तोतृभ्यो दानाय सुनिर्भरा असक्तारो ये रथमातिष्ठन्ति यथा शब्दं परप्रत्ययनार्थाभिधेया आतिष्ठन्ति । याभिः स्तोत्राण्यवथो यजमानानां कर्मण्यभिलषिताय क्रियमाणानि ॥ (२)

**युवं तासां दिव्यस्य प्रशासने विशां क्षयथो अमृतस्य मज्मना ।**
**याभिर्धेनुमस्वं पिन्वथो नरा ताभिरू षु ऊतिभिरश्विना गतम् ॥**

युवम् । युवं तासां विशां प्रशासनेऽनुशासने[3] क्षयथः प्रभवथो दिव्यस्याभृतस्य[4] मयोर्बलेन[5] । यद्वा दिव्यमुदकं विशां दातुमीश्वरा भवतो बलेन युक्तौ । याभिर्धेनुमस्वं निवृत्तंप्रसवां[6] पयसापूरय[7] होतारौ । शयवे चिन्नासत्या शचीभिः इति[8] वा ॥

युवं तासां विशां मनुष्याणां दिव्यस्य च देवगणस्य प्रशासने वर्तेथेऽमृतस्य बलेन । यैः पालनैः निवृत्तप्रसवां धेनुं शयवे पिन्वथः नेतारौ ॥ (३)

[1] Read युवयोः दानार्थं for युवोरथं धनार्थं.

[2] Read वाग्मिनमिव.

[3] The first letter नु much worm-eaten; the bit that remains appears like तु.

[4] Read दिव्यस्यामृतस्य.

[5] Read मयोबलेन.

[6] Read निवृत्तप्रसवां

[7] Read पयसापूरयथ.

[8] R. V. 1. 116. 22.

याभिः परिज्मा तनयस्य मज्मना द्विमाता तूर्षु तरणिर्विभूषति ।
याभिस्त्रिमन्तुरभवद्विचक्षणस्ताभिरू षु ऊतिभिरश्विना गतम् ॥

याभिः । याभिः परितो वायुरग्नेस्तनयस्य बलेन द्वयोर्लोकयोर्निर्माता कुष्ठतरणिर्विभवति[1] ये तांत्रितुरः तेभ्योऽप्यायन्तरणिः[2] । त्रिमन्तुरिति कक्षीवन्तं ब्रुवते । स याभिरभवद्विचक्षणः । कक्षीवते अरदतं पुरन्धिम्[3] इति ॥

याभिः परितो गन्ता वायुरात्मपुत्रस्याग्नेर्बलार्थं द्वयोर्लोकयोर्निर्माता क्षिप्राणामपि मध्येऽतिशयेन क्षिप्रो विविधशरीरो भवति । याभिश्च कक्षीवानभवद्विद्वान् त्रैकाल्यज्ञानात्त्रिमन्तुः ॥ (४)

याभी रेभं निवृतं सितमद्भ्य उद्वन्दनमैरयतं स्वर्दृशे ।
याभिः कण्वं न सिषासन्तमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥

याभिः । याभिश्च रेभं नाम ऋषिं निवृतं कूपेऽप्सु सितमासुरैः पाठैर्बद्धं[4] ताभ्योऽद्भ्य उदैरयतम् । तथा तादृशमेव वन्दनं चोदैरयतं स्वदृशे[5] आदित्यं द्रष्टुम् । याभिश्च कण्वं प्रावृतं[6] सिषासन्तमालोकं संभक्तुमिच्छन्तं अन्धकारैसुरैः[7] क्षिप्तमिति ॥

[1] Read तूर्षु तरणिर्विभूषति.

[2] Expression not clear. Perhaps to read ये अतितुरः तेभ्योऽप्ययं तरणिः

[3] R. V. 1. 116. 7.

[4] Read पाशैर्बद्धं.

[5] Read स्वर्दृशे.

[6] Read प्रावतं.

[7] Read अन्धकारेऽसुरैः.

रेभं स्नात्वाग्निहोत्रार्थं गच्छन्तं असुरा बध्वा ह्रदे प्रचिच्छिपुः। तत्र निभृतं तिरोहितं दश रात्रीर्धारयांचक्रुः। वन्दनश्च जीर्णः कूपसमीपेन गच्छन् कूपे पपात। ताविमावश्विभ्यामादित्यं द्रष्टुं उदकादुत्तारितौ। याभिश्च कण्वं वां संभक्तुं इच्छन्तं प्ररक्षथुः॥ (५)

**याभिरन्तकं जसमानमारणे भुज्युं याभिरव्यथिभिर्जिजिन्वथुः।**
**याभिः कर्कन्धुं वय्यं च जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतम्॥**

याभिः। अगाधं अरणम्। आङुपसृष्टादर्तेराकर्षणार्थात्। याभिरन्तकं नामारणे उपक्षीयमाणम्। याभिश्च भुज्युं तुग्रपुत्रमव्यथिभिर्नौभिर्पयतम्। अपिवा अरक्षतम्। याभिः कर्कन्धुं वय्यं च जिन्वथः। तावप्यगाधे जले पीडिताविति। त्वत् मभीवमवनिं विवयेधनाम्[1] इति॥

याभिरन्तकमृषिं अगाधे निमज्यन्तं भुज्युं च याभिरकम्पिताभिः ररक्षथुः। याभिश्च कर्कन्धुं वय्यं तुर्वीतिं च॥ (६)

**याभिः शुचन्तिं धनसां सुषंसदं तप्तं घर्ममोम्यावन्तमत्रये।**
**याभिः पृश्निगुं पुरुकुत्समावतं ताभिरू षु ऊतिभिरश्विना गतम्॥**

याभिः। याभिश्च शुचन्तिं नाम धनस्य संभक्तारं शोभनसंसदं अकृणुतम्। याभिश्च तप्तमग्निमोम्यावन्तमकृणुतं अत्रये। सुखनाम कवतेरेत्येति[2]। याभिः पृश्निगुं पुरुकुत्सं चावतम्। यूने वृत्रं पुरुकुत्सारन्धिः[3] इति॥

[1] Read त्वं महीमवनिं विश्वधेनाम्. R. V. 4. 19. 6.
[2] Expression not clear. Perhaps to read अवतेरोम्येति.
[3] R. V. 1. 174-2 Read पुरुकुत्साय रन्धीः.

राजयक्ष्मणा गृहीतं ब्राह्मणेभ्यः सर्वस्वस्य दातारं स्तोत्रैः शोभनसहासनं (?) शुचन्तीं नीरुजं चक्रथुः । अत्रिमृषिं असुरैरग्नौ प्रक्षिप्तं अग्निमुदकेन संशमय्य पालनं तस्मै चक्रथुः । याभिश्च पृश्निगुं पुरुकुत्सं च ररक्षथुः ॥ (७)

**याभिः शचीभिर्वृषणा परावृजं प्रान्धं श्रोणं चक्षस एतवे कृथः ।**
**याभिर्वर्तिकां ग्रसितामुमुञ्चतं ताभिरू षु ऊतिभिरश्विना गतम् ॥**

याभिः । याभिरूतिभिः[1] शचीभिः कर्मभिः प्रज्ञाभिर्वा वृषणौ परावृजं नाम पंङ्ग[2] सन्तमपङ्गुमकृणुतम् । याभिश्चान्यमृषिं[3] चक्षसे प्रकृथः[4] । याभिश्च श्रोणं विगुणजानुमेतवे गन्तुं प्रकृवः[4] । याभिश्च वर्तिकां वृकेण ग्रसितामुमुञ्चतम् । स विद्वाँ अपगोहं[5] कनीनाम्[6] इत्युक्तम् । वञ्जीभिः[7] पुत्रमभ्रुवो[8] अदानम्[9] इति च ॥

यैः कर्मभिर्वर्षितारौ परावृजं नाम ऋषिमन्धं पङ्गुं च दर्शनाय गमनाय च प्रचक्रथुः । याभिर्वृकेन ग्रस्तां वर्तिकां अमुञ्चतं वृकास्यात् ॥ (८)

**याभिः सिन्धुं मधुमन्तमसंश्चतं वसिष्ठं याभिरजरावजिन्वतम् ।**
**याभिः कुत्सं श्रुतर्यं नर्यमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥**

1 The word ऊतिभिः not wanted.
2 Read पङ्गुं.
3 Read याभिश्चान्धमृषिं.
4 Read प्राकृथः in both places.
5 The letter द्वाँ missing; space for it left blank.
6 R. V. 2. 15. 7.
7 Folio 77*b* ends here. Read वम्रीभिः.
8 Read पुत्रमग्रुवो.
9 R. V. 4. 19. 9.

याभिः । रसा सिन्धुः । तां प्रवृद्धजलां याभिरसश्चतम् । सश्चरतिरास्वादनार्थः[1] । यथातजिह्वो असश्चतेति[2] । वसिष्ठं च याभिरजरावरक्षतम् । याभिश्च कुत्सादींस्त्रीनरक्षतमिति ॥

याभिः सिन्धुमुदकवन्तं पीतोदकं चक्रथुः । वसिष्ठं च याभिः पुत्रप्रदानेन अजरौ ररक्षथुः । याभिश्च कुत्सादींस्त्रीन् आवतम् ॥ (९)

**याभिर्विश्पलां धनसामथर्व्यं सहस्रमीळ्ह आजावजिन्वतम् ।**
**याभिर्वशमश्व्यं प्रेणिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥**

याभिः याभिश्च विश्पलां नाम संग्रामे धनं भजमानां अथर्व्यमतदुर्गगतीश्च[3] बहुधने संग्रामेऽजिन्वतम् । याभिश्च वशमृषिमश्वस्य पुत्रं दीपयितारमावतमिति[4] ॥

यैः पालनैर्विश्पलां नाम स्त्रियं ऐलस्यार्थाय तस्य शत्रुभिः सह युध्यन्तीं शत्रुभिः छिन्नजङ्घां गच्छन्तीं सहस्रधननिमित्ते संग्रामे ऐलस्य पुरोहितेनागस्त्येन स्तुतावश्विनौ लोहमयजङ्घाप्रतिसंधानात् ररक्षथुः । याभिरश्वस्य पुत्रं वशं नाम राजानं स्तोत्रैः तर्पयितारं हस्तिबलैः शत्रुभिरभिभूयमानं ररक्षथुः ॥ (१०)

**याभिः सुदानू औशिजाय वणिजे दीर्घश्रवसे मधु कोशो अक्षरत् ।**
**कक्षीवन्तं स्तोतारं याभिरावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥**

[1] Read सश्चतिरास्वादनार्थः.

[2] Not clear; not traced.

[3] Expression not clear.

[4] There is a dot above प after न्दी, which makes it पं or it may be a mark to delete it. It is the meaning of प्रेणिम्; perhaps to read प्रीणयितारम्. Read after this only आवतम्.

याभिः । औशिजो दीर्घश्रवा नाम कश्चिदनावृष्ट्यामकरोद्वाणिज्यम् । तस्मै जलमक्षरत् । अश्विनोः प्रसादौ मेघः[1] । याभिश्च कक्षीवन्तमावतमिति ॥

याभिः शोभनदानौ कक्षीवते वणिग्वृत्तये पर्वतमध्ये गताय दीर्घश्रवसे जलं मेघोऽक्षरत् । इत्येतदेवाह कक्षीवन्तमिति ॥ (११)

**याभी॑ र॒सां क्षोद॑सो॒द्नः पि॑पि॒न्वथु॑रन॒श्वं याभी॒ रथ॒माव॑तं जि॒षे ।**
**याभि॑स्त्रि॒शोक॑ उ॒स्रिया॑ उ॒दाज॑त॒ ताभि॑रू॒ षु ऊ॒तिभि॑रश्वि॒ना ग॑तम् ॥**

याभिः । याभिश्च रसां नदीं वीतोदकां क्षोदसोद्नः । क्षुदिर्घर्षणार्थः । क्षोदकेनोदकेन पूरितवन्तौ[2] । याभिश्चानश्वं[3] मुद्गलस्य रथमावन्त[4]जयार्थम् । याभिश्च कण्वपुत्रः त्रिशोक उस्त्रिशोक[5] उस्त्रिया[6] उदाजत ॥

पणिभिरपहृतासु गोषु तत्र गमनार्थं रसाया एव नद्या उदकं प्रथममास्येनाश्विनौ पपथुः । अथ कार्ये समाप्ते प्रागुदकेन यः क्षुण्णो मार्ग आस्यात्मकः तेनैव पुनरप्यश्विनौ पूरितवन्ताविति । तथानश्वश्च कदाचित् अश्विनो रथोऽभूद्युद्धे । तं जयाय युद्धमध्ये ररक्षथुः । त्रिशोक आत्मीयाभिर्गोभिः सह स्वर्गं जिगमिषुः स्वर्गं गा उदाजतम् ॥ (१२)

[1] Passage not clear.
[2] After पूरि what is written looks more like तु than त.
[3] Read याभिश्चानश्वं.
[4] Read रथमावतं.
[5] उस्त्रिशोकः not wanted.
[6] Read उस्त्रियां

**याभिः सूर्यं परियाथः परावति मन्धातारं क्षैत्रपत्येष्वावतम् ।**
**याभिर्विप्रं प्र भरद्वाजमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥**

याभिः । याभिश्च सूर्यं परिगच्छथः परावति स्थितम् । याभिश्च मन्धातारं यौवनाश्वं क्षैत्रपत्येषु प्रवृत्तं कर्मस्वावतम् । याभिश्च मेधाविनं भरद्वाजनं[1] प्रावतं क्षुधार्तमिति ॥

याभिः सूर्यं परिगच्छथो दूरे । मन्धातारं च शत्रुभ्यस्तेषु तेषु क्षैत्रपत्येषु सप्तद्वीपविषयेषु ररक्षथुः । याभिश्च मेधाविनं भरद्वाजं प्रावतम् ॥ (१३)

**याभिर्महामतिथिग्वं कशोजुवं दिवोदासं शम्बरहत्य आवतम् ।**
**याभिः पूर्भिद्ये त्रसदस्युमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥**

याभिः । याभिर्महान्तमतिथीनभिगच्छन्तं दातारं कशोजुवं भयेनोदकं प्रतिगन्तारं दिवोदासं तस्य शत्रोः शम्बरहनने आवतम् । याभिः पूर्भिद्ये युद्धे मृदसदस्यामवामिति[2] ॥

याभिर्महान्तं अतिथीन् प्रति गन्तारं तान् परिचरन्तं दिवोदासं शम्बरहनने ररक्षथुः । याभिश्च पुरो भेदने त्रसदस्युमावतम् ॥ (१४)

**याभिर्वम्रं विपिपानमुपस्तुतं कलिं याभिर्वित्तजानिं दुवस्यथः ।**
**याभिर्व्यश्वमुत पृथिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥**

[1] Read भरद्वाजं or भरद्वाजनामानं.

[2] Read त्रसदस्युमावतमिति.

याभिः[1] वैखानसं वभ्रं[2] विपिपानमपिबन्तं पार्थिवं रसमावतम् । याभिश्चोपस्तुतम् । अग्निः सातावुपस्तुतम्[3] इत्युक्तम् । याभिश्च कालीभृषिं[4] वृत्तजानिं लब्धभार्यं दुवस्यथोऽरक्षतम् । याभिश्च व्यश्वं अपिच पृथिव्यामावतमिति[5] ॥

याभिर्वम्रादींस्त्रीन् ररक्षथुः । कलिरपि वृद्धः सन् तरुणीं जायां गृहीत्वा पुनर्यौवनमलभत । दुवस्यतिः प्रीणनार्थः । याभिश्चाङ्गिरसं व्यश्वं अपिच पृथिमावतम् ॥ (१९)

**याभि॒र्नरा॑ श॒यवे॒ याभि॒रत्र॑ये॒ याभिः॑ पु॒रा मन॑वे गा॒तुमी॒षथुः॑ ।**
**याभिः॒ शारी॒राज॑तं॒ स्यूम॑रश्मये॒ ताभि॒रू॒ षु ऊ॒तिभि॑रश्विना॒ ग॑तम् ॥**

याभिः । रयाभिर्नरा[6] शयवे धेनुमपिन्वतम् । याभिश्चात्रये । हिमेनाग्निं घ्रंसमवारयेथाम्[7] । याभिश्च पुरा मनवे गातुमीषथुरिति त्रिष्वपि सम्बध्यते[8] । गातुश्चोपद्रुतानामुपद्रवात् गमनोपायः । वयं[9] वृकेणाश्विना

1 Pratika not separately given. भि is mostly worm-eaten. There is another letter after it, which is not a visarga.

2 Read वम्रं.

3 R. V. I. 36. 17. Read साता उपस्तुतम्.

4 Read कलिमृषिं.

5 Read पृथिमावतमिति.

6 The letter र before याभिर्नरा not wanted.

7 R. V. 1. 116. 8.

8 But there is धेनुमपिन्वतं given in the commentary for the first, namely शयवे.

9 Read यवं.

वपन्ता[1] इत्युक्तम् । ईषधुरिच्छार्थमिति । याभिश्च सूमरश्मये[2] शारीरिषू-राजतं[3] प्रैरयतमिति ॥

अधेनोर्धेनुकरणार्थं अग्निप्रशमनार्थं च शंयुमत्रिं च याभिश्च पुरा मनवे राज्ञे अनावृष्ट्या अनडुत्सु परिक्षीणेषु कर्षणविमुखे राष्ट्रे ररक्षथुः । इन्द्रो यतीन् सालावृकेभ्यः प्रायच्छत् । तेषां स्यूमरश्मिरश्विनौ तुष्टाव । स वृकेभ्योऽश्विभ्यां शरमयीरिषूः वृकवधार्थं विसृज्य रक्षितः ॥ (१६)

**याभिः पठर्वा जठरस्य मज्मनाग्निर्नादीदेच्चित इद्धो अज्मन्ना ।**
**याभिः शर्यातमवथो महाधने ताभिरू षु ऊतिभिरश्विना गतम् ॥**

याभिः । याभिश्च पर्वो[4] नाम जःरस्य[5] बलेन । जठरशब्दार्थो बाहुश्रुतेव्यो[6]ऽवगन्तव्यः । उदरवचनस्तु[7] मध्योदात्तो भवति । न चोदरेण बलं सम्बन्धम्[8] । जठरमग्निं[9] पठर्वाश्विभ्यां लेभे इति व्याख्यातारो ब्रुवते । न तत्प्रमाणोपेतम् । लिखति[10] हि स्वमतेन । इतिहासो न दृष्टः । ताण्डकशाट्यायनकवाजसनेयिका अपर्यालोचितकृस्तदारतयाः[11] । तस्माद्-

[1] R. V. 1. 117. 21.

[2] Read स्यूमरश्मये.

[3] Perhaps to read शारीः इषून् आजतम्.

[4] Read पठर्वा.

[5] Read जठरस्य.

[6] Read बहुश्रुतेभ्यो.

[7] Folio 78*a* ends with उ.

[8] Read संबद्धम्.

[9] Read जाठरमग्निं.

[10] Read लिखितं or लिखन्ति.

[11] Expression not clear.

स्माभिस्ते लिखिताः । अग्निरिद्दीप्त आसीत् । काष्ठैश्चित इद्धो यज्ञगृहे युध्वो-पर्वोदिदेदिति[1] । याभिश्च शार्यातं[2] मानवमिन्द्रेण स्पर्धमानमवथस्संग्रामे ॥

पठर्वा नामासन्नजातोऽग्निः । पश्चात् प्रवृद्धाग्नेर्जठरस्य दीप्तिबलेन गृहे यजमानैर्होमार्थं संचितकाष्ठैः समिद्धः इवाग्निः प्रजज्वाल । याभिश्च शर्यातमवथः संग्रामे ॥ (१७)

**याभिरङ्गिरो मनसा निरण्यथोऽग्रं गच्छथो विवरे गोअर्णसः ।**
**याभिर्मनुं शूरमिषा समावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥**

याभिः । याभिः स्तोतॄन् स्तोत्रेण निरमेथे । मन एव वा मनः । अङ्गिर इत्यात्मन एवामन्त्रणम् । तच्च वाक्यात् पृथग्भूतमिति विभक्त्यनु-क्रमण्यामुक्तम्[3] । याभिश्चाग्रं गच्छतेथा[4] विवरणार्थो[5] गोअर्णसो यस्य गोरूपस्य[6] । गोअर्णसं रयिमिन्द्रेण[7] इत्युक्तम् । याभिर्मुनुं शूरमन्नेन पृथिव्यामुप्तेन समावतमिति ॥

याभिर्गमनशीलौ स्तोतॄन् धनैर्निरमेथे बुद्धिपूर्वम् । याभिश्चासुरैरपहृताभि-र्गोभिर्युक्तस्य पर्वतस्य विवरे प्रवेशे युद्धार्थं गतानां देवानां अग्रमगच्छतम् । याभिश्च मनुं राजानं शूरं स्वयं हलकर्षितेनान्नेन प्रावतम् ॥ (१८)

[1] Text not correct. Not traced.

[2] Read शर्यातं.

[3] After विभक्त्यनु nearly one inch space is left blank as leaf is bad and क्रमण्यामुक्तम् follows.

[4] Read गच्छथो. After ते and before था there is space for a letter blank; if त is deleted, what remains is थो.

[5] Something not quite clear.

[6] Passage not clear.

[7] R. V. 10. 38. 2. First written रयिमिन्द्रेणत्युक्तम्. Then ए mark added before ण below line.

**याभिः पत्नीर्विमदाय न्यूहथुरा घ वा याभिररुणीरशिक्षतम् ।**
**याभिः सुदास ऊहथुः सुदेव्यं१ ताभिरू षु ऊतिभिरश्विना गतम् ॥**

याभिः । याभिः पत्नीर्विमदाय न्यूहथुः[1] । एकस्यामेव बहुवचनं बहुशो दृष्टम् । यामिश्चरुणीर्गा[2] अशिक्षतम् । याभिस्सुदासो राज्ञ ऊहथुः सुदेव्यं धनमिति ॥

विमदाय परिणीतां भार्यां याभिः स्वगृहं प्रत्यूहथुः । याभिर्विमदायारुणीर्गाश्चाशिक्षतम । याभिश्च सुदासे राज्ञे धनमूहथुः ॥　　　　(१९)

**याभिः शंताती भवथो ददाशुषे भुज्युं याभिरवथो याभिरध्रिगुम् ।**
**ओम्यावतीं सुभरामृतस्तुभं ताभिरू षु ऊतिभिरश्विना गतम् ॥**

याभिः । याभिः शंकरौ भवथो यजमानाय । भुज्युं याभिरवथः । याभिश्चाध्रिगुम् । सुखयुतां सुभरामिषं प्रापयेथे याभिश्च ऋतस्तुभमृषिमिति ॥

याभिः शंकरौ भवथो यजमानाय । भुज्युं च समुद्रमध्ये विपन्ननावं याभिरवथः । याभिश्चाधृतगमनमिन्द्रम् । युवं सुराममश्विना (ऋ. वे. १०. १३१. ४) इति मन्त्रः । पालनवतीं धनपूर्णामिमां सत्यां स्तुतिम । ताभिरागतम ॥.　　　　(२०)

**याभिः कृशानुमसने दुवस्यथो जवे याभिर्यूनो अर्वन्तमावतम् ।**
**मधु प्रियं भरथो यत्सरड्भ्यस्ताभिरू षु ऊतिभिरश्विना गतम् ॥**

[1] About one inch space left blank before and also after न्यूह as leaf is bad.

[2] Read याभिश्चारुणीर्गा.

याभिः । याभिः कृशानुं सोमपालं युद्धे दुवस्यथः दुरक्षथुः[1] । याभिश्च जवे प्रवृत्तमश्वं यूने आवतम् । याभिश्च प्रिय[2] मधु सरड्भ्यो मक्षिकाभ्यो भरथः ॥

कृशानुं नाम सोमपालं असुरैः सोममपजिहीर्षद्भिः सह युध्यन्तं क्षीणशरं इषुप्रदानेन ररक्षथुरिषुप्रेषणकाले । मृगयामटतः शर्यातस्य राज्ञो यूनोऽश्वः प्रमादात् तपस्यन्तं स्थाणुभूतं भृगुं प्रतिपपात । तमतिजवे वर्तमानमश्विनौ निवारयामासतुः । चिन्तितमात्रौ तौ युवां वृष्ट्यभावात् हीनेषु मधु आहृतवन्तौ यद्धितं सरड्भ्यः ॥ (२१)

**याभिर्नरं गोषुयुधं नृषाह्ये क्षेत्रस्य साता तनयस्य जिन्वथः ।**
**याभी रथाँ अवथो याभिरर्वतस्ताभिरू षु ऊतिभिरश्विना गतम् ॥**

याभिर्नरम् । रयाभिर्नरं[3] यजमानं गोषु युध्यन्तं युद्धे क्षेत्रस्य भजनार्थं तथा तनयस्य भजनार्थम् । तनय इति धननाम । जिन्वथो रक्षथः । याभिश्च यजमानानां रथानश्वांश्चावतम् ॥

याभिर्भरद्वाजं नरं गोनिमित्तं युध्यन्तं युद्धे क्षेत्रस्य तनयस्य च भजननिमित्तं युध्यन्तं जिन्वथः । याभिश्च तस्य रथानश्वांश्च अवथः ॥ (२२)

**याभिः कुत्समार्जुनेयं शतक्रतू प्र तुर्वीतिं प्र च दभीतिमावतम् ।**
**याभिर्ध्वसन्तिं पुरुषन्तिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥**

[1] Read रक्षथुः

[2] Read प्रियं.

[3] Read याभिर्नरं.

उत्तरा निगदसिद्धा । आर्जुनेयोऽजन्याः[1] पुत्रः । यद्वार्जुन[2] इतीन्द्रः । तस्य पुत्रः । एतद्वा इन्द्रस्य गुह्यं नाम दर्जुन[3] इति वाजसनेयकमिति ॥

याभिः कुत्समर्जुन्याः पुत्रं मां शतकर्माणौ प्रावतं तुर्वीतिं दभीतिं च । ध्वस्रो नाम राजा ध्वसन्तिरुच्यते । तस्य भार्या पुरुषन्ती । ध्वस्रयोः पुरुषन्त्योः (ऋ. वे. ९—५८. ३) इति मन्त्रः ॥ (२३)

**अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषाम् ।**
**अद्यूत्येऽवसे नि ह्वये वां वृधे च नो भवतं वाजसातौ ॥**

अप्नस्वतीम् । कर्मयुक्तामश्विनौ वाचमस्माकं कुरुतम् । कुरुतं चास्माकं दस्रा वृषणौ बुद्धिं निपुणाम् । अद्यूत्ये रश्मिवर्जिते रत्रेः[4] पश्चिमे यामनि अवसे सा निह्वये वामिति ॥

कर्मवतीमश्विनौ वाचमस्माकं कुरुतं दर्शनीयौ वर्षितारौ प्रज्ञया । न इति पूरणम् । अद्यूत्ये बलाभावात् युद्धवर्जिते संग्रामे रक्षणाय वां विह्वये । तथा सति अस्मिन् संग्रामे वर्धनाय च भवतम् । अप्नस्वतीं वाचं च कुरुतम् ॥ (२४)

**द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिः ।**
**तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥**

[1] Read आर्जुनेयोऽर्जुन्याः

[2] र्जु is written as जजु.

[3] Read यदर्जुन.

[4] Read रात्रेः written रत्रत्रेः and first त्र scored.

द्युभिः[1] । दिवसेभ्यो रात्रिभ्यश्च परिरक्षत + + + + तैरश्विनौ[2] धनैः शोभनैरिति ॥

+ + + कर्माण्यृषिराह[3] कुत्सः कक्षीवदार्थे जेषिभिश्च तत्र[4] ।
नासीत्प्रपञ्चः कथितस्तु येषां भहुश्रुतास्तानि वदन्तु विप्राः ॥

अहोरात्रैरस्मान् परिरक्षतम् । अपिवा अहोरात्रेभ्योनुपहिंसितैः भवदीयैः कल्याणैः । इतिहासा विस्पष्टा भविष्यन्ति । नासत्याभ्यामित्यादिषु बहुभिः सूक्तं निरूपणीयम् ॥ (२९)

इत्थं सप्तममध्यायं व्याकरोत् प्रथमेऽष्टके ।
जातो यो गोपनकुले माधवो वेङ्कटात्मजः ॥

सप्तमोऽध्यायः

---

[1] Folio 78*b* ends here.

[2] After परिरक्षत four or five letters are broken off. Perhaps to read परिरक्षतमस्मानबाधितैरश्विनौ. The letter before तै ends in इ. The letter after रक्षत can be म.

[3] Three letters in the begining broken off; the last must be a conjunct consonant with य as the second. Perhaps to read संगृह्य.

[4] The line seems corrupt.

## अष्टमोऽध्यायः[1]

इदं॑ श्रेष्ठं॒ ज्योति॑षां॒ ज्योति॒रागा॑च्चि॒त्रः प्र॑के॒तो अ॑जनिष्ट॒ विभ्वा॑ ।
यथा॒ प्रसू॑ता सवि॒तुः स॒वायँ॑ ए॒वा रात्र्यु॒षसे॒ योनि॑मारैक् ॥

इदं श्रेष्ठम् । इदं श्रेष्ठ[2] ज्योतिषा ज्योतिषा[3] ज्योतिरागतमाभूत्[4] । तदेवोक्तम्—चित्र इति । चायनीयः कश्चिदौषसो रश्मिः प्रादुरभूत् विभु[5] । यथा प्रसूता उषाः सवितुरादित्यस्य । सवितुरेव वा । प्रसवाय भवति । एवं रात्र्युषसे स्थानमारिचत् दात्मनः[6] पश्चार्धे[7] इदं श्रेष्ठ[8] ज्योतिषां ज्योतिरुत्तमम्[9] इति चतुष्को[10] विसृष्टः । चसापि[11] पादो नूनमौषसः । सूक्तादौ चेह श्रुत इति ॥

[1] This is not in the manuscript. The commentary is in continuation of the end of the last chapter.

[2] Read श्रेष्ठं.

[3] Read ज्योतिषां ; one ज्योतिषा is extra.

[4] Read ज्योतिरागतमभूत्.

[5] Read विभुः

[6] Read आत्मनः or read स्थानमारिचदात्मनः

[7] I am not sure of this word पश्चार्धे=in the latter part.

[8] Read श्रेष्ठं.

[9] R. V. 10. 170. 3.

[10] The group of four words इदं श्रेष्ठं ज्योतिषां ज्योतिः

[11] Read स चापि.

कुत्सः । इदं प्रशस्यतमं ज्योतिषां ज्योतिः उषआख्यं प्रादुरभूत् । चित्रं प्रज्ञानं विभूततमं जातं मनुष्याणाम् । यथेयं रात्रेर्जाता सवितुरादित्यस्य प्रसवाय भवति एवमस्या उषसो योनिमरिचत् आत्मनोऽन्ते स्थानं प्रकल्पितवती ॥ (१)

**रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः ।**
**समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥**

रुशद्वत्सा । सूर्यमुषसो वत्समाह । श्वेतवत्समाह श्वेतवत्समाह[1] । श्वेतवत्सा स्वयं श्वेता उषा आगात् । अनिचत्[2] कृष्णा रात्रिः स्थानान्यस्याः । समानबन्धने अमरणधर्माणावनूच्यावनुषक्ते द्यावा नभसा चरतः सर्वेषां रूपं जनयन्त्यौ[3] । यद्वा अन्योन्यरूपं हिंसन्त्यौ । निरुक्तं[4] च द्रष्टव्यमस्य द्वृचस्येति ॥

श्वेतवत्सा श्वेता उषा आगात् । सूर्यं वत्समाह साहचर्यात् । अरिचत् कृष्णा सदनानि अस्या रात्रिः । अथैवं संस्तौति—समानबन्धू समानबन्धने अमरणधर्माणौ अनूची द्योतमाने अन्योन्यस्यात्मीयं वर्णं कुर्वाणे चरतः ॥ (२)

**समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे ।**
**न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥**

समानः । एक एव मार्गोऽनयोः स्वस्रोरपर्यन्तः । तमध्वानमन्यान्या चरतः देवैरनुशिष्टे । ते इमे न मेथेतेऽन्योन्यम् । मेथतिराक्रोशकर्मा । न च तस्थतुः क्वचित् सुमेके सुरूपे । मिचिराश्लेषकर्मेति । नक्तोषासा समानमनस्के नानारूपे ॥

[1] These two words not wanted.
[2] Read अरिचत्.
[3] न is completely worm-eaten.
[4] N. 2. 19 and 20.

एको मार्गोऽपर्यन्तोऽहोरात्रयोर्गमनस्य । तं देवैरनुशिष्टे चरतः । एकस्यां गतायां अन्या । तस्यां गतायां अपरा । ते न संघर्षा + + + + न च क्षणमपि तिष्ठतः शोभनपरिमाणे । संवत्सरो वै सुमेकः । स ह्येकचर इति तु ब्राह्मणम् । अहोरात्रे समनस्के भिन्नरूपे ॥ (३)

**भास्वती नेत्री सूनृतानामचेति चित्रा वि दुरो न आवः ।**
**प्राप्या जगद्व्यु नो रायो अख्यदुषा अजीगर्भुवनानि विश्वा ॥**

भास्वती । भास्वती नेत्री सूनृतानामज्ञायि चित्रा उषा व्यावृणोच्च नः तमसा तिरोहितानि द्वाराणि । सैषा जगदः[1] स्तोकं चक्षुः प्रार्पयन्ती धनमस्माकं प्रकाशयति । सेयमुषा विश्वानि भुवनान्युज्जगारेति प्रकाशनादाह ॥

भास्वती उषा वाचां नेत्री पूर्वस्यां प्रज्ञायते चित्रवर्णा । अन्धकारपरिवृतानि चास्माकं द्वाराणि विवृणोति । मनुष्यचक्षुषि अन्धकारेण तिरोहितं जगत् समर्पयन्ती अस्माकं धनार्थं व्यौच्छत् । सेयमुषा विश्वान्येव भुवनानि उज्जगार ॥ (४)

**जिह्मश्येे३ चरितवे मघोन्याभोगयं इष्टये राय उ त्वम् ।**
**दभ्रं पश्यद्भ्य उर्विया विचक्ष उषा अजीगर्भुवनानि विश्वा ॥**

जिह्मश्ये । शयने कुटिलं शयानाय चरणार्थं मघोन्युषा आभोगाये[2] आभोगार्थम् । यकार उपजनः । यद्वा आहुर्जिराभोगः[3] आभोगयं प्र यदिच्छन्दंच[4] ऐतन[5] इति । तदर्थं एकं प्रति । यज्ञार्थं अपरम् ।

[1] Read जगतः

[2] Read आभोगये.

[3] Perhaps to read आभुजिराभोगय:

[4] Read यदिच्छन्त.

[5] R. V. 1. 110. 2.

धनार्थं अपरम् । दभ्रं दभ्नोरेतरल्पमल्पं[1] पश्यत्[2] । उरवे भिस्तीर्णाय[3] दर्शनाय व्युच्छन्ती भवति[4] ॥

कुटिलं शयानस्य शयनार्थं उषा आभोगार्थं यागार्थं धनार्थं च अपरं प्रत्यन्धकारात् स्वल्पं पश्यद्भ्यो मनुष्येभ्य उरु दर्शनार्थम् ॥ (५)

**क्षत्राय त्वं श्रवसे त्वं महीया इष्टये त्वमर्थमिव त्वमित्यै ।**
**विसदृशा जीविताभिप्रचक्ष उषा अजीगर्भुवनानि विश्वा ॥**

क्षत्राय । धनाय त्वम् । अन्नाय महते त्वम् । यज्ञाय त्वम् । अपेक्षितं प्रति गमनार्थमिव त्वं प्रति[5] । विसदृशा नानारूपाणि जीवितोपायभूतान्यपि भिद्रष्टुं[6] व्युच्छन्ती + + षे[7] । यद्वा भुवनानीति रश्मिनाम । तान्युद्गिरन्तीति ॥

क्षत्राय त्वं कंचन प्रतिधनायेव प्रेरयितुमपरं प्रति अन्नायेव महतेऽन्नं प्रति यागायापरं प्रति सिषाधयिषितमर्थं प्रति गन्तुम् । एवं नानाजातीयकानि जीवनसाधनानि अभिप्रदर्शयितुम् ॥ (६)

**एषा दिवो दुहिता प्रत्यदर्शि व्युच्छन्ती युवतिः शुक्रवासाः ।**
**विश्वस्येशाना पार्थिवस्य वस्व उषो अद्येह सुभगे व्युच्छ ॥**

[1] Read दभ्रातेः । अल्पमल्पं.
[2] Read पश्यद्भ्यः.
[3] Read विस्तीर्णाय.
[4] Folio 79*a* ends here.
[5] Perhaps this word is not wanted.
[6] Read अभिद्रष्टुं.
[7] Two letters broken before षे. May be दाशुषे.

एषा । एषा दिवो दुहिता प्रत्यदर्शि । प्रादुर्भवन्ती तरुणी शुक्र-दीप्तिः । विश्वस्येसाना[1] पत्विवस्य[2] धनस्य । उषा अद्यात्र सुधने व्युच्छ ॥

एषा दिवो दुहिता प्रतिदृश्यते प्रादुर्भवन्ती तरुणी शुक्रदीप्तिः विश्वस्य पार्थिवस्य धनस्येशाना उषा अद्य शोभनधने व्युच्छात्र ॥ (७)

**प॒रा॒य॒ती॒नामन्वे॑ति॒ पाथ॑ आय॒ती॒नां प्र॑थ॒मा शश्व॑तीनाम् ।**
**व्यु॒च्छन्ती॑ जी॒वमु॑दी॒रय॑न्त्यु॒षा मृ॒तं कं च॒न बो॒धय॑न्ती ॥**

परायतीनाम् । परागच्छन्तीनामुषसां मार्गमनुगच्छति । तासामन्तिमा भवति । आगच्छन्तीनां बह्वीनां प्रथमा च भवति । व्युच्छन्ती जीवं प्राणिनं शयनादुत्थापयन्ती गतेन्द्रियत्वान्निद्रया मृतमिव कञ्चन बोधयन्तीति ॥

परागच्छन्तीनामुषसां मार्गमनुगच्छति । तासामन्तिमा भवति । आगच्छन्तीनां बह्वीनां प्रथमा भवति । प्रादुर्भवन्ती प्राणिजातं शयनादुत्थापयन्ती गतेन्द्रियत्वात् मृतमिव कंचन बोधयन्ती ॥ (८)

**उषो॒ यद॒ग्निं स॒मिधे॑ च॒कर्थ॒ वि यदाव॒श्चक्ष॑सा॒ सूर्य॑स्य ।**
**यन्मानु॑षान् य॒क्ष्यमा॑णाँ॒ अजी॑ग॒स्तद्दे॒वेषु॑ चकृषे भ॒द्रमप्नः॑ ॥**

उषः । उषो यदग्निं + + न्धना[3] चकर्थ । तस्माद्योद्योषसं[4]

[1] Read विश्वस्येशाना.

[2] Read पार्थिवस्य.

[3] Two letters completely broken before न्धना. Read यदग्निं समिन्धनाय.

[4] Read तस्माद्यदोषसं.

जुहोति तदेव संप्रति[1] इत्यध्वर्युब्राह्मणम् । यच्च विवृणोषि तेजसा सूर्यस्य तमसा तिरोहितम्[2] । यच्च मानुषान्यक्षमाणानुद्विरसि । तदिदं त्रिविधं कल्याणं कर्म त्वमेव देवानां मध्ये करोषि ॥

उषो यत्त्वमग्निं समिन्धनाय चकर्थ यच्च सूर्यतेजसा जगद्रक्षसि यच्च यक्ष्यमाणान् मानुषानुद्विरसि तदिदं त्रिविधं देवमध्ये कृतवती कल्याणं कर्म ॥ (९)

**कियात्या यत्समया भवाति या व्यूषुर्याश्च नूनं व्युच्छान् ।**
**अनु पूर्वाः कृपते वावशाना प्रदीध्याना जोषमन्याभिरेति ॥**

कियति । कियति काले तदुपक्रान्तं संसितं[3] वा भवति । प्रश्नार्थे आकारः । यस्मिन् काले इयमुषास्समया भवति । समयेति समीपवचनः । येन कालेन सैषा संयुक्ता स कियांस्विदिति वितर्कः । एतदेवाह—याः पुरा व्यूषुः याश्च संप्रति व्युच्छन्तीति । सेयमनुकल्पते व्युष्टा उषसः कामयमाना प्रदीप्यमाना सहान्याभिरागच्छति भविष्यन्तीभिः ॥

कियति देशे स्विद्यस्मिन्नियं व्युच्छन्ती देशे समीपे भवति । अहमिह पश्यामि । क्व क्व चेयमन्यत्र संगच्छते इति वितर्कः । याः पुरा व्यूषुः याश्च संप्रति व्युच्छन्ति सर्वास्ता कियति भवन्ति । सेयं पूर्वा उषसोऽनुकल्पते कामयमाना । तासां पश्चात् भवति । प्रदीप्यमाना सहान्याभिरागच्छति ॥ (१०)

**ईयुष्टे ये पूर्वतरामपश्यन् व्युच्छन्तीमुषसं मर्त्यासः ।**
**अस्माभिरू नु प्रतिचक्ष्याभूदो ते यन्ति ये अपरीषु पश्यान् ॥**

[1] T. B. 2. 1. 2.

[2] आ mark in ओ completely broken off.

[3] Word not quite clear.

ईयुः। मृतास्ते ये पूर्वतरामुषसमपश्यन् व्युच्छन्तीं मर्त्याः। अस्माभिस्त्विदानीं द्रष्टव्या भवति। आगच्छन्ति ते ये नोमपरीषु[1] भाविनीषु पश्यन्ति इति कालस्य नित्यत्वं वदति॥

मृतास्ते ये पूर्वतरामुषसं मर्त्या अपश्यन्। अस्माभिरिदानीं प्रतिद्रष्टव्या भवति। आगच्छन्ति ते ये एनामुत्तरासु रात्रिषु पश्यन्ति॥ (११)

**यावयद्द्वेषा ऋतपा ऋतेजाः सुम्नावरी सूनृता ईरयन्ती।**
**सुमङ्गलीर्बिभ्रती देववीतिमिहाद्योषः श्रेष्ठतमा व्युच्छ॥**

यावयत्। पृथक्कृतराक्षसा। न हि प्रकाशे चरन्ति राक्षसाः। सत्यस्य पालयित्री सत्ये जाता सुखसंयुक्ता वाचः प्रेरयन्ती सुमंगलीर्भद्रा बिभ्रती देवकामं इहाद्योषः श्रेष्ठतमा व्युच्छः[2]॥

पृथक्क्रियमाणशत्रुका सत्यस्य पालयित्री सत्ये जाता सुखवती वाचः प्रेरयन्ती शोभनमङ्गला यज्ञं च धारयन्ती श्रेष्ठतमा इहाद्य उषा व्युच्छ॥ (१२)

**शश्वत्पुरोषा व्युवास देव्यथो अद्येदं व्यावो मघोनी।**
**अथो व्युच्छादुत्तराँ अनु द्यूनजरामृता चरति स्वधाभिः॥**

शश्वत् नित्यं पु + + + व्यौच्छद्देवी[3]। अथो अद्योदं[4] व्यावोऽव्यौत्[5]। व्याव इति वहे रूपमिदमिति क्रियामपदिशति[6]। किञ्च

[1] Read एनामपरीषु.

[2] Read व्युच्छ.

[3] Three letters are completely broken off; so is the ए mark and part of व in व्यौ; read पुरा चेयं व्यौच्छत् देवी.

[4] Read अद्येदं.

[5] Reading not certain.

[6] मघोनि not commented upon.

आसामेवमेवोत्तरानपि दिवसाननु व्युच्छतु । व्युच्छन्तीति[1] वा[2] । सैवमजरा चामृता च नित्यं च + + + र्बलैः[3] । अपिवा दीप्तिभिर्युक्तेति ॥

नित्यं पुरा चेयं व्यौच्छत् देवी । अथास्मिन्नहनि धनवती सेयमिदं व्यागात् । अथोत्तराण्यप्यहानि प्रति व्युच्छतु । सेयं जरामरणवर्जिता प्रदित्सितैरन्नैः सह सर्वदा वर्तते ॥ (१३)

**व्य१ञ्जिभिर्दिव आतास्वद्यौदप कृष्णां निर्णिजं देव्यावः ।**
**प्रबोधयन्त्यरुणेभिरश्वैरोषा याति सुयुजा रथेन ॥**

व्यञ्जि + विद्योतते[4] श्रीभिर्दिवो नभस आततासु[5] दिक्षु । सैषापवृणोति कृष्णं रूपं रात्रिकृतं देवी । प्रबोधयन्त्यरुणैस्सुयुक्तेन रथेनायाति ॥

विद्योततेऽन्तरिक्ष + + + न साधनैर्ज्योतिर्भिः दिवः संबन्धिनीषु दिक्षु । अपवृणोति कृष्णं रूपं रात्रिकृतम् । सेयं प्रबोधयन्ती अरुणैरश्वैः सुयुक्तेन रथेनोषा आगच्छति ॥ (१४)

**आवहन्ती पोष्या वार्याणि चित्रं केतुं कृणुते चेकिताना ।**
**ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा व्यश्वैत् ॥**

आवहन्ती[6] पोषणसमर्थानि धनानि चित्तं रश्मिं कुरुते प्रज्ञावती[7] ।

[1] Read व्युच्छतीति.

[2] Folio 79*b* ends here.

[3] Three letters are completely broken off; perhaps to read चरति स्वैर्बलैः

[4] After व्यञ्जि a letter is completely lost; must be भिः

[5] Above र्दिवो नभस आततासु is written व्यञ्जिते विद्योतते श्रीभिः as extra.

[6] Pratika not separately given.

[7] आ mark of ज्ञा and व mostly worm-eaten.

सैषा व्युष्टानावुषसामुपमा[1] समीपभूतान्तिमा । तथा[2] विभातीनां प्रथमोष[3] व्यश्वैत् प्रवृद्धासीत् । यदि वा श्वेताभूतादिति[4] ॥

आवहन्ती पोषणसमर्थानि धनानि चित्रं प्रज्ञानं करोति ज्ञायमाना । गतानां बह्वीनामन्तिमा अतः परं व्युच्छन्तीनां मुख्या उषाः प्राच्यां वृद्धासीत् ॥ (१९)

**उदीर्ध्वं जीवो असुर्न आगादप प्रागात्तम आ ज्योतिरेति ।**
**आरैक्पन्थां यातवे सूर्यायागन्म यत्र प्रतिरन्त आयुः ॥**

उदीर्ध्वम् । उद्गच्छतं शयनात् । जीवः प्रेरयिता अस्मानागात् । अपप्रागनैःशंततः[5] । ततो ज्योतिश्चागच्छति । अपिच इयमुषा अरिचत् पन्थानं सूर्यगमनार्थम् । गच्छामो वयं यत्र वर्धयन्त्यन्नमुदाराः । इति भिक्षणप्रवृत्तमुत्थापयति । अपत्या अस्थुरित्य[6] अगन्म यत्रेनेति[7] न सृज्यते ॥

उद्गच्छत शयनात् । जीवयिता प्राणोऽस्मानागतः । अप प्रागात् च नैशं तमः । ज्योतिश्चागच्छति । सूर्यस्य गमनार्थं उषाः पन्थानमरिचत् । गच्छामो यत्र वर्धयन्ति अन्नमुदाराः ॥ (१६)

**स्यूमना वाच उदियर्ति वह्निः स्तवानो रेभ उषसो विभातीः ।**
**अद्या तदुच्छ गृणते मघोन्यस्मे आयुर्नि दिदीहि प्रजावत् ॥**

[1] Read व्युष्टानामुषसामुपमा.

[2] Before तथा there is प written and deleted with a dot above.

[3] Read प्रथमोषा.

[4] Read श्वेताभूदिति.

[5] Read अपप्रागान्नैशं तम.

[6] Read अपत्या अस्थुः इत्यत्र. This is R. V. 8. 48. 11.

[7] यत्र इति. This is the fourth Pāda of R. V. 8. 48. 11.

सूमनां[1] सिवेः सुमनानि वाचोऽनुस्यूतान्युत्थानि[2] प्रेरयति वह्निः। स्तोत्राणां स्तुत्वं[3] स्तोतोषसो विभातीः। अद्य तत् प्रत्युच्छ गृणते मह्यमुषः। प्रजायुक्तमन्नं मयि धेहीति ॥

अनुस्यूताः स्तुतिवाचः प्रेरयति होता। स्तवानः स्तोता व्युच्छन्तीरुषसः। अद्य तथा सति व्युच्छ स्तुवते मह्यं उषः। अस्मास्वायुर्नितरां दीपय प्रजायुक्तम् ॥ (१७)

**या गोमतीरुषसः सर्ववीरा व्युच्छन्ति दाशुषे मर्त्याय।**
**वायोरिव सूनृतानामुदर्के ता अश्वदा अश्नवत्सोमसुत्वा ॥**

या गोमतीः। या गोमत्य उषसः प्रसूतवीराः[4] व्युच्छन्ति दाशुषे मर्त्याय। यावोर्महावातस्यैव[5] सुन्वन्तीनामते[6] ता अश्वना[7] दात्रीर्व्याप्नोतु यजमानः। इति स्तुतिभिराशास्ते ॥

या गोमत्य उषसः सर्ववीरैर्युक्ता व्युच्छन्ति यजमानाय मनुष्याय। महावातस्येवोप+स्य स्तुतीनामन्ते ता अश्वदा उषसो व्याप्नोति यजमानः ॥ (१८)

**माता देवानामदितेरनीकं यज्ञस्य केतुर्बृहती वि भाहि।**
**प्रशस्तिकृद्ब्रह्मणे नो व्यु१च्छा नो जने जनय विश्ववारे ॥**

[1] Read स्यूमना: Pratika not separately given.
[2] Passage not clear.
[3] Expression not clear.
[4] Read प्रभूतवीरा:
[5] Read वायोर्महावातस्येव.
[6] Expression not clear; it is the explanation of सूनृतानामुदर्के.
[7] Read अश्वानां

माता । माता त्वं देवानाम् । उषसो । हि सर्वे देवाउत्तिष्ठन्ति । ततश्च त्वमदितेः[1] प्रत्यनीकम् । यज्ञस्य प्रज्ञापयित्री बृहती विभाहि । प्रशासनकृत् स्तोत्राय अस्मदीयाय व्युच्छ । जनय चास्मान् भिक्षमाणा[2] । जनपदे विवैरणीरे[3] विश्रुतान् कुरु ॥

निर्मात्री देवानां अतश्च देवमातुरदितेः प्रत्यनीकमियं भवति । सा त्वं यज्ञस्य प्रज्ञापयित्री महती व्युच्छ । स्तुतेः कत्री । उषसि हि वन्दिनः स्तुवन्ति देवान् मनुष्यांश्च । सा त्वं अस्माकमपि स्तोतुं व्युच्छ । व्युष्टा चास्मान् जने प्रादुर्भावय सर्वैवरणीये ॥ (१९)

**यच्चित्रमप्न उषसो वहन्तीजानाय शशमानाय भद्रम् ।**
**तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥**

यच्चित्रम् । यच्चित्रमप्न आप्यं धनमुषसो वहन्ती ईजानाय तत् भद्रं भवति[4] ॥

यत् पूज्यं कम उषसो वहन्ती ईजानाय भजते भजनीयं तत् त्वमस्मभ्य-मप्यावह ॥ (२०)

---

[1] दि and ए mark of ते mostly worm-eaten.

[2] There is no corresponding word in text.

[3] Read सर्वैवरणीये.

[4] शशमानाय not commented upon. Perhaps भिक्षमाणा in previous verse should come here as भिक्षमाणाय. Here there is the figure 1 to mark the end of the Sūkta.

**इमा रुद्राय॑ त॒वसे॑ कप॒र्दिने॑ क्ष॒यद्वी॑राय॒ प्र भ॑रामहे म॒तीः ।**
**यथा॑ शमस॑द्द्वि॒पदे॒ चतु॑ष्पदे॒ विश्वं॑ पु॒ष्टं ग्रामे॑ अ॒स्मिन्न॑नातु॒रम् ॥**

इमा[1] रुद्राय वृद्धाय जटिलाय क्षपितवीराय । यद्वा मरुद्भिर्युक्तः । क्षयद्वीराय तस्मै प्रभरामहे स्तुतीः । यथा शमनं रोगाणां स्यात् द्विपदे चतुष्पदे । विश्वं च पृष्टं[2] ग्रामे अस्मिन् विद्यमानमनातुरं स्यादिति ॥

इमाः स्तुतीर्वयं रुद्राय वृद्धाय जटिने क्षपितवीराय कर्तुं हवामहे । यथा सुखं भवति द्विपदे चतुष्पदे च विश्वं च पुष्टमस्मिन् ग्रामे अरोगम् ॥ (१)

**मृ॒ळा नो॑ रुद्रो॒त नो॒ मय॑स्कृधि क्ष॒यद्वी॑राय॒ नम॑सा विधेम ते ।**
**यच्छं च॒ योश्च॒ मनु॑राये॒जे पि॒ता तद॑श्याम॒ तव॑ रुद्र॒ प्रणी॑तिषु ॥**

मृळा नः । मृळ मह्यं रुद्र । अपिचास्माकं सुखं कुरु । क्षयद्वीरश्चान्नमसा[3] पकिचरामः[4] । यत् स्वाह्यः[5] प्रजाभ्यः शं च योश्च मनुरायाचितवान् देवेभ्यः तद्वयमप्यश्याम तव रुद्र प्रणयनेषु ॥

सुखयास्मान् रुद्र । अपि चास्माकं सुखं कुरु । क्षपितवीराय वयं तुभ्यमन्नेन परिचरामः । यत् सर्वेषां पिता शं च योश्च मनुर्देवेभ्यो याचितवान् तद्वयं लभेमहि तव रुद्र प्रणयनेषु ॥ (२)

[1] Pratika not separately given.

[2] Read पुष्टं.

[3] Folio 80*a* ends with क्षयद्वीरश्चान्न perhaps to read क्षयद्वीरं त्वां नमसा.

[4] Read परिचरामः

[5] Read स्वाभ्यः

अश्याम॑ ते सुम॒तिं दे॑वय॒ज्यया॑ क्ष॒यद्वी॑रस्य॒ तव॑ रुद्र मीढ्वः ।
सु॒म्ना॒यन्निद्विशो॑ अ॒स्माक॒मा च॒रारि॑ष्टवीरा जुहवाम ते ह॒विः ॥

अश्याम । प्राप्नुयाम + + + मतिं[1] देवगेन[2] । तदेवोक्तम्—क्षयद्वीरस्य तव रुद्र सेक्तः । सुखमिच्छन्नेव विशं चस्माकमाचर[3] प्राप्नुहि । अहिंसितवीरा वयं तुभ्यं जुहवाम हविः ॥

प्राप्नुयाम तव सुमतिं यागेन क्षपितवीरस्य तव रुद्र सेक्तः । सुखमिच्छन्नस्माकं पुत्रपौत्रादीनाभर । अनुपहिंसितवीराः सन्तो वयं तुभ्यं हविर्जुहवाम ॥ (३)

त्वे॒षं व॒यं रु॒द्रं य॑ज्ञ॒साधं॑ व॒ङ्कुं क॒विमव॑से॒ नि ह्व॑यामहे ।
आ॒रे अ॒स्मद्दैव्यं॒ हेळो॑ अस्यतु सु॒म॒तिमि॒द्वय॑म॒स्या वृ॑णीमहे ॥

त्वेषम् । दीप्तं वयं रुद्रं यज्ञस्य साधकम् । एष हि स्विष्टं करोति वज्रं लब्धभागः । वंकुं कुटिलगमनं कविमवसेऽहिमुपमांवसाम[4] । सोऽस्मत्तो देवं[5] क्रोधं दूरे प्रेरयतु । सुमतिमेवास्य वयं प्राप्नुयाम इति ॥

दीप्तं यज्ञस्य साधयितारं कुटिलगमनं कविमवसे अभिमुखमाह्वयामः । स दैव्यं क्रोधमस्मत्तो दूरे क्षिपतु । सुमतिमेव वयमस्य प्रार्थयामहे ॥ (४)

दि॒वो व॑रा॒हम॑रु॒षं क॑प॒र्दिनं॑ त्वे॒षं रू॒पं नम॑सा॒ नि ह्व॑यामहे ।
हस्ते॒ बिभ्र॑द्भेष॒जा वार्या॑णि॒ शर्म॒ वर्म॑ च्छ॒र्दिर॒स्मभ्यं॑ यंसत् ॥

[1] Three letters are completely broken off. The first two appear to be त and च. The last cannot be deciphered. Read तव सुमतिं.

[2] Read देवयागेन.

[3] Read चास्माकमाचर.

[4] Read भिमुखमाह्वयाम.

[5] Read दैव्यं.

दिवः । दिवो नभसो ह्वयामहे वराहं सूकरसदृशं बलेन । आरोचमानं कपर्दिनं दीप्तं श्लाघमानं नमस्कारेण । सोऽयं हस्ते धारयन् सर्वाणि भेषजानि वरणीयानि शर्मादीनि अस्मभ्यं प्रयच्छतु सुखं कवचं गृहं च ॥

दिवो वराहमारोचमानं जटिलं दीप्तं श्लाघमानं नमसाभिमुखमाह्वयामः । स देवो हस्ते दधानो वरणीयानि भेषजानि सुखं रक्षां गृहं चास्मभ्यं प्रयच्छतु ॥ (५)

**इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम् ।**
**रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ ॥**

इदम् । इदं पित्रे मरुतामुच्यते वचः । स्वादोः स्वादुतरं रुद्राय वर्धनम् । देहि चास्मभ्यममृत[1] मर्तान्नम् । आत्मने मह्यं पुत्राय च पौत्राय च मृळ । अत्र कौषीकम्[2]—इदं पित्रे मरुतामुच्यते वच इत्येतत् । पूगो वै रुद्रस्तदेनं स्वेन पूगेन समर्धयति इति[3] ॥

मरुतां पित्रे देवाय इदमत्यन्तं स्वादुभूतं वर्धनं वच उच्यते । देहि चास्मभ्यं देव मर्तानां भोजनमन्नम् । आत्मने पुत्राय च प्रसीद ॥ (६)

**मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।**
**मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥**

मा नः । मास्माकं धम[4] च बालं मास्माकमुक्षन्तं युवानजा[5]

[1] भ्य is completely worm-eaten. The next may be a part of म. Reading only a guess.

[2] Read कौषीतकम्.

[3] Not traced.

[4] Read वृद्धं मा.

[5] Read only युवानं.

चोक्षिमं[1] गर्भस्थं वधीः । मा चास्माकं पितरं मा च मातरम् । अपि-
चास्माकं प्रियः[2] प्रजा मा हिंसीः ॥

मास्माकं वृद्धं मा च बालं मा च रेतः सिञ्चन्तं युवानं मा च निषिक्तं मा च नो वधीः पितरं मा च मातरं मा चास्माकं प्रियाण्यङ्गानि हिंसीः ॥ (७)

**मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः ।**
**वीरान् मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥**

स्पष्टोतरा । अन्तोदात्त आयुशब्दो मनुष्यवचनः । क्रुद्धो भामित इति ॥

मास्माकं पुत्रे तत्पुत्रे च माचान्यस्मिन् मदीये पुरुषे मा नो गोषु मा चास्माकमश्वेषु हिंसीः । मा चास्माकं समर्थान् क्रुद्धो वधीः । हविष्मन्तः सदैव त्वां वयं हवामहे ॥ (८)

**उप ते स्तोमान् पशुपा इवाकरं रास्वा पितर्मरुतां सुम्नमस्मे ।**
**भद्रा हि ते सुमतिर्मृळयत्तमाथा वयमव इत्ते वृणीमहे ॥**

उप । यथा गोपः प्रास्तस्समर्पतान्[3] पशून् सायमुपकरोति एवमहं तुभ्यं स्तोमानुपाकरम् । देहि मरुतां पितस्सुखं मह्यम् । कल्याणी भि[4] ते महिस्सुखयितृतमा[5] । अथ वयं तव रक्षणं वृणीमहे ॥

[1] Read चोक्षितं.

[2] Read प्रियाः

[3] Read प्रातस्समर्पितान्.

[4] Read हि.

[5] Read मतिस्सुखयितृतमा.

यथा गोपः प्रातः समर्पितान् पशून् सायमुपकरोति एवं अहं तुभ्यं स्तोमानुपाकरम् । देहि मरुतां पितः सुखमस्मभ्यम् । भजनीया हि ते सुमतिः सुखयितृतमा । वयं तव रक्षणमेव वृणीमहे ॥ (९)

**आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु ।**
**मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः ॥**

आरे । दूरे तव गोहननमपि च पुरुषहननम्[1] । क्षयद्वीर सुखमस्मासु तवास्तु । प्रसन्नो भवास्मभ्यम् । अधिब्रूहि चास्मभ्यं देव । अथ चास्मभ्यं शर्म यच्छ द्विबर्हाः । द्वयोः स्थानयोः परिवृद्धो[2] मध्ये च प्रथमे च ॥

दूरे तव गोहननं अपि च पुरुषहननम् । क्षयद्वीर सुखमस्मासु तवास्तु । सुखय चास्मान् । अधि चास्मभ्यं ब्रूहि देव । अथ च सुखं प्रयच्छास्मभ्यं द्वयोः स्थानयोः परिवृढः ॥ (१०)

**अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान् ।**
**तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥**

स्पष्टोत्तरा । नमो नमस्कार इति[3] ॥

उक्तवन्तो वयं नमस्कारमस्मै रक्षणेच्छवः । सोऽयमाह्वानं शृणोतु रुद्रो मरुद्भिः सहितः ॥ (११)

---

[1] There is an ए mark before ननम् which is scored.

[2] After परि the two letters are broken; only top is retained. Reading only a guess. The second letter has ढ rather than ढ.

[3] Here there is the figure 2 to mark the end of the sūkta.

**चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।**
**आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥**

चित्रम् । चित्रं चायनीयां[1] देवानामुदकागादनीयकं[2] संघाः । आदित्ये भि[3] सर्वे देवा वसन्ति । तदिदं मित्रस्य वरुणस्याग्नेश्चक्षुः[4] प्रकाशकम् । अपिवाप्यायकं तेजसः । चक्षुर्भूतमेव वा । आपूपुरत्[5] द्यावापृथिव्यावन्तरिक्षं च महत्वेन । सोऽयं सूर्य आत्मा जंगमस्य च स्थावरस्य च ॥

चायनीयं देवानां उदगादनीकं सङ्घम् । आदित्ये हि सर्वे देवा वसन्ति । तदिदं मित्रस्य वरुणस्य अग्नेः प्रकाशकम् । अपि वा चक्षुर्भूतम् । आपूरयत् द्यावापृथिव्यौ चान्तरिक्षं च महत्वेन सूर्य आत्मा जङ्गमस्य स्थावरस्य च जीवभूतः ॥ (१)

**सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात् ।**
**यत्रा नरो देवयन्तो युगानि वितन्वते प्रति भद्राय भद्रम् ॥**

सूर्यो । सूर्यो देवीमुषसं दीप्यमानां मनुष्य इव युवतिं स्त्रियं पश्चादभिगच्छति । यस्यामुषसि प्रवृत्तायां नरो देवकामा युगानि वितन्वत इति कर्माण्यभिप्रेत्य वदति । यद्वा देवकामाः धनकामाः कर्षणाय युगानि वितन्वते । तं त्वा वयं सूर्ये[6] प्रतिपश्येम भद्राय भद्रम् ॥

[1] Read चायनीयं.

[2] Read देवानामुदगादनीकं.

[3] Read हि.

[4] Folio 80*b* ends with वरुण. The line closes nearly two inches from the margin as the leaf is narrow.

[5] Is it to read आपूरयत्.

[6] Read सूर्य.

सूर्यो देवीमुषसं दीप्यमानां मनुष्य इव स्त्रियं पश्चादभिगच्छति । यस्यामुषसि मनुष्या देवान् कामयमाना अग्निहोत्रादीनि कर्माणि प्रतिवितन्वते । भद्रं च भद्राय कुर्वन्ति । यद्वा कर्षणार्थं युगानि युञ्जन्ति ॥ (२)

**भ॒द्रा अश्वा॑ ह॒रित॒: सूर्य॑स्य चि॒त्रा एत॑ग्वा अनु॒माद्या॑सः ।**
**न॒म॒स्यन्तो॑ दि॒व आ पृ॒ष्ठम॑स्थु॒: परि॒ द्यावा॑पृथि॒वी य॑न्ति स॒द्यः ॥**

भद्रा । भद्रा अश्वा भर्तारः सूर्यस्य चित्रा एतया[1] एतवर्णाः । ग्वो मत्वर्थीयः । यद्वा गन्तव्यं यन्तीति स्तोतव्याः । अनुमाद्याः । त इमे नमस्यन्तो दिवः पृष्ठमातिष्ठन्ति । परिगच्छन्ति च द्यावापृथिव्यावेकेनाह्ना ॥

भजनीया अश्वा हरिन्नामधेयाः सूर्यस्य चित्रवर्णाः । एतग्वा इति चाश्वनाम । स्तुत्या अनुमोदनीयाः । प्रह्वीभवन्तो दिवः पृष्ठस्थानीयमादित्यमातस्थुः । ततो द्यावापृथिव्यौ परिगच्छति सद्य एव ॥ (३)

**तत्सूर्य॑स्य दे॒व॒त्वं तन्म॑हि॒त्वं म॒ध्या कर्तो॒र्वित॑तं॒ सं ज॑भार ।**
**य॒देदयु॑क्त ह॒रित॑: स॒धस्था॒दाद्रात्री॒ वास॑स्तनुते सि॒मस्मै॑ ॥**

तत्सूर्यस्य देवत्वमैश्वर्यम् । तन्महत्वम् । यन्मध्ये कर्मणो विततं तत् कर्म संहरति कर्मकरः तमस्तं यन्तं दृष्ट्वा । यदैवायमयुक्त अश्वान् सधस्थात् स्वस्माद्रथात् विमुच्य स्थादपानयोर्योजनानन्तरमेव[2] रात्री वासो निवासं तनुते सर्वस्मै । यद्वा तमो वास आच्छादकत्वात् । यास्कस्त्वाह—वासो वासरमहरिति[3] । रथे युक्ताननश्वान्[4] यदा ततो गमनार्थमुद्योजयति तदा रात्री करोति वासरमिति[5] ॥

[1] Read एतग्वा.

[2] The Perhaps to read only स्थादपानयोरनन्तरमेव.

[3] Not found in N. 4. 11.

[4] Read युक्तानश्वान्.

[5] This too is not in N. 4..11.

तत् सूर्यस्यैश्वर्यं तन्महत्वं यन्मध्ये कर्मणो विततं तत् कर्म अस्तं यन्तं सूर्यं दृष्ट्वा कर्मकरः संहरति । यदैवायमश्वान् प्रातर्गमनाय रथे नियोजयति तत्र नियुक्त्यनन्तरमेव रात्रिः सर्वस्मै वासं तनुते अहरुद्गमयति । यद्वा रथात् यदाश्वान् विमोचययति अनन्तरमेव रात्रिः वाससदृशमन्धकारं करोति ॥　(४)

**तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे ।**
**अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति ॥**

तत् । तन्मित्रस्य वरुणस्याभिदर्शनार्थं सूर्यो रूपं कृणुते द्योर्नभस उपस्थे । रूपं तेजो रोचन्ते[1] । अपर्यन्तमन्यच्छ्वेतमस्य तेजः । कृष्णमन्यच्च हरितः संभरन्ति । तत्र अग्निः श्वेतं निशायां कृष्णमिति । हरितो रश्मयोऽश्वा एव वा तदनुगुणं नयन्तः ॥

तन्मित्रावरुणयोः अहोरात्रयोः दर्शनाय सूर्यो रूपं करोति दिव उपस्थेऽन्तरिक्षे । तस्य पर्यन्तमन्यतरस्थितं श्वेतं तेजो रश्मयः संभरन्ति । कृष्णं चान्यदन्धकारम् । इति अह्नि श्वेतं तेजः संभरन्ति रात्रावन्धकारम् । द्वे द्रधसी सतती वस्त एकः केशी विश्वा भुवनानि विद्वान् (तै. सं. ३. २. २. २) इति अध्वर्यूणां मन्त्रः ॥　(५)

**अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात् ।**
**तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥**

अद्य[1] इयं च सौर्यैव । उदित आदित्ये यूयं चास्मान् देवा आवर्तेरवद्यानिष्पारयतेति[2] ॥

[1] Read रोचते:

[2] Here there is the figure 3 to mark the end of the sūkta. Read अवर्तेरवद्यान्निष्पारयतेति.

अद्य देवाः सूर्यस्योदये सति अस्मान् दारिद्र्यात् पापाच्च निष्पारयत। तन्नः ॥ (६)

---

**नासत्याभ्यां बर्हिरिव प्र वृञ्जे स्तोमाँ इयर्म्यभ्रियेव वातः।**
**याव‍र्भगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन ॥**

नासत्याभ्याम्। उशिजः क्षेत्रजो दैवतमसः[1] कक्षीवानृषिः। यथा कश्चिद्यज्ञार्थं बर्हिः प्रवृङ्क्ते एवमहं स्तोमान् अन्यूनातिरिक्तान्[2] ब्रवीमि। तदेवाह—स्तोमानि प्रेरयामि अभ्रसमूहानिव वातः। यद्वा अभ्रियाणि जलानि। याव‍र्भगाय बालाय। गकारश्छान्दसः। न ह्यवगृह्णन्ति। यद्वा अर्भगोऽर्भक इत्यल्पवचनेषु बालेषु प्रयुक्तौ[3]। कैगेशब्देन[4] क्रिय- + त ऋतं[5] शाकल्यस्य। तदर्थं तस्य जायां मध्येमार्गं सपत्नैरभिभूतां तस्य सेनाया अनुकर्षणेन[6] रथेन तान् छत्रून् निहत्य तस्य गृहं प्रत्यूहतुः ॥

कक्षीवान् दैर्घतमस उशिक्प्रसूतः। यथा कश्चिद्यज्ञार्थं बर्हिः प्रवृङ्क्ते एवमहं स्तोमान् अन्यूनानतिरिक्तं सुष्ठु करोमि। स्तोमान् प्रेरयामि अभ्रसमूहानिव वातः। यौ बालाय विमदाय ऊढभार्याय स्वगृहं प्रति गच्छते शत्रुभिरभिभूताय तां भार्यां सेनां प्रति गच्छता रथेन तद्गृहं प्रति न्यूहतुः। याभिः पत्नीर्विमदाय (ऋ. वे. १. ११२-१९) इति कुत्सः ॥ (१)

[1] Read दैर्घतमसः

[2] Read अन्यूनानतिरिक्तान्.

[3] अर्भग does not occur in Ngh. or N

[4] Folio 81*a* ends here.

[5] One letter is completely broken off; then त and ऋ are clear. त in तं is gone; but can be made out. Reading not certain.

[6] ए mark of णे added below line before ण.

**वीळुपत्मभिराशुहेमभिर्वा देवानां वा जूतिभिः शाशदाना ।**
**तद्रासभो नासत्या सहस्रमाजा यमस्य प्रधने जिगाय ॥**

विळु । वीळुपत्मभिः व्रतेपादैः[1] । आशुगमने[2] । वाशब्दः समुच्चये । तादृशैरश्वैर्देवानां[3] च प्रेरणैः शाशदानयोर्युवयोर्यो रथे युक्तो रासभः स तत्प्रजापतिना दत्तस्तत्सहस्रमाजौ यमस्य प्रणने[4] जिगाय । यमस्य भि[5] वैवस्वतस्य प्रीणनमार्षिः[6] । यद्विवा[7] प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छदित्यादि ब्राह्मणं[8] अनुसन्धेयमिति ॥

दृढपतनैराशुगमनैश्च देवानां च प्रोत्साहनैर्गच्छतोस्तत् प्रजापतिना दत्तं सहस्रमाश्विनं नाम भवतोरश्वो रासभो नासत्यौ बलस्य प्रख्यापने युद्धे जिगाय ॥ (२)

**तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः ।**
**तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोदकाभिः ॥**

तुग्रः । तुग्रो नाम कश्चिदश्विनोः प्रियः । तस्य पुत्रो भुज्युः

[1] After व्र there is an ए mark; the consonant is not at all legible. It must be दृढपादैः or some such thing.

[2] Read आशुगमनैः

[3] The letters दृशै mostly broken off.

[4] Read प्रधने.

[5] Read हि.

[6] Passage not clear.

[7] यद्वि is followed by space left blank. वा is added by me as a guess.

[8] A. B. 4. 7.

शत्रूणां ज + + + + + त्रा[1] समुद्रे प्रहितः । तस्य नौस्समुद्रमध्येऽतिदूरं गतस्य दैवात् भिन्नासीत् । स च पितृप्रत्ययेन शीघ्रमश्विनौ तुष्टाम[2] । तमश्विनौ सेनया सहितमात्मीयासु नौष्वारोप्य त्रिभिरहोरात्रैस्समानीय तुग्राय ददतुरिति तृचेनोच्यते । तुग्रः खलु पुज्युं[3] पुत्रमश्विनौ उदमेहे[4] समुद्रे धनमिव कश्चिन्म्रियमाणः शत्रुभिः पीडितः तज्जयार्थं प्रहितवान् । तं युवामूहथुर्नौभिरात्मन्वतीभिर्युवयोः स्वभूताभिः । अपिवा दृढाभिः । अन्तरिक्षेण गच्छन्तीभिः सुश्लिष्टत्वादप्रविष्टोदकाभिः ॥

तुग्रो ह भुज्युं पुत्रमश्विनौ समुद्रे धनमिव कश्चित् म्रियमाणः समुद्रमध्यस्थानां शत्रूणां यो धनार्थम् । अपिवा अन्येन कारणेन प्रहितवान् । समुद्रमध्ये तस्य नौः सन्ना अभवत् । अथाश्विनौ युवां तं समुद्रस्य पारे ऊहथुः नौभिर्युष्मदीयाभिः अन्तरिक्षेण गच्छन्तीभिः सुश्लिष्टत्वादप्रविष्टोदकाभिः ॥ (३)

**तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भुज्युमूहथुः पतङ्गैः ।**
**समुद्रस्य धन्वन्नार्द्रस्य पारे त्रिभी रथैः शतपद्भिः षळश्वैः ॥**

तिस्रो[5] रात्रीस्त्रीणि वाहान्यतिपूजद्भिर्नासत्यौ[6] भुज्युमूहथुः पतङ्गैः पतद्भिः । समुद्रस्य धन्वनि मध्यस्थे स्थले तथा आर्द्रसादकस्य[7] देशस्य पारे

[1] After ज space for four or five letters left blank and त्रा follows. Perhaps to read जयाय स्वपित्रा.

[2] Read तुष्टाव.

[3] Read भुज्युं.

[4] Read उदमेघे.

[5] Pratika not separately given.

[6] Read वाहान्यतिव्रजद्भिर्नासत्यौ.

[7] Perhaps to read आर्द्रस्य सोदकस्य.

त्रिभी रथैहहुपादैः[1] षडश्वैः । ससैनिकस्य नयनाय त्रयो रथाः । शकटीवचनं पच्छब्द[2] इत्याहुरिति ॥

भुज्युः त्रिभिरहोरात्रैः समुद्रमध्यात् स्वगृहं नीतः । तिस्रो रात्रीः त्रीणि चाहानि भवद्भ्यां सहातिगच्छद्भिर्नासत्यौ भुज्युमूहथुः । समुद्रमध्यादश्वैः समुद्रस्य मध्यस्थे स्थले तथा समुद्रस्य पारे तुग्रस्य गृहं त्रिभिश्च रथैः शतगमनसाधनैः षडश्वैः । स्थले आनयनाय पतङ्गा रथाश्च ॥ (४)

**अनारम्भणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे ।**
**यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसम् ॥**

अनारम् । आरंभणवर्जिते तद्वीरकर्म कृतवन्तौ । तथा अवस्थानवर्जिते ग्रहणवर्जिते च समुद्रे । शाखादिकं ग्रहणम् । मदश्विनावूहथुः[3] भुज्युं गृहं पति[4] बह्वरित्रां नावमातस्थिवांसम् ॥

दण्डकाष्ठाद्यारम्भणवर्जिते वृक्षशाखादिग्रहणवर्जिते आस्थानवर्जिते समुद्रे तद्युवां वीरकर्म कृतवन्तौ स्थः । यद्युवां अश्विनौ भुज्युं स्वगृहं न्यूहथुः शतदर्वीकां नावमातस्थिवांसम् । भुज्युं याभिरव्यथिभिः (ऋ. वे. १. ११२. ६) इति कुत्सः ॥ (५)

**यमश्विना ददथुः श्वेतमश्वमघाश्वाय शश्वदित्स्वस्ति ।**
**तद्वां दात्रं महि कीर्तेन्यं भूत् पैद्वो वाजी सदमिद्धव्यो अर्यः ॥**

[1] Read रथैर्बहुपादैः

[2] Not clear. Perhaps to read रथशब्द.

[3] Read यदश्विनावूहथुः

[4] Read प्रति.

यममश्विना[1] । अघाश्वो नाम कश्चित् । अश्विनौ तस्मै कञ्चन श्वेतमश्वं ददतुः । तदाह—यमिति । यमश्विनौ ददथुः श्वेतमश्वम् । सोऽश्वोऽघाश्वाय शश्वदित्[2] स्वस्ति चकार । तच्च युवयोः दानं महत् कीर्तनायमभृत्[3] । पतनशीलो ह्यश्वः सदैव कर्मसु बह्वातव्यः[4] प्रोको[5] धनानामिति ॥

अघाश्वो नाम कश्चित् । तस्मै शत्रुजयार्थमश्विनौ कंचन श्वेतमश्वं ददतुः । सोऽश्वस्तस्मै सर्वदा स्वस्ति करोति । तद्युवयोर्दानं महत् सर्वदा कीर्तनीयं भवति । अश्वो बलवान् सदैव युद्धेष्वाह्वातव्यो भवति ॥ (६)

**युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतं पुरंन्धिम् ।**
**कारोतराच्छफादश्वस्य वृष्णः शतं कुम्भाँ असिञ्चतं सुरायाः ॥**

युवम् । युवां नरा स्तुवतो[6] वज्रायाः[7] कुले जाताय कक्षीवते अरदतं पुरन्धिम् । तमसा रोहितां[8] बुद्धिं व्यलिखितम्[9] । यद्वा ददथुः प्रज्ञाम् । कारोतरो नाम बैदलश्चर्मनधों[10] भाजनविशेषः यत्र सुरायाः

[1] Read यमश्विना.

[2] Folio 81*a* ends with शश्वदि.

[3] Read कीर्तनीयमभूत्.

[4] Read आह्वातव्यः

[5] Not clear. Perhaps to read प्रेरको.

[6] Read स्तुवते.

[7] Read पज्रायाः

[8] Perhaps to read तिरोहितां.

[9] Perhaps to read व्यलिखतम्.

[10] Read बैदलश्चर्मनद्धो.

स्रावणं भवति । इह त्वौपमिकम् । सदृशाद्युवयो[1] वृष्णोऽश्वस्य शशफात्[2] सुरारायाश्वतम्[3] । सिञ्चतिः पूरणार्थः[4] ॥

युवं नरा स्तुवते पज्रकुलाय कक्षीवते मह्यं प्रच्छन्नां बुद्धिं शस्त्रेणेव अरदतम् । कक्षीवन्तं स्तोतारमिति कुत्सः (ऋ. वे. १. ११२. ११) कूपसदृशाद्वर्षितुः अश्वस्य शफात् सुरायाः शतं कुम्भान् क्रमेणापूरितवन्तौ कस्मैचन याचमानाय ॥ (७)

**हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तम् ।**
**ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति ॥**

हितेना[5] । हनिसमुराः[6] शतद्वारे यज्ञगृहे ऋबीसे न्यदधुः । तत्रैतदुक्तम्—हिमेन शीतेन तुषाग्निं घ्रंसं दीप्यमानं अवायेथराम्[7] । अन्नवन्तं रसं च तत्राश्विनावत्रये अधत्तम् । अपिच कालेन बिसे[8] अत्रिमश्विनौ असुरैरश्नीतं[9] तत उन्निन्यथुः सर्वगणमविकलेन्द्रियम् । अपिवा पुत्रपौत्रैः सहावनीतम् । तैः सह स्वस्तीति ॥

हिमवर्षेणाग्निं क्षरद्दीप्तिमवारयेथाम् । अन्नवन्तं रसं च तत्रास्मै अत्रये अधत्तम् । अपगतभास्के अग्नौ असुरैः प्रक्षिप्तमत्रिमश्विनावुन्निन्यथुः अविकलसर्वेन्द्रियगणं अविनाशेन । यद्वा अत्रिः पुत्रपौत्रैस्सह प्रक्षिप्तः ॥ (८)

[1] Read तत्सदृशाद्युवयोः
[2] Read शफात्.
[3] सुरायाश्शतं.
[4] The words कुम्भान् असिञ्चतम् not taken up.
[5] Read हिमेना.
[6] Read अत्रिमसुराः
[7] Read अवारयेथाम्.
[8] Read ऋबीसे.
[9] Read असुरैरवनीतं.

**परा॒वतं॑ नासत्यानुदेथामु॒च्चाबु॑ध्नं चक्रथुर्जि॒ह्मबा॑रम् ।**
**क्षर॒न्नापो॒ न पा॒यना॑य रा॒ये स॒हस्रा॑य तृष्य॑ते॒ गोत॑मस्य ॥**

परावतम् । पाराणदेथां[1] नासत्यौ । कूपं तं[2] च सोमसमीप आनीतमुपरिमूलं निचीनद्वारं चक्रथुः । तस्मात्कूपादक्षरन् आपश्च पाधनाय[3] पानार्थम् । रायो[4] दाशुषे । सहस्राय सहनशीलाय । तृष्यते गोतमाय । बह्वीह[5] कृतं न्याय्यम् । बहुश्रुतेभ्योऽस्तु निर्णय इति । यदिवा सहस्राय धनाय च क्षुरन्निति[6] ॥

पराणुदेथां कूपमश्विनौ । तमुच्चैःस्थितमूलं नीचीनद्वारं च चक्रथुः । तस्मात् कूपात् उदकानीव पिपासोर्गोतमस्य पानार्थं धनानि चाक्षरत् सहस्राय धनाय तृष्यते गोतमाय । ऊर्ध्वं नुनुद्रे अवतं त ओजसा (ऋ. वे. १. ८५. १०.) इति गोतमः ॥ (९)

**जु॒जु॒रुषो॑ नासत्यो॒त व॒व्रिं प्रामु॑ञ्चतं द्रा॒पिमि॑व॒ च्यव॑नात् ।**
**प्राति॑रतं जहि॒तस्यायु॑र्दस्रा॒दित् पति॑मकृणुतं क॒नीना॑म् ॥**

जुजूरुषः । जीर्णा[7] नासत्यौ अपि च वव्रिं जरां प्रामुञ्चतं कवचमिव[8] च्यवनात् । प्रावर्धयतञ्च[9] तस्य जहितस्यायुर्दस्रौ । जहितो

[1] Read पराणुदेथां.

[2] Perhaps तं is not wanted.

[3] Read पायनाय.

[4] Read राये.

[5] Read बह्विह.

[6] Read क्षरन्निति.

[7] Read जीर्णात्.

[8] Read कवचमिव.

[9] Read प्रावधयतं च. The letter ञ्च is worm-eaten; but it is ञ्च and not श्च.

जहातेर्वृद्धः । यद्वा पुत्रैर्वास्तुरि[1] परित्यक्तश्च्यवनो भार्गवो वास्तुहं नाम ब्राह्मणं विदाञ्चकार । स पुनर्युवा स्यामिति कामयमानः पुत्रैरनुशिष्टैररण्ये जिहितः । तत्राश्विनौ पुनर्युवानं चक्रतुः । अपिच तमायुषो वर्धनानन्तरं कन्यकानां पतिमकृणुतम् । युवा न[2] कन्यकानां पतिर्भवति जातबाल इति ॥

जीर्णात् च्यवानात् नासत्यावपि च जराम् । प्र वव्रेर्वव्रिश्चिकेत (ऋ. वे. ९. १९. १) इति मन्त्रः । तस्मात् जरां निद्रामिवानायासेन प्रामुञ्चतम् । द्रापे अन्धसस्पते (वा. सं. १६. १४) इत्यत्र वाजसनेयकम् । निष्पापयतीति द्रापिरिति प्रतिपादितम् । कवचमिव इत्यन्ये वदन्ति । तथा पुत्रैः सरस्वत्यास्तीरे त्यक्तस्यायुश्चावर्धयतम् । अनन्तरं चैनं युवतीनां पतिमकृणुतं युवानम् । अत्र शाट्यायनकम्—च्यवनो वै भार्गवो वास्तुहस्य ब्राह्मणमवेत् । स पुत्रानब्रवीत् । वास्तुहस्य वै ब्राह्मणं वेद । तं मा वास्तौ निधाय त्रिः पुनः प्रयाणं प्रयात इति । तेऽब्रुवन् । आक्रोशनवन्तो भविष्यामः पितरमहासिषुरिति । नेति होवाच । तेन वै यूयं वसीयांसो भविष्यथ । तेनो एव मम पुनर्युवताया आशा । हित्वैव मा प्रयातेति तानाज्ञापयत् । तं सरस्वत्यै शैशवे निधाय त्रिः पुनः प्रयाणं प्रायन् । सोऽकामयत । वास्तुहीनः पुनर्युवा स्याम् । कुमारीं जायां विन्देय । सहस्रेण यजेयै इति । स एतत् सामापश्यत् । तेनास्तुत । तुष्टुवांसं शर्यातो मानवो ग्रामेणाध्यवास्यत् । तं कुमारा गोपाला अविपाला मृदा शकृत्पिण्डैरासवाणुभिरदिहन् । सोऽसंज्ञां शर्यातेभ्योऽकरोत् । तं न माता पुत्रमजानात् । न पुत्रो मातरम् । इत्युक्त्वा तत्परिहारार्थं शर्यातकन्यायां सुकन्यायां याचितायां राजा न इति होवाच । अन्यत् धनं वृणीष्व इति । ऋषिश्च न इति होवाच । अथ कन्यां तस्मै ददौ । सा ह तदेव निर्विद्योपविवेश । इत्युक्त्वाह । अश्विनौ दर्विहोमिनौ भिषज्यन्ताविदं चेरतुः अपीतसोमौ । तौ ह एनामेत्य ऊचतुः । कुमारि स्थविरो वायमसर्वो नालं पतित्वाय । आवयोर्जाया एधि इति । न इति होवाच । यस्मै एव मां पितादात् तस्य जाया भविष्यामि । इत्युक्तम् । अथ तयोर्गतयोः

[1] Word not clear.

[2] This न not wanted. Perhaps to read तु.

सुकन्यामृषिः कुमारि को न्वेषः घोषोऽभूदिति पप्रच्छ । सा तु तस्मै यथावृत्तं उवाच । तौ त्वेतदेवागत्य श्वो वक्तारौ । त्वां ब्रूतात् । युवां वा असर्वौ स्थो यौ देवौ सन्तावसोमपौ स्थः । सर्वो वै मम पतिः यः सोमपः इति । तौ वै त्वा वक्तारौ । कस्तस्येशे यत् आवामपि सोमपौ स्याव इति । अयं मे पतिः इति ब्रूतात् । तेनो एव मम पुनः युवताया आशा इति । तथा तया कथितावूचतुः । ऋषे अपि सोमपौ नौ भगवः कुरु इति । तथा इति होवाच । तं हैनं मां पुनर्युवानं कुरुतं इति । तं ह सरस्वत्याः शैवलमभ्याचक्रुषतुः । स होवाच । कुमारि सर्वे वै सदृशा उदेष्यामोऽनेन मा लक्ष्मकेन जानीतात् इति । ते ह सर्वे एव सदृशा उदेयुः । यत् कल्याणतमं रूपाणां न रूपेण । तं हेयं ज्ञात्वा वाहावभिपेदे । अयं मम पतिरित्यविकृतं ब्राह्मणं शाट्यायनके श्रोतव्यं सुकन्याब्राह्मणम् ॥ (१०)

**तद्वां नरा शंस्यं राध्यं चाभिष्टिमन्नासत्या वरूथम् ।**
**यद्विद्वांसा निधिमिवापगूळ्हमुद्दर्शतादूपथुर्वन्दनाय ॥**

तद्वां[1] नरा शंसनीयं राधनीयं चाभिष्टिमदभ्येषणीयं[2] भृग्यं[3] वरूथं[4] वरणीयम्[5] । यद्विद्वांसौ निधिमिव भूम्यामवगूढं वन्दनं कूपे पतितं तस्मात् कूपादुदूपथुः[6] । दर्शतः कूपो भवति द्रष्टव्योऽध्वगैरवहितैः । अपि वा दर्शनीय[7] पिपासुभिरिति ॥

तद्युवयोर्नरौ स्तोतव्यं राधनीयं लालनीयं चान्वेषणं चाभ्येष्टव्यं वरणीयं च । यद्युवां पतिं जानन्तौ तिरोहितं निधिमिव कूपे पतितं वन्दनं प्रयत्नेन दर्शनी-

[1] Pratīka not separately given.

[2] After शंसनीयं the letters are badly worm-eaten. Conjectured with much labour.

[3] Read मृग्यं.

[4] Anusvāra after थ worm-eaten.

[5] The word नासत्या not taken up.

[6] The उ mark below थ worm-eaten.

[7] Folio 82*a* ends here. Read दर्शनीयं.

यादगाधात् कूपात् ऊपथुः । छन्दोऽनुविधानाय विभक्तिव्यत्यय ऋगन्तेषु भवति ॥ ११ ॥

**तद्वां नरा सनये दंसं उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम् ।**
**दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाच ॥**

तद्वाम् । तद्वां नरा धनार्थं कर्मोद्गूर्णं आविष्करोति[1] मेघशब्द इव वृष्टिम । यदायथर्वणो[2] दध्यन्तमयप्रवर्ग्यविद्या[3] प्रोवाचाश्वस्य शिरसा । पुनर्यदिति पूरणम् । इतिहासानुक्रमण्यामुक्तास्स + +[4] इतिहासाः ॥

अथ च्यवन उवाच । कुरुक्षेत्रेऽपशीर्ष्णा यज्ञेन यजमाना न तं काममाप्नुवन्ति । दध्यङ् ह वा आथर्वणो यथा शिरः प्रतिनिधीयते । यथैष कृत्स्नो भवति तथा वेद । ततो ज्ञात्वा देवेभ्यो यजमानेभ्यो यज्ञस्य शिरः संधत्तमिति । अथ तमेत्योचतुः । उप त्वा यावेति । कस्मै कामायेति । यथैतद्यज्ञस्य शिरः प्रतिनिधीयते इति । स होवाच । इन्द्रेण वा उक्तोऽस्मि । यदि वेदमन्यस्मै ब्रूयाः शिरस्ते छिन्द्यां इति । तस्मात् बिभेमि इति । तौ होचतुः । आवां त्वा तस्मात् त्रास्यावहे इति । यदा नावुपनेष्यसे अथ ते स्वं शिरः छित्वा अन्यत्रोपधास्यावः । अथाश्वस्य शिर आहृत्य तत्ते प्रतिनिधास्यावः । तेन नावनुवक्ष्यसि इति । एवमुक्त्वाश्वस्य शिरः प्रतिनिधीयते इति । स होवाच । इन्द्रेण वा उक्तोऽस्मि । संधाय तेन संवदमानावासाते साम गायमानावृचं च यजुरभिव्याहरन्तौ । ताभ्यां ह श्रद्धाय तेनाश्वस्य शीर्ष्णा अनूवाच । तदिन्द्रोऽन्वबुध्यत । प्र ह आभ्यामवोच-

[1] Read आविष्करोमि.

[2] Read यदा आथर्वणो.

[3] Read दध्यङ् मधु प्रवर्ग्यविद्यां. Then one or two letters worm-eaten; cannot be reconstructed. One must be the Anusvāra of द्यां. Perhaps the second is वां.

[4] The letter क्ता is clear. The next looks like स्स. Then two letters are damaged by white ants beyond recognition. The first of them looks like ह.

दिति। तस्याद्दृत्य शिरः प्राच्छिनत् इदमश्वशीर्षम्। अथ यदस्य स्वं शिर आसीत् तदिमौ मनीषिणौ प्रतिसमधत्ताम। इति वाजसनेयकशाख्यायनकयोरुक्तं इति। तद्युवयोरुद्गूर्णं कर्माहं लाभाय आविष्कृणोमि स्तनयित्नुरिव वृष्टिम्। ईमिति पूरणः॥ (१२)

**अजोहवीन्नासत्या करा वां महे यामन् पुरुभुजा पुरंधिः।**
**श्रुतं तच्छासुरिव वध्रिमत्या हिरण्यहस्तमश्विनावदत्तम्॥**

अजोहवीत्[1]। आजुहाव नावित्यौ[2] कर्माणां[3] कर्तारौ वाम्। पुरन्धिर्वध्रीमती[4] मंहनीये[5] यामनि पुरुभुजौ। तद्भवनं शृणुतं शासितुराचार्यस्येव शासनं वध्रिमत्याः। श्रुत्वा च हिरव्यहस्तं[6] नाम पुत्रमदत्तमिति॥

आजुहाव वां नासत्यौ कर्मणामाश्चर्याणां कर्तारौ महति यज्ञे बहूनां हविषां भोक्तारौ स्त्रीवत् ह्रीमती। तच्चाह्वानं भवद्भ्यां श्रुतं आदरेण यथा शासितुराचार्यस्य शासनम्। अथास्यै हिरण्यहस्तं नाम पुत्रमदत्तम्॥ (१३)

**आस्नो वृकस्य वर्तिकामभीके युवं नरा नासत्यामुमुक्तम्।**
**उतो कविं पुरुभुजा युवं ह कृपमाणमकृणुतं विचक्षे॥**

आस्नः। आस्याद्वृकस्य वर्तिकां गृहीतं[7] अभीके वृकवर्तिकयोः

[1] ह is mostly worm-eaten.
[2] Read नासत्यौ.
[3] Read कर्मणां
[4] Read पुरन्धिर्वध्रिमती.
[5] Read मंहनीये. The Anusvāra after म is worm-eaten.
[6] Read हिरण्यहस्तं.
[7] Read गृहीतां; the letter गृ is mostly worm-eaten.

संग्रामे। युवां नरा नासत्या अमुमुक्तम्। किंच कविमृषिमन्धं पुरुभुजौ युवां ह कृपणं[1] स्तुवन्तमकृणुतं विचक्षे विद्रष्टुं समर्थमिति ॥

वृकेन सह वर्तिकायाः संग्रामे तां वृको जग्राह। अथ वृकस्यास्यात्तां मोचितवन्तौ इति। अपिच कविमुशनसः पितरं अन्यं वा एवंनामानं स्तुवन्तं दर्शनायाकृणुतम् ॥ (१४)

**चरित्रं हि वेरिवाच्छेदि पर्णमाजा खेलस्य परितक्म्यायाम्।**
**सद्यो जङ्घामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तम् ॥**

चरित्रम्। चरित्रं हि पादः। पक्षिणः पर्णमिवाच्छेदि विश्पलायाः संग्रामे अगस्त्यपुरोहितद्धस्य[2] राज्ञो निशायाम्। सद्य एव जंघामायसीं विश्पलायै शत्रुषु निहिते धने जेतव्ये सर्तुं प्रत्यधत्तम् ॥

खेलनाम्नो राज्ञो युद्धे गच्छन्त्या विश्पलायां तस्याश्चरित्रं जङ्घाप्रदेशं पक्षिणः पर्णमिव व्याधैः शत्रुभिरच्छेदि। अथ तस्या हितं धनं प्रतिसरणाय आयसीं जङ्घां तस्यै विश्पलायै तदानीमेव प्रत्यधत्तम् ॥ (१५)

**शतं मेषान्वृक्यै चक्षदानमृज्राश्वं तं पितान्धं चकार।**
**तस्मा अक्षी नासत्या विचक्ष आधत्तं दस्रा भिषजावनर्वन् ॥**

शतम्। अन्वहमेकैकं पौराणां यावच्छतं मेषानात्मीयायै कस्यैचिद्वृत्यै चक्षदानम्। क्षिदिश्शकलीभावकर्मा दानकर्मा वा। ऋज्राश्वं पौरहिते प्रवृत्तः पिता अन्धं चकार। तस्मै चक्षुषी नासत्यौ विदर्शनायात्तं[3] दस्रौ भिषजावनर्वन् अनर्वणि अस्खलिते[4] ॥

[1] Read कृपमाणं.

[2] Read अगस्त्यपुरोहितस्य.

[3] Read विदर्शनायाधत्तं.

[4] Looks more like असखलिते.

पैराणां मेषान् गृहीत्वा लीलार्थं वृक्यै विशसन्तं ऋज्राश्वं तं पिता पौरहितार्थं अन्धं चकार। तस्मै दर्शनाय अनर्वणी अप्रत्यृते शीघ्रगमने सूक्ष्मदर्शने अक्षिणी अधत्तम्॥ (१६)

**आ वां रथं दुहिता सूर्यस्य कार्ष्मेवातिष्ठदर्वता जयन्ती।**

**विश्वे देवा अन्वमन्यन्त हृद्भिः समु श्रिया नासत्या सचेथे॥**

आ वाम्। आतिष्ठद्वां रथं सूर्यस्य दुहिता यथा कश्चित् काष्ठमातिष्ठेत्[1] धावमानयोः। अश्वेन युवाभ्यां जीयमाना। तदन्वमन्यन्त विश्वे देवा हृदयैः। तदानीं सचेथे श्रिया युवां नासत्येति॥

कार्ष्मशब्दः काष्ठावचनः। यथाजि धावन् शीघ्रं काष्ठामातिष्ठति एवं भवद्भ्यां शीघ्रैरश्वैः स्वयंवरे जीयमाना आजिं धावद्भिः सूर्यस्य दुहिता युवयो रथमातिष्ठत्। तच्च भवतोर्बलं दृष्ट्वा स्वयंवरार्थमागता विश्वे देवा हृदयैरन्वमन्यन्त। तदानीं जयश्रिया सह संयुक्तौ भवथः॥ (१७)

**यदयातं दिवोदासाय वर्तिर्भरद्वाजायाश्विना हयन्ता।**

**रेवदुवाह सचनो रथो वां वृषभश्च शिंशुमारश्च युक्ता॥**

यदयातम्। यदा युवामायातं दिवोदासप्रीत्यर्थं तद्गृहम्। भरद्वाजाय भरदन्नाय यजमानाय अश्विनौ कुतन[2] हूयमानौ। तदानीं रेवद्धनवदन्नं तस्मै उवाह युवयोः सचनः सेवको रथः। तस्मिंश्च रते[3] वृषभश्च शिंशुमारश्चाश्चास्तां[4] इति॥

[1] Read काष्ठामातिष्ठेत्.

[2] Word not clear.

[3] Read रथे.

[4] Read शिंशुमारश्चाश्वावास्तां. Better युक्तौ for आस्तां; or युक्तावास्तां is still better.

यदा युवां दिवोदासं रक्षितुं मार्गं गमनायायातं भरद्वाजकुलजाताय आहूयमानौ। तदानीं युवयोः सचनः सेव्यो रथो धनयुक्तं उवाह। तदानीं तस्मिन् रथे वाहार्थमृषभश्च शिंशुमारश्च युक्तौ ॥ (१८)

**र॒यिं सु॑क्ष॒त्रं स्व॑प॒त्यमायु॑ः सु॒वीर्यं॑ नासत्या॒ वह॑न्ता ।**
**आ ज॒ह्नावीं॒ सम॑न॒सोप॒ वाजै॒स्त्रिरह्नो॑ भा॒गं दध॑तीमयातम् ॥**

रयिम्। रयिं सुबलं स्वपत्यमन्नं सुवीर्यं च नासत्यौ वहन्तौ युवामुपायातं जह्नोः कुलजातां प्रजां समनस्कावन्नैः सहाश्वस्त्रिभागं[1] युवयोर्जयमनुसवनं यजमानाविति[2] ॥

रयिं शोभनबलं शोभनापत्यमन्नं सुवीर्यं च नासत्यौ प्रयच्छन्तौ जह्नोरपत्यभूतां प्रजां बलाकाश्व(?) कुशिकविश्वामित्रप्रभृतिमेकचित्तौ अन्नैः सहोपागच्छतं अह्नस्त्रिर्युवाभ्यां हविः प्रयच्छन्तीम् ॥ (१९)

**परि॑विष्टं जाहु॒षं वि॒श्वतः॑ सीं सु॒गेभि॒र्नक्त॑मूहथू॒ रजो॑भिः ।**
**वि॒भि॒न्दुना॑ नासत्या॒ रथे॑न॒ वि पर्व॑ताँ अजर॒यू अ॑यातम् ॥**

परिविष्टम्। सपत्तैः[3] परिवृतं जाहुं[4] नाम विश्वत एनं सुगैर्मार्गैर्निशायामूहथुः। तदानीं विभोदके[5] नासत्यौ व्ययातं पर्वतान् अजरयू जरारहिताविति ॥

[1] Read सहाह्नस्त्रिभागं.

[2] From युवयोः is extra; nothing in the text for this. दधतीं not taken up.

[3] Folio 82*b* ends here. Read सपत्नैः

[4] Read जाहुषं.

[5] Read विभेदकेन.

विश्वतः परिगृह्यावष्टभ्य असुरैः पर्वतैः परिवृतं जाहुषं नाम देवानां यजमानं सुगमैर्मार्गैर्निक्तमूहथुः । तदानीं पर्वतानां विभेत्रा रथेन पर्वतानां मध्ये जरारहितावजीर्णौ सन्तौ गतवन्तौ ॥ (२०)

**एकस्या वस्तोरावतं रणाय वशमश्विना सनये सहस्रा ।**
**निरहतं दुच्छुना इन्द्रवन्ता पृथुश्रवसो वृषणावरातीः ॥**

एकस्याः । एकस्या वस्तोः अह्न एकस्यावनं[1] रणाय । वशमृषिमश्विनौ यधनाय[2] सहस्राय । यथाह्न· सहस्रं लभते तथावततम्[3] । निरहतं चासुखा[4] इन्द्रेण युक्तौ पृथुश्रवसौ[5] वर्षितारावरातीः ॥

एकस्याह्नः कृतो यो रणः तस्य यथा वशो राजा सहस्रं धनं लभते एवं तं ररक्षतुः । सहस्रेति चतुर्थ्येकवचनस्य आकारः । किंच पृथुश्रवसः तस्य निहतवन्तौ उपद्रवकारिणः शत्रून् हे वर्षितारौ कामानां इन्द्रसहितौ । अथवा पृथुश्रवाश्च नाम अपरः । तस्य शत्रूंश्च निरहतम् ॥ (२१)

**शरस्य चिदार्चत्कस्यावतादा नीचादुच्चा चक्रथुः पातवे वाः ।**
**शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गाम् ॥**

शरस्य । एकादशाक्षरः प्रथमः पादः । आर्चत्कस्य ऋचकपुत्रस्य शरस्य चिदृषेः पानार्थं कूपान्निचिन्नात्[6] उच्चैश्चक्रथुः वाः जलम् । शयवे चिन्नासत्यौ कर्मभिरुपक्षीणाया[7] निवृत्तप्रस्वां[8] गां पयसा पिप्यथुः ॥

[1] Read एकस्यावतं.

[2] य before धनाय not wanted.

[3] Read तथावतम्.

[4] Read चासुखानि.

[5] Read पृथुश्रवसो.

[6] Read कूपान्नीचात्.

[7] Read कर्मभिरुपक्षीणाय.

[8] Read निवृत्तप्रसवां

तृषितस्य ऋचीकपुत्रस्य शराख्यस्य नीचोदकात् कूपात् पानाय जलमुच्चैराचक्रथुरश्विनौ। तथा शयवे हे नासत्यौ कर्मभिरुपक्षीणाय क्षुधिताय निवृत्तप्रसवां गां आप्यायितवन्तौ ॥ (२२)

**अवस्यते स्तुवते कृष्णियाय ऋजूयते नासत्या शचीभिः ।**
**पशुं न नष्टमिव दर्शनाय विष्णाप्वं ददथुर्विश्वकाय ॥**

अवस्यते। रक्षणमिच्छते स्तुवते कृष्णियायार्जवमिच्छते कृष्णपुत्राय नासत्यौ कर्मभिः। पशुमिव वष्टं[1] दर्शनार्थम्। विशेष्ये विशेषणे चोपमार्थीयः प्रयुक्तः। तत्र पुरकः[2]। विष्णाप्वं नाम विनष्टं पुत्रमानीय ददधुर्विश्वकाय ॥

रक्षणमिच्छते स्तुवते कृष्णपुत्राय आर्जवमिच्छते विश्वकनाम्ने नासत्यौ कर्मभिर्नष्टमिव पशुं विनष्टं विष्णाप्वं नाम पुत्रं दर्शनाय ददथुः। इवेति पूरणः नेत्यनेन पौनरुक्त्यं स्यादिति ॥ (२३)

**दश रात्रीरशिवेना नव द्यूनवनद्धं श्नथितमप्स्व१न्तः ।**
**विप्रुतं रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव स्रुवेण ॥**

दश। कस्यचिदह्नोऽपराह्णे अरेः कूपे पतितो दश निशा नव च दिवसानशिवेन दाम्ना वर्धं[3] श्नथितं प्रक्षिप्तमप्स्वन्तः कूपे विप्लुतं व्याक्षिप्तं रेफमुदकैर्वर्ममिव[4] प्रवृक्तं एकादशेऽह्नि प्रातरुन्यन्निन्यथुः[5] सोममिव स्रुवेण। सौमश्च[6] कक्षीवदग्निहोत्रमिति ॥

[1] Read नष्टं.

[2] Read एकः पूरकः

[3] Read बद्धं.

[4] र्वर्ममिव not wanted.

[5] न्य before न्नि not wanted.

[6] Read सोमश्च.

दश रात्रीर्नव चाहानि अशिवेन निगलेन बद्धं अप्स्वन्तरवनद्धं निगूढं विप्लुतचित्तं रेभनामानमुदके असुरैरित्थं प्रवृक्तम्। वृश्चतिः छेदनकर्मा। इह तु हिंसार्थः। तमुन्निन्यथुः सोममिव स्रुवेण। सोमोऽपि अग्निहोत्रहविर्भवति॥ (२४)

**प्र वां दंसांस्यश्विनाववोचमस्य पतिः स्यां सुगवः सुवीरः।**
**उत पश्यन्नश्नुवन् दीर्घमायुरस्तमिवेज्जरिमाणं जगम्याम्॥**

प्रवाम्। प्रावोच्चं[1] युवयोः कर्माणिमश्विनौ[2]। सोऽहमस्या[3] राष्ट्रस्य पतिः स्याम् सुगवसुवीरं[4]। अपिचाहमक्षिभ्यां पश्यनोप्नुवन्[5] दीर्घं च जीवितं गृहमिव स्वामी जगाञ्जरम्यां[6] वृद्ध इति[7]॥

इत्थं प्रावोचं युवयोः कर्माणि। सोऽहं शोभनगोयुक्तः शोभनवीरश्च सन् अस्योभयस्य स्वामी स्याम्। अपिच चक्षुषा अनन्धः सन् पश्यन् दीर्घं चायुः प्राश्नुवन् स्वगृहमिव अनुद्विग्नहृदयः सन् क्रमेण जरां गच्छेयम॥ (२५)

---

**मध्वः सोमस्याश्विना मदाय प्रत्नो होता विवासते वाम्।**
**बर्हिष्मती रातिर्विश्रिता गीरिषा यातं नासत्योप वाजैः॥**

[1] Read प्रावोचं.

[2] One letter after कर्माणि completely worm-eaten. But no letter seems to be wanted in this place. Read कर्माणि अश्विनौ.

[3] Read सोऽहमस्य.

[4] Read सुगवः सुवीरः

[5] Read पश्यन्नाप्नुवन्.

[6] Perhaps to read जरां जगम्यां

[7] Here there is the figure 4 to mark the end of the sūkta.

मध्वः । मधुना सोमेनाविनौ[1] मादयितुं प्रत्नो होता परिचरति वाम् । बर्हिष्यासन्नमिदं देवं[2] हविः स्तुतिश्चेयमृत्विक्षु विश्रुता[3] भवति । तथा सति इषा उपयान्तं[4] नासत्यौ[5] बलैश्च ॥

अश्विनौ मधुसदृशेन सोमेन युवां मादयितुं पुराण आह्वाता स्तुतिभिर्वा परिचरति । किंच स्तीर्णेन बर्हिषा तद्वती अस्माकं रातिः सोमस्य दानम् । एवं विश्रिता विस्तीर्णा स्तुतिश्च । तौ युवामस्माननेन बलैश्च सहोपागच्छतम् ॥ (१)

**यो वामश्विना मनसो जवीयान् रथः स्वश्वो विश आजिगाति ।**
**येन गच्छथः सुकृतो दुरोणं तेन नरा वर्तिरस्मभ्यं यातम् ॥**

स्पष्टोत्तरा । जिगातिरभिगमनार्थः । तेनास्मभ्यमस्माकं गृहं यामितमिति[6] ॥

अश्विनौ यौ युवयोः मनसोऽपि वेगवत्तरो रथः शोभनाश्वयुक्तो मनुष्यान् प्रति गच्छति येन च यजमानस्य गृहं प्रति गच्छथः तेनास्मदर्थं गमनमार्गं प्रति आगच्छतम् ॥ (२)

**ऋषिं नरावंहसः पाञ्चजन्यमृबीसादत्रिं मुञ्चथो गणेन ।**
**मिनन्ता दस्योरशिवस्य माया अनुपूर्वं वृषणा चोदयन्ता ॥**

ऋषिम् । स्वर्भानुना गृहीतं सूर्यममुं रोचयन्नत्रिः पञ्चजनहितो

[1] Read सोमेनाश्विनौ.

[2] I am not certain about the need for this word.

[3] Read विश्रिता.

[4] Read उपयातं.

[5] The औ mark in त्यौ completely worm-eaten.

[6] Read यातमिति.

भवति । तमंहस आहन्तुऋभ्वीसात्[1] सर्वगणं[2] अमुञ्चतम् । बाधमानो[3] दस्योरसुरस्याशिवकरस्य तस्मिन् प्रयुक्ता माया अनुपूर्वं तस्मै भद्राणि वर्षितारौ[4] रेचादयन्तौ[5] ॥

ऋषिं नेतारौ पञ्चजनहितम् । अत्रिर्हि सूर्यमरोचयत् । तमृबीसादग्नेरंहस उपद्रवात् यथा मुक्तो भवति एवं सपुत्रपौत्रं सेन्द्रियं युवाममुञ्चतम् । हिंसन्तौ दस्योरुपक्षपयितुः असुरवर्गस्य नानाविधा माया अनुक्रमेण तास्ताः तैः कृताः प्रेरयन्तौ ॥ (३)

**अश्वं न गूळ्हमश्विना दुरेवैरृषिं नरा वृषणा रेभमप्सु ।**
**सं तं रिणीथो विप्रुतं दंसोभिर्न वां जूर्यन्ति पूर्व्या कृतानि ॥**

अश्वम् । अश्वमिव व्याधिता[6] गूळ्हेमश्विना[7] दुरेवैरसुरै[8] ऋषिं नरा वृषणा रेभमप्लु[9] कृतापादुन्नीतं[10] तम् । विप्लुतं विश्लिष्टाङ्गं सरणीथः[11] संधत्तं कर्मणिभिः[12] । न युवयोः जीर्णानि भवन्ति प्रत्नानि कर्माणि ॥

[1] Read आहन्तुर्ऋबीसात्.

[2] Perhaps to read only सगणं.

[3] Read बाधमानौ.

[4] Folio 83*a* ends with व.

[5] Read चोदयन्तौ. There is extra र between the ए mark and चा in चो.

[6] Perhaps to read व्याधिना.

[7] Read गूळ्हमश्विना.

[8] Read दुरेवैरसुरैः

[9] Read रेफमप्सु.

[10] Read कूपादुन्नीतं.

[11] Read संरिणीथः

[12] Read कर्मभिः

अश्वमिवाप्सु गूढं पापागमनैरसुरैर्नैतारावश्विनौ रेभमृषिम् । सह गतवन्तौ युवां सुकर्मभिर्विप्लुतम् । न युवयोः कर्माणि पूर्वकालकृतानि कदाचन जीर्यन्ति । न विनश्यन्ति आश्चर्यभूतानि ऋषिभिर्धार्यमाणानि ॥ (४)

**सुषुप्वांसं न निर्ऋतेरुपस्थे सूर्यं न दस्रा तमसि क्षियन्तम् ।**
**शुभे रुक्मं न दर्शतं निखातमुदूपथुरश्विना वन्दनाय ॥**

सुषुप्वांसम् । सुप्तमिव भृत्या[1] उपस्थे सूर्यमिव च दस्रा तमसि निशायां तमस्यैव[2] वा निवसन्तम् । शोभयितुमङ्गानि रुममिव[3]दर्शनीयं भूम्यां निखातमुदूपथुः रश्विनौ[4] वन्दनमृषिम् । अपिवा जीर्णं जराय[5] ॥

यथा कंचन भूम्या उपस्थे शयानं सुप्तं हस्तेन प्रबोध्य उत्थापयति । यथा वा दर्शनीयौ नैशे तमसि वसन्तं सूर्यं काल उत्थापयति । यथा कश्चन भूम्यां निखातं रुक्माभरणमलंकरणार्थमुद्वपति एवं वन्दनमुदूपथुः कूपादसुरनिहितम् ॥ (५)

**तद्वां नरा शंस्यं पज्रियेण कक्षीवता नासत्या परिज्मन् ।**
**शफादश्वस्य वाजिनो जनाय शतं कुम्भाँ असिञ्चतं मधूनाम् ॥**

तद्वाम् । तद्वां नरा शंस्यं पाज्ञायाः[6] कुलजातेन[7] कक्षीवता

[1] Read निर्ऋत्या.
[2] Read तमस्येव.
[3] Read रुक्ममिव.
[4] Read अश्विनौ.
[5] Read जरया.
[6] Read पज्रायाः
[7] Only a part of न remains; it is worm-eaten.

नासत्या परितो गमने । सर्वेभ्यो यच्छवादश्वस्य[1] बलिनो जनाय याचमानाय शतं कुंभानसिञ्चतं मधूनामिति ॥

तद्युवयोर्नेतारौ शंसनीयं पज्राणां पुत्रेण कक्षीवता मया नासत्यौ परितो यत्र मां जना गन्तारो भवन्ति तत्र तत्र यद्युवां बलवतोऽश्वस्य शफात् जनार्थं मधूनां शतं कुम्भान् आपूरयतम् ॥ (६)

**युवं नरा स्तुवते कृष्णियाय विष्णाप्वं ददथुर्विश्वकाय ।**
**घोषायै चित्पितृषदे दुरोणे पतिं जूर्यन्त्या अश्विनावदत्तम् ॥**

स्पष्टोत्तरा । येषा[2] कुष्ठिनी सति[3] स्वे जननेगृहे[4] पितरि निषण्णा जीर्णासीदप्रत्ता वराय । सा[5] नष्टकुष्ठाश्विभ्यां पतिं लेभे इति ॥

युवां नरौ स्तुवते कृष्णनाम्नः पुत्राय विश्वकनाम्ने विनष्टं विष्णाप्वं नाम पुत्रं ददथुः । घोषा नाम काचन स्त्री पिता यत्र सीदति तस्मिन् पितृगृहे दौर्भाग्यादलब्धपतिकैव जीर्णासीत् तस्यै सौभाग्यं प्रदाय पतिमदत्तम् ॥ (७)

**युवं श्यावाय रुशतीमदत्तं महः क्षोणस्याश्विना कण्वाय ।**
**प्रवाच्यं तद्वृषणा कृतं वां यन्नार्षदाय श्रवो अध्यधत्तम् ॥**

युवम् । श्यावववर्णेन दूषितः । ऋषिभ्याव[6] आद्युदात्तः । युवां तस्मै दीप्ताञ्चचमदत्तम्[7] । अपिच महतः क्षोणस्याश्विनौ कण्वाय । क्षोणो वाणः

[1] Read यच्छफादश्वस्य.
[2] Read घोषा.
[3] Read सती.
[4] Read जननगृहे.
[5] This letter mostly worm-eaten. Only a guess.
[6] Read ऋषिः श्याव.
[7] Read दीप्तां त्वचमदत्तम् . The letter म mostly worm-eaten.

क्षौते: शब्दकर्मण: । प्रवाच्यं तद्वृषणा युवयो: कर्म यन्नृषद्पुत्राय कण्वाय श्रव: शब्दमध्यधत्तम् । ब्राह्मण्यंपरीक्षार्थे[1] असुरा गूढे तमसि निदधु: अत्र व्युष्टां विजानीहि यदि ब्राह्मणोऽसीति । तमश्विनौ तत्रैक्योचतु:[2] । व्युष्टौ वा हर्म्यस्योपरि वीणामाघ्नन्तौ गमिष्याव: । तं शब्दं श्रुत्वा व्युष्टां ब्रूहीति । तदनेयोक्तम्[3] ॥

युवां श्यावाय कुष्ठिने दीप्तां त्वचमदत्तं प्रस्कण्वायान्यस्मै वा । किंचाश्विनौ नार्षदाय कण्वाय महतो वाणस्य शब्दमन्धकारे प्रक्षिप्ताय यद्युवामुपर्यधत्तं तद्युवयो: कृतं प्रकर्षेण वाच्यम् । क्षौति: शब्दकर्मा । शब्दकरणात् वीणा क्षीण: । अत्र शाट्यायनकम् । कण्वो वै नार्षदो बकस्यासुरस्य दुहितरमविन्दत । तस्यां हास्य त्रिशोकनाभाकौ पुत्रौ जज्ञाते । सा ह क्रुद्धा ज्ञातीनाययौ । तां हान्वाजगाम । तं हासुरा अवलेपेनावलिम्पन्त ऊचु: । अत्र व्युष्टां विजानीहि यदि ब्राह्मणोऽसि इति । तदु हाश्विनाववबुबुधाते । अश्विनौ हि वै देवानां बन्धमुचौ । तौ हैनमदृश्यमानावेत्य ऊचतु: । यदैव त्वावां वीणां समाघ्नन्तौ उपर्युपरि अतिपताव: अथ व्युष्टां विजानीतात् इत्यादिकमुक्त्वाह । अथ हैतौ वीणां समाघ्नन्तौ उपर्युपरि अधिपेततु: । स होवाच । अपहरतेदम् । एतर्हि यावद्युङ्ध्वं सीराणि इति । ते होचु: । ब्राह्मणो वा अयमृषिरासत् । दु:खभरा वास्य जाया । हन्तास्मै इमां ददाम इति । तां हास्मै ददु: ॥ (८)

पुरू वर्पांस्यश्विना दधाना नि पेदव ऊहथुराशुमश्वम् ।
सहस्रसां वाजिनमप्रतीतमहिहनं श्रवस्यं१ तरुत्रम् ॥

[1] Read ब्राह्मण्यपरीक्षार्थं.

[2] Read तत्रेत्योचतु: The letter त in the beginning mostly worm-eaten.

[3] Read तदनयोक्तम् .

पुरू वापांस्याश्चर्याणि[1] कर्मकृतानि रूपाणि । तेपदुनाम्ने[2]ऽश्वमेवं-विधं न्यूहथुर्दधुरिति । शिष्टं स्पष्टम् ॥

पुरूणि कर्मरूपाणि अश्विनौ पेदवे राज्ञे शीघ्रगन्तारमश्वं न्यूहथुः सहस्रधनस्य संभक्तारं बलवन्तं शत्रुभिरप्रतिगतमाहन्तृणां शत्रूणां कीर्तिहेतुं तारकम् ॥ (९)

**एतानि वां श्रवस्या सुदानू ब्रह्माङ्गूषं सदनं रोदस्योः ।**
**यद्वां पज्रासो अश्विना हवन्ते यातमिषा च विदुषे च वाजम् ॥**

एतानि युवयोः श्रवणियदस्नि[3] सुदानौ इत्युक्त्वा एकवदाह । ब्रह्म स्तोत्रमाङ्गूषं पर्याप्तं घोषणीयं सदनं येन सीदतः स्तोतुः समीपे रोदस्यो[4] । द्यावापृथिवीसमीपयोः[5] इमे आश्विने हि ब्रह्मणम्[6] । एतानि कृतानीति शेषः । यदा वां पज्रासो अश्विना हवन्ते तदानीं यातमिषा सह विदुषे च वाजं धनमिति । अत्र संस्थितं सूक्तं प्रतिभाति मन्त्रार्थवेषात् । अपि च वर्गान्ते यं हवसे[7] रूपान्यैरूपसंभाररैः[8] । सूनोममानन्येनत्यादिकाश्च[9] अन्यादृशवचनस्य व्यक्तयो भवन्ति । तथापि शौनकेन सूक्तमितिदमेकमेव[10] इत्युक्तमाहुरिति[11] ॥

[1] Read वपांसि । आश्चर्याणि.

[2] Read पेदुनाम्ने. There is an extra त between the ए mark and प of पे.

[3] Read श्रवणीयानि. The Pratika is not separately given.

[4] Read रोदस्योः

[5] Perhaps to read द्यावापृथिव्योः समीपे.

[6] Passage not clear.

[7] Folio 83*b* ends here.

[8] Read रूपान्यैरुपसंहारैः

[9] Read सूनोमर्नित्यादिकाश्च.

[10] Read सूक्तमिदमेकमेव.

[11] Reading of the passage not quite satisfactory.

हे शोभनदानावश्विनौ एतानि युवयोः श्रोत्रहितानि सर्वेषां तात्पर्येण श्रवणीयानि कर्माणि । बृहच्च स्तोत्रं एतद्धि महत् यन्नासत्याभ्याम्—इत्यादिकं येन स्तोता द्यावापृथिव्योरुभयोरपि सीदति । यदा युवां पज्रकुले जाता ह्वन्ते तदान्नेन सह यच्छतम् । अथ तदन्नं विदुषे कक्षीवते दत्तं च ॥ (१०)

**सूनोर्मानेनाश्विना गृणाना वाजं विप्राय भुरणा रदन्ता ।**
**अगस्त्ये ब्रह्मणा वावृधाना सं विश्पलां नासत्यारिणीतम् ॥**

नोः[1] । कुंभेन यः सूतः तस्य स्तुतिभिः स्तूयमानौ । विभक्तिव्यत्ययो वा । मानस्य सूनुना अगस्त्येन खेलस्य पुरोहितेन स्तूयमानौ । वाजं विप्राय भारद्वाजाय[2] भर्तारौ प्रयच्छन्तौ । छिन्नजंघां विश्पलां संरिणीतम्[3] । इत्युक्तमैवार्थमात्तरेरर्धर्चोनोपसंहरति[4] ॥

भरद्वाजपुत्रस्य स्तोत्रेणाश्विनौ स्तूयमानौ युवामन्नं विप्राय भरद्वाजाय भरणशीलौ । रदतिर्दानकर्मा । प्रयच्छन्तौ । एतच्च कृतवन्ताविल्याह । अगस्त्य इति खेलपुरोहितः । अगस्त्ये स्तोत्रेण वर्धमानौ खेलस्य योध्रीं स्त्रीं शत्रुभिः छिन्नजङ्घां तत्प्रतिसन्धानार्थं सह गतवन्तौ ॥ (११)

**कुह यान्ता सुष्टुतिं काव्यस्य दिवो नपाता वृषणा शयुत्रा ।**
**हिरण्यस्येव कलशं निखातमुदूपथुर्दशमे अश्विनाहन् ॥**

आंह[5] । कविपुत्र उशना अन्तोदात्तः काव्यः । स्तोत्रं चेदा-

[1] Read सूनोः

[2] Read भरद्वाजाय.

[3] Read समरिणीतम् .

[4] Read इत्युक्तमेवार्थमुत्तरर्चेनोपसंहरति । कुह इति. The third Pāda is not commented.

[5] Read कुह,

घुदात्तम् । नि काव्या वेधस:[1] इति । काव्यस्य कल्याणीं श्रुतिं श्रोतुं तस्य निवासं प्रतिगच्छन्तौ मध्येमार्गं पतितं रेभमुद्दाहृथरित्येवतावदेव[2] अस्माभिः पूर्वेभ्यः श्रुतम् । न तु तदानीं कस्मिन्निवासे[3] कावोपस्थित[4] इति । तदिदानीं पृच्छति । कुशयुत्र[5] कस्मिञ्छयने निवासे गच्छन्तौ सुष्टुतिं प्रति काव्यस्य दिव आदित्यस्य पुत्रौ वृषणौ । हिरण्यस्येति स्पष्टम् । रेभमिति प्रकरणात् प्रतीयत इति । कूपे पतितस्य दश रात्रयो नवाहानि च गतानि । दशमेऽभ्युत्तारित इति ॥

शयुशब्दः शयनवचनः । इह तु असुरनिवासवचनः । आदित्यपुत्रावश्विनौ काव्यस्योशनसः सुस्तोत्रं प्रति तच्छ्रवणेच्छया कस्मिन्नसुरनिलये गन्तारौ । युवामसुरैर्जले निखातं रेफं तस्मिन्नसुरपुरे दशमेऽहनि जलादुदूपथुः यथा हिरण्यस्य पूर्णं कलशं निखातम् ॥ (१२)

**युवं च्यवा॑नमश्विना॒ जर॑न्तं॒ पुन॒र्युवा॑नं चक्रथुः॒ शची॑भिः ।**
**यु॒वो रथं॑ दुहि॒ता सूर्य॑स्य स॒ह श्रि॒या ना॑सत्यावृणीत ॥**

युवम् । स्पष्टार्थस्तृचः । श्रीः कान्तिः ॥

उत्तरा व्याख्यातप्राया । श्रिया कान्त्या सहिता ॥ (१३)

**युवं तुग्रा॑य पू॒र्व्येभि॒रेवैः॑ पुन॒र्मन्या॒वभ॑वतं युवाना ।**
**यु॒वं भु॒ज्युमर्ण॑सो॒ निः स॑मु॒द्राद्विभि॑रूहथुर्ऋ॒ज्रेभि॒रश्वैः॑ ॥**

[1] R. V. 1. 72. 1.

[2] Read रेफमुदूहथुरित्येतावदेव.

[3] Read तस्मिन्निवासे.

[4] Perhaps to read काव्य उपस्थित.

[5] Read कुह शयुत्रा. There is त्रा and the आ mark is deleted with a dot above.

तुग्रो[1] भुज्योः पिता । पूर्वेन्दिरेवैः[2] प्रयन्नैरश्विनोः[3] कर्मभिरित्याहुः । पुनर्मन्यौ पुनः पुनः स्तोतव्यौ । यदा तस्य पुत्रमानिन्यतुः तदानीमपि स्तोतव्यौ । यद्वा भुज्युरेव तुग्रः । पूर्षेभिरेषवैः[4] प्रत्नैर्बान्धवैः पितुरागतेरिति[5] । पितैव तुग्र इति युक्तमुत्तरार्धवेषादिति ॥

युवं तुग्राय भुज्योः पित्रे प्रत्नैर्भवतोर्गमनैः पुनः पुनः स्तोतव्यौ अभवतं युवानौ । युवं तत्पुत्रं भुज्युं समुद्रमध्ये विपन्ननौकं समुद्रस्थादुदकात् गन्तृभिर्ऋजुगामिभिरश्वैः तत उदूहथुः ॥ (१४)

**अजोहवीदश्विना तौग्र्यो वां प्रोळ्हः समुद्रमव्यथिर्जगन्वान् ।**
**निष्टमूहथुः सुयुजा रथेन मनोजवसा वृषणा स्वस्ति ॥**

आहूतवानश्विनौ तुग्रपुत्रो वां समुद्रमध्यं प्रापितो विपन्नायामपि नावि भवदाश्रयाद्यथागतः ततस्तं निरूहथुः सुयुक्तेन रथेन मनोवेगेन वर्षितारावविनाशम् ॥ (१५)

**अजोहवीदश्विना वर्तिका वामास्नो यत् सीममुञ्चतं वृकस्य ।**
**वि जयुषा ययथुः सान्वद्रेर्जातं विष्वाचो अहतं विषेण ॥**

अजोहवीत् । अजुहाव[6] वां वृकस्यास्यगता वर्तिका । यदेनां[7] तस्य

1 Pratika not given.

2 Read पूर्वेभिरेवैः

3 Read प्रत्नैरश्विनोः

4 Read पूर्वेभिरेवैः The letter भि mostly worm-eaten.

5 Perhaps to read पितुरागतैरिति.

6 Read आजुहाव.

7 Read यदेनां.

वृकस्यास्यादमुञ्चतं विदधुश्च[1] जयशीलेन रथेनाद्रेः समुच्छ्रितं देवम्[2]। परिविष्टं जाहुषम्[3] इत्युक्तम्। विश्वाचोऽसुरस्य चिज्जातमपत्यं विषेणाहतम्॥

अह्वयदश्विनौ दूत्यार्थं गच्छन्ती वर्तिका वाम्। यदा युवामादित्यस्य वृकभूतस्य आस्यात् हस्तेन ताममुञ्चतम्। जयशीलेन रथेन पर्वतस्य सानुं विययथुः सानूनां मध्येन गतवन्तौ। परिविष्टं जाहुषम् इत्युक्तम्। तथा विष्वाचोऽसुराज्जातमसुरं विषेणाहतम्। अत्र यास्कः। आदित्योऽपि वृक उच्यते इत्यादि॥ (१६)

**शतं मेषान् वृक्ये मामहानं तमः प्रणीतमशिवेन पित्रा।**
**आक्षी ऋज्राश्वे अश्विनावधत्तं ज्योतिरन्धाय चक्रथुर्विचक्षे॥**

शतम्। स्पष्टार्था। मामहानमिति दानार्थम्। चक्षुष्मन्तं कृतमिति पूर्वार्धस्य शेष इत्युत्तरार्धर्चेनावगम्यत इति॥

वृक्यै प्रयच्छन्तं क्रुद्धेन पौरहितेन पित्रा तमः प्रणीतमन्धीकृतं दृष्ट्वा अस्मिन्नक्षिणी आधत्तम्। आधाय च तयोस्तस्मै अन्धाय ज्योतिश्चाधत्तं दर्शनाय॥ (१७)

**शुनमन्धाय भरमह्वयत् सा वृकीरश्विना वृषणा नरेति।**
**जारः कनीन इव चक्षदान ऋज्राश्वः शतमेकं च मेषान्॥**

सुखमन्धाय[4] पूर्णमिच्छन्ती सा वृकीर्मामाह्वयत्[5] अश्विना वृषणा

[1] Read विययथुश्च.

[2] Read देशं.

[3] R. V. 1. 116. 20.

[4] Pratika not separately given.

[5] Read वृकी मामाह्वयत्. The letter ह्व is mostly worm-eaten

नरेति नामभिः । नरेति[1] चामन्त्रितं अर्थस्वसभावात्[2] आद्युदात्तमिति स्वरानुक्रमण्यामुक्तम् । जारः कनीनो युवेव स्त्रियै प्रयच्छन्नृज्राश्वतेमेकं[3] च मेषान् कृतोनसो[4] युवाभ्यामिति ॥

सुखमन्धाय परिपूर्णमाजुहाव सा वृकीः अश्विना वृषणा नरा इति । परिदेवनासूत्तममामन्त्रितमुच्चैर्लौकिका वदन्ति । तत्कुतोऽनिखात इत्युक्तम् । कुमार्याः पतिरिवान्धीभावात् प्राक् यस्यै स वृक्यै शतमेकं च मेषान् भक्षणाय शकलीचकार तस्या वृक्याः प्रीत्यर्थं चक्षुराधत्तमिति ॥ (१८)

**म॒ही वा॑मू॒तिर॑श्विना मयो॒भूरु॒त स्रा॒मं धि॑ष्ण्या॒ सं रि॑णीथः ।**
**अथा॑ यु॒वामिद॑ह्वय॒त् पुरं॑धि॒राग॑च्छतं सीं वृषणा॒ववो॑भिः ॥**

मही । महती वामूतिरश्विनौ[5] सुखस्य भावयित्री । किं च युवा[6] स्रामं व्याधितं विश्लिष्टाङ्गं पुरुषं स्तुत्यर्हौर[7] संरिणीथः । अथ युवामेवाह्वयत् पुरन्धिर्योषा षिश्पला वा । आगच्छतं च तां वृषणो[8] युवामयोभिः[9] ॥

महती युवयोरूतिरश्विनौ सुखस्य भावयित्री । किंच मया स्तुत्यौ सह विनाशयथः । अथ वामिदमह्वयत् बहुधीः वृकी । युवामपि रक्षणैस्तामागच्छतम् ॥ (१९)

[1] Folio 84*a* ends here.
[2] Read अर्थस्वभावात्.
[3] Read प्रयच्छन्नृज्राश्वः शतमेकं.
[4] This word not clear.
[5] The letters वा and ति mostly worm-eaten.
[6] Read युवां.
[7] Read स्तुत्यर्हौ.
[8] Read वृषणौ.
[9] Read युवामवोभिः

**अधेनुं दस्रा स्तर्यं१ विषक्तामपिन्वतं शयवे अश्विना गाम् ।**
**युवं शचीभिर्विमदाय जायां न्यूहथुः पुरुमित्रस्य योषाम् ॥**

स्पष्टोत्तरा । विषक्ता निबद्धालेन[1] । प्रसवरहिता[2] + + + री:[3] । पुरुमित्रस्य योषा । पुरुमित्रस्य अन्यतेति[4] ॥

निवृत्तप्रसवां दर्शनीयौ चिरकालं तथाभूतां स्थितां गां युवामृषये शयवेऽपिन्वतम् । प्रज्ञाभिर्विमदाय च जायां गृहं न्यूहथुः पुरुमित्रस्य दुहितरम् ॥ (२०)

**यवं वृकेणाश्विना वपन्तेषं दुहन्ता मनुषाय दस्रा ।**
**अभि दस्युं बकुरेणा धमन्तोरु ज्योतिश्चक्रथुरार्याय ॥**

यवम् । वृको लांगलम् । तेन कृष्टे देशे यवं वपन्तौ इषं वृष्टि[5] दुहन्तौ दिवो मनुषाय मनवे दस्रौ । बकुरो भास्करो[6] दीप्तो वज्रः । तेन दस्यामभिधनन्तौ[7] उरु ज्योतिश्चक्रथुनाप्याय[8] तस्मै मनवे । जीवन् हि पश्यति सूर्यम् । यद्वा अग्निलाभात् ज्योतिष्मत्त्वम् ॥

अश्विनौ विकर्तनेन लाङ्गलेन भूमिं कृषन्तौ यवं च सरस्वतीतीरे प्रवपन्तौ वृष्टिं चास्मै दुहन्तौ दस्यूंश्च भयंकरेणायुधेन घ्नन्तौ दुर्भिक्षापनयनेन विस्तीर्णं ज्योतिः चक्रथुर्मनवे ॥ (२१)

[1] Perhaps to read निबद्धालाने.

[2] Read प्रसवरहिता. The letter ता completely worm-eaten.

[3] Three letters are completely lost. The last letter must be स्त. Read गौः स्तरी.

[4] Passage not clear.

[5] Read वृष्टिं.

[6] Read भास्वरो.

[7] Read दस्युमभिघ्नन्तौ.

[8] Read ज्योतिश्चक्रथुरार्याय.

आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतम् ।
स वां मधु प्र वोचदृतायन् त्वाष्ट्रं यद्दस्रावपिकक्ष्यं वाम् ॥ २२ ॥

आथर्वणाय । स्पष्टार्था । वक्ष्यामि प्रवर्ग्यविद्यामिति कृतां प्रतिज्ञां सत्यां कुर्वन्नृतायन् छिन्नस्य यज्ञशिरसः कक्षप्रदेशे येनेपुनस्सन + म[1] भवति । तदपि कक्ष्यं मधु प्रवर्ग्याख्यं तत्वषद्दीसादिन्द्राद्दध्यर्दलेभे[2] । तदश्व्येन शिरसाश्विभ्यामृषिः प्राब्रवीत् । इन्द्रो दधीचे प्रवर्ग्यविद्यामुपश्य[3] यमन्यस्यै[4] वक्ष्यसि शिरस्ते छेत्स्यामीत्युवाच । ततोऽश्विनावश्वस्य शिरश्छित्वा दधीचः शिरश्छित्वान्यत्र निधाय तत्राश्व्यं गिरः[5] प्रत्यधत्ताम् । तेन च दध्यन्त[6] ऋचः सानि[7] यजूंषि च प्रवर्ग्यविषयाणि तावदध्यापयामास । तदिन्द्रो ज्ञात्वा वज्रिणो[8] तच्छिरोऽच्छृणत् । अथाश्विना[9] तस्य स्वमेव शिरः प्रत्यधत्तामिति शाट्यायनवाजसनेययोः प्रपञ्च उक्त इति ॥

अथर्वणः पुत्रायाश्विनौ दधीचेऽश्वस्य शिरः छित्वा प्रत्यधत्तम् । अथ तेन शिरसा स युवाभ्यां मध्वाख्यं परं ब्रह्मावोचत् । यज्ञमिच्छन् संहितम् । अपिवा प्रतिज्ञां सत्यां ॰कर्तुमिच्छन् त्वष्टा शिल्पवित् भवति । स च नूनमेतदवेदयत् ।

[1] Word not clear. There is space left blank for a letter between स्सन and म.

[2] Portion not clear. ष between तत्व and द्दीसा not quite legible. Perhaps to read त्वेषाद्दीसादिन्द्राद्दध्यङ् लेभे.

[3] Read प्रवर्ग्यविद्यामुपदिश्य.

[4] Read यदीमामन्यस्मै.

[5] Read शिरः

[6] Read दध्यङ्.

[7] Read सामानि.

[8] Read वज्रेण.

[9] Read अथाश्विनौ.

अश्विभ्यां असौ प्रोवाच । कक्षशिरसोऽप्ययोऽपि कक्षः । तस्य विश्लिष्टस्य यत् संधाननिमित्तं तदपि कक्ष्यम् । छिन्नस्य यज्ञशिरसः प्रतिसंधानोपायभूतं मधु ॥ (२२)

**सदा कवी सुमतिमा चके वां विश्वा धियो अश्विना प्रावतं मे ।**
**अस्मे रयिं नासत्या बृहन्तमपत्यसाचं श्रुत्यं रराथाम् ॥**

सदा । सदा मती[1] सुमती[2] कामये[3] । विश्वानि कर्माण्याश्विनौ[4] प्रावतं मे । मह्यं रयिं नोसत्या[5] । अपत्यानि सेवमानं श्रवणीय[6] दत्तमिति ॥

सदा मेधाविनौ युवयोरहं प्रमतिं कामये । सर्वाणि कर्माण्यश्विनौ प्रावतं मे । अस्मभ्यं धनं नासत्यौ महदपत्यानां संभक्तृ श्रवणनिमित्तं प्रयच्छतम् ॥ (२३)

**हिरण्यहस्तमश्विना रराणा पुत्रं नरा वध्रिमत्या अदत्तम् ।**
**त्रिधा ह श्यावमश्विना विकस्तमुज्जीवस ऐरयतं सुदानू ॥**

हिरण्यहस्तमश्विना[7] रममाणौ पुत्रं नरा वध्रिमन्या[8] अदत्तम् । तथा वमृषिं[9] त्रिधा छिन्नं सध्धायोदैरयतं[10] पुनर्जीवनाय सुदान[11] इति ॥

[1] Read कवी.

[2] Read सुमतिं.

[3] Read कामये.

[4] Read कर्माण्यश्विनौ.

[5] Read नासत्या. The word बृहन्तं not taken up.

[6] Read श्रवणीयं.

[7] Pratika not separately given.

[8] Read वध्रिमत्या.

[9] Read श्यावमृषिं.

[10] Read संधायोदैरयतं.

[11] Read सुदानौ.

हिरण्यहस्तं नामाश्विनौ रममाणौ पुत्रं नेतारौ वध्रिमत्याः अदत्तम् । श्यावं च कुष्ठिनमृषिं कुब्जमश्विनौ त्रिधा छिन्नं संधाय जीवनार्थं पुनरपि उत्थापितवन्तौ शोभनदानौ ॥ (२४)

**एतानि वामश्विना वीर्याणि प्र पूर्व्याण्यायवोऽवोचन् ।**
**ब्रह्म कृण्वन्तो वृषणा युवभ्यां सुवीरासो विदथमा वदेम ॥**

स्पष्टोत्तरा । सुवीरास्सन्तो विदथमेपेक्षितं[1] वेदयन्तमतिथि[2] वामदेवं अपेक्षितप्रदानेनाभिभाषणीमावदत्तम्[3] । वयं त इन्द्र विश्वहा[4] इत्यत्र स्तोत्रं विदथ इत्यविसर्गः । वयं सोमस्य विश्वहा[5] इत्यत्रापर्यवसितार्थत्वादविसर्गः । सा हि सूक्तस्योपोत्तमा । यद्वा तिसृष्वपि विदथपदार्थे सन्देहादविसर्ग इति[6] ॥

एतानि युवयोरश्विनौ वीर्याणि पूर्वकालकृतानि संप्रतितनाः प्रावोचन् स्तोत्रं कृण्वन्तो वर्षितारौ युवाभ्याम् । अथ अभिलषितमाशास्ते । सुपुत्रा वयं गृहं प्राप्य पुत्रादीनावदेम । इति सूक्तेऽस्मिन् प्रकारान्तरेणापदानानि अश्विनोरुक्तानि ॥ (२५)

---

**आ वां रथो अश्विना श्येनपत्वा सुमृळीकः स्ववाँ यात्वर्वाङ् ।**
**यो मर्त्यस्य मनसो जवीयान् त्रिवन्धुरो वृषणा वातरंहाः ॥**

[1] Read विदथमवेक्षितं. Folio 84*b* ends here.

[2] Read वेदयन्तमतिथिं.

[3] Portion not clear. There is न written below त.

[4] R. V. 2. 12. 15. Read विश्वह.

[5] R. V. 8. 48. 14. Read विश्वह.

[6] Here there is the figure 5 to mark the end of the sūkta,

आ वाम् । आयातु वां रथोऽश्विना श्येनपक्वाश्वैः[1] पतन् । अपि-वा श्येनवत् पतन् । सुमृळीको धनयुक्तोऽभिमुखम् । यो मर्त्यस्य मनसो जषीयान्[2] त्रिबन्धुरो वृषणा वातवेगः ॥

अश्विनौ श्येनैरश्वैः पतन् युवयो रथः सुखयिता धनपूर्णः अस्मदभि-मुखमागच्छतु । यो मर्त्यस्य मनसोऽपि वेगवत्तरः । मनुष्यो यदा अश्विनौ चिन्तयित्वा विरतमतिर्भवति तत्प्रागेवागच्छति इति मनसो जवीयान् । त्रिबन्धुरो वर्षितारौ वातवेगः ॥ (१)

**त्रिवन्धुरेण त्रिवृता रथेन त्रिचक्रेण सुवृता यातमर्वाक् ।**
**पिन्वतं गा जिन्वतमर्वतो नो वर्धयतमश्विना वीरमस्मे ॥**

स्पष्टोत्तरा ॥

त्रिवन्धुरेण त्रिसंधानेन प्रउगाकारेण त्रिचक्रेण शोभनवर्तनेन आगच्छत-मभिमुखम् । निर्गमयतमस्मभ्यं पशून् । प्रयच्छतमश्वान् । वर्धयतं चाश्विनौ पुत्र-मस्माकम् ॥ (२)

**प्रवद्यामना सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः ।**
**किमङ्ग वां प्रत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः ॥**

प्रवद्यमाना[3] । शीघ्रगमनेत[4] सुव्रता[5] रथेत[6] दस्राविमं शृणुतं श्लोकमद्रेः । अद्रिस्तोताद्रियतेः । किमङ्ग वां स्तोतॄणां वर्तिं प्रतिगन्तारावा-

[1] Read श्येनपत्वाश्वैः

[2] Read जवीयान्. The letter ज looks more like ऋ.

[3] Read प्रवद्यामना.

[4] Read शीघ्रगमनौ.

[5] Read सुवृता.

[6] Read रथेन.

हुर्विप्रासो अश्विना पुनराजाः[1] परा[2] जातः[3] प्रज्ञाः । किंशब्दः प्रदर्शनफले प्रश्ने वर्तते । कथयन्त्येवं सर्वे । तथा सत्यागन्तव्यमिति ॥

शीघ्रगमनेन सुवृता रथेनागत्य इमं स्तोमं शृणुतमाद्रियमाणस्य । किमङ्ग युवां मनुष्याणां दारिद्र्यं प्रति गन्तारौ वदन्ति अश्विनौ पुरा जाता मेधाविनः । तथा सत्यागच्छतम् ॥ (३)

**आ वां श्येनासो अश्विना वहन्तु रथे युक्तास आशवः पतङ्गाः ।**
**ये अप्तुरो दिव्यासो न गृध्रा अभि प्रयो नासत्या वहन्ति ॥**

आवाम् । आवहन्तु वामश्विनेश्विनो[4] रथे युक्ताः शीघ्राः पतनशीलाः । ये अप्तुरो जलवच्छीघ्रं गच्छन्तोऽन्तरिक्षगा इव प्रध्राः[5] हविः प्रति नासत्यौ वां वहन्ति ॥

आवहन्तु वां अश्वा अश्विनौ अश्नुवानाः पतनशीला रथे युक्ताः । ये उदकस्य प्रेरयितारोऽन्तरिक्षस्था गृध्रा इव युवां हविर्लक्षणमन्नं प्रति नासत्यौ वहन्ति ॥ (४)

**आ वां रथं युवतिस्तिष्ठदत्र जुष्ट्वी नरा दुहिता सूर्यस्य ।**
**परि वामश्वा वपुषः पतङ्गा वयो वहन्त्वरुषा अभीके ॥**

आ वाम् । अमुमित्यर्थे अत्र इति प्रयुक्तम् । आतिष्ठत्वमुं रंथं[6] युवति-

[1] Read पुराजाः

[2] Read पुरा.

[3] Read जाताः

[4] The ए mark in ने is worm-eaten. Read अश्वा अश्विनौ.

[5] Read गृध्राः

[6] Read रथं The Anusvāra of the preceding मुं along with रं may look like ईं.

र्जुष्वि[1] प्रीता सती नरा दुहिता सूर्यस्य । परिवहन्तु वाम + + + वपुषो[2] वपुष्मन्तं[3] पतनशीला वयो गन्तार आरोचमानाः समीपे । यद्वा वपुरश्विनोरावासभूतं जलम् । तत आवहन्त्विति ॥

सूर्यस्य दुहिता प्रीता स्वयंवरे युवयो रथं नरावतिष्ठत् । पर्यवहन्तु वामश्वा उदकात् समुद्रात् गमनशीलाः पतनशीलाः आरोचमाना अन्तिके ॥ (५)

**उद्वन्दनमैरतं दंसनाभिरुद्रेभं दस्रा वृषणा शचीभिः ।**
**निष्टौग्र्यं पारयथः समुद्रात् पुनश्च्यवानं चक्रथुर्युवानम् ॥**

स्पष्टोत्तरा ॥

उत्तरा निगदसिद्धा ॥ (६)

**युवमत्रयेऽवनीताय तप्तमूर्जमोमानमश्विनावधत्तम् ।**
**युवं कण्वायापिरिप्ताय चक्षुः प्रत्यधत्तं सुष्टुतिं जुजुषाणा ॥**

युव + + + [4]त्रयेऽवनीताय तप्तमग्निमवारयेथाम् । अपिचात्रये तस्मै रसमन्नं च तत्राधत्तमश्विनौ । युवां कण्वायाधीरिप्तायन्निहिताय[5] चक्षुः वीणायाः[6] ॥

[1] Read युवतिर्जुष्टी.

[2] After वाम and before वपुषो some space for 3 letters left blank. Only the letter श्वा really left off. Read वामश्वा वपुषो.

[3] Read वपुष्मन्तः

[4] Space for 3 letters left blank between युव and त्रये. Read युवम् । युवमत्रये.

[5] Read कण्वायापिरिप्ताय निहिताय.

[6] The last Pāda is left off. This word has no relevancy in the context, unless it is a part of the story.

युवमत्रये प्रक्षिप्ताय तप्तमग्निं प्रति रसमन्नं च दत्तवन्तौ । युवां कण्वाय चासुरैः हर्म्ये कुडये लिप्ताय आदित्योदयज्ञाननिमित्तं चक्षुः प्रत्यधत्तं तस्य सुष्टुतिं सेवमानौ ॥ (७)

**युवं धेनुं शयवे नाधितायापिन्वतमश्विना पूर्व्याय ।**
**अमुञ्चतं वर्तिकामंहसो निः प्रति जङ्घां विश्पलाया अधत्तम् ॥**

स्पष्टोत्तरा । नाधितो याचमानः ॥

युवां धेनुं शयवे याचमानायाधुक्षतमश्विनौ प्रत्नाय । निरमुञ्चतं च वर्तिकामाहन्तुर्वृकात् । प्रत्यधत्तं च जङ्घां विश्पलायाः ॥ (८)

**युवं श्वेतं पेदव इन्द्रजूतमहिहनमश्विनादत्तमश्वम् ।**
**जोहूत्रमर्यो अभिभूतिमुग्रं सहस्रसां वृषणं वीड्वङ्गम् ॥**

युवम् । युवां श्वेतं पेदवे राज्ञे युवाभ्यामिन्द्रेण दत्तं शत्रुहणं अश्विमनावदत्तम्[1] । आभ्यातव्यं[2] अर्योऽरेरभिभावुकं[3] उद्गूर्णं सहस्रसंभक्तारं युवानं दृढाङ्गम् ॥

युवां श्वेतवर्णं पेदवे राज्ञे इन्द्रेण प्रेरितं शत्रूणां हन्तारमश्वं अश्विनावदत्तं अरेरर्थं संग्रामेष्वाह्वातव्यं अभिभवितारं अप्रसह्यं सहस्रधनस्य संभक्तारं कामानां वर्षितारं दृढाङ्गम् ॥ (९)

**ता वां नरा स्ववसे सुजाता हवामहे अश्विना नाधमानाः ।**
**आ न उप वसुमता रथेन गिरो जुषाणा सुविताय यातम् ॥**

[1] Read अश्विनावदत्तम् . The word अश्व omitted.

[2] Read आह्वातव्यं.

[3] After अ the line ends and र्यो starts the next and last line nearly three inches from margin as the leaf is narrow.

स्पष्ट उत्तरो द्वृचः[1] । सुवितमिति सुखनाम ॥

तौ वां रक्षार्थं शोभनजातौ सुष्ठु ह्वामहे अश्विनौ याचमानाः । आगच्छतमस्मान् धनवता रथेन स्तुतीः सेवमानौ अभ्युदयार्थम् ॥ (१०)

**आ श्येनस्य जवसा नूतनेनास्मे यातं नासत्या सजोषाः ।**
**हवे हि वामश्विना रातहव्यः शश्वत्तमाया उषसो व्युष्टौ ॥**

श्येनस्य जवसेत्यौपमिकमति[2] ॥

आयातं श्येनस्य वेगेन नूतनेनास्मान् प्रति नासत्यौ सहितौ । आह्वयामि हि वामश्विनौ दत्तहविष्को नित्याया उषसो व्युच्छने ॥ (११)

---

**आ वां रथं पुरुमायं मनोजुवं जीराश्वं यज्ञियं जीवसे हुवे ।**
**सहस्रकेतुं वनिनं शतद्वसुं श्रुष्टीवानं वरिवोधामभि प्रयः ॥**

आ वाम् । आहुवे वां रथं पुरुमायं[3] बह्वार्यं बहुकर्माणं वा मनोवेगं क्षिप्राश्वं यज्ञेषु गन्तारं जीवनार्थम् । सहस्रकेतुमनेकध्वजमनेककर्माणं वा । वनिनमुदकवन्तम् । शतद्वसुं बहुवितम्[4] । तकार उपजनः । श्रुष्टिवानं क्षिप्रम् । यद्वा सुखवन्तम । धनप्रदं अभि प्रयो हविरिदं प्रति हुवे इति ॥

[1] Verses 10 and 11.
[2] Here there is no figure to mark the end of the sūkta.
[3] Folio 85*a* ends with पु.
[4] Read बहुवित्तम्.

युवयो रथं बहुप्रकारनिर्माणं मनोवेगं क्षिप्राश्वं यज्ञार्हं जीवनायाहमाहुवे अनेककेतुमालाकृतानेकक्षुद्रकेतुं भजनवन्तं बहुधनं क्षिप्रवन्तं क्षिप्रमेव स्तोतृणामभिगन्तारं धनस्य दातारं हविर्लक्षणमन्नं प्रति ॥ (१)

**ऊर्ध्वा धीतिः प्रत्यस्य प्रयामन्यधायि शस्मन्त्समयन्त आ दिशः ।**
**स्वदामि घर्मं प्रति यन्त्यूतय आ वामूर्जानी रथमश्विनारुहत् ॥**

ऊर्ध्वा । ऊर्ध्वो[1] धीतिरुन्मुखा मम बुद्धिः प्रतिधीयतेऽश्विनौ श्शंसने[2]ऽस्य रथस्य प्रयाणे । संगच्छन्ते वदिशः[3] । आकारः समुच्चये । दिशः स्तुतयो देष्टव्याः[4] । स्वदाम्यभिष्टौमि घर्मम् । प्रतिगच्छन्ति च व्यर्ममूतयोरत्विजः[5] । चतुर्थेन पादेन एकां स्तुतिं करोति । आहरुहत्[6] युवयो रथमूर्जानी सूर्येति ॥

भवतो रथस्य गमने मदीया वाक् ऊर्ध्वा प्रत्यधायि । अन्तरिक्षे निहिता इत्यर्थः । तथा गते सति मया शंसने क्रियमाणे सर्वा दिशः तच्छ्रवणार्थं संगता आसन् । तत्राहमाश्विनं घर्माख्यं हविः स्तोत्रे स्वदयामि । मरुतश्च तच्छ्रवणार्थं प्रतियन्ति । तमिमं भवतो रथं ऊर्जानी नाम सूर्यस्य दुहिता पुरारूढवती ॥ (२)

**सं यन्मिथः पस्पृधानासो अग्मत शुभे मखा अमिता जायवो रणे ।**
**युवोरह प्रवणे चेकिते रथो यदश्विना वहथः सूरिमा वरम् ॥**

संयत् । संगच्छते यथा मिथः स्पर्धमानाः शुभे धनार्थम् । मखा

[1] Read ऊर्ध्वा.
[2] Read शंसने.
[3] Read only दिशः or सर्वा दिशः
[4] Better read द्रष्टव्याः
[5] Read घर्मं ऊतय ऋत्विजः
[6] Read आरुहत्.

यष्टारोऽमिता बहवो जायवो मनुष्याः संग्रामे । तदा युवयो रथे भूम्यां ज्ञायते येन रथौश्विनौ[1] सूरिं प्रति धनमाहरयः[2] ॥

मिथो यदा कल्याणे युद्धे परस्परं स्पर्धमाना दातारो बहवो यज्ञशीला यजमाना जयशीला मिथः समगमत तदानीं युवयोरेव रथो युद्धाग्रे दृश्यते । यद्युवामश्विनावभि वरिष्ठं सुवीर्यं च तमावहथः तत्र रथम् ॥ (३)

**युवं भुज्युं भुरमाणं विभिर्गतं स्वयुक्तिभिर्निवहन्ता पितृभ्य आ ।**
**यासिष्टं वर्तिर्वृषणा विजेन्यं१ दिवोदासाय महि चेति वामवः ॥**

युवम् । युवां भुज्युमश्वैर्भ्रियमाणं समुद्रे गतं स्वयमेव युज्यमानैर्निवहन्तौ पितृभ्य आ । यस्मिन् देशे पितरस्तुग्रादय आसते । तापन्निवहन्तौ[3] इत्याकारार्थः । विजेन्यमिति दूरस्थमाह । दूरस्थितं तुग्रस्य वर्तिं गृहमयातम् । दिवोदासाय कृतं पुनर्महत् ज्ञायते युवयोरवः ॥

युवां भुज्युं समुद्रमध्ये ह्रियमाणमश्वैः स्वयमेव युज्यमानैः समुद्रे गतं समुद्रमध्यात् पितॄणां दर्शनार्थं तिर आ निवहन्तौ । आगतौ च वर्तिः वृकेण गृहीतं विजेतव्यं वृकात् । दिवोदासविषये च महत् ज्ञायते युवयोः पालनम् ॥ (४)

**युवोरश्विना वपुषे युवायुजं रथं वाणी येमतुरस्य शर्ध्यम् ।**
**आ वां पतित्वं सख्याय जग्मुषी योषावृणीत जेन्या युवां पती ॥**

युवोः । युवोरश्विना वपुषो[4] शोभनार्थं युवाभ्यां युज्यमानं रथम् ।

[1] Read रथेनाश्विनौ.

[2] Perhaps to read धनमावहथः

[3] Read तावन्निवहन्तौ. Difference between व and प is very slight ; here this is distinctly प and not at all व.

[4] Read वपुषे.

वाणी वातेः । गन्तारावश्वौ येमतुः । अस्य रथस्य यच्छर्द्धं प्राप्यम् । काष्ठां प्रतिनित्यन्यतुरित्यर्थः[1] । आवृणीत युवयोः पतित्वं संख्यार्थे[2] गच्छन्ती योषा सूर्या जेन्या जाया । यदिवर्जेतव्या[3] । युवामेवप[4] ॥

युवयोरश्विनौ शोभार्थं युवाभ्यां युक्तं रथं शब्दकारिण्यौ बडवे गच्छतोऽस्य शर्धेन प्राप्तव्यां काष्ठाम् । युवयोः पतित्वं युवाभ्यां सख्यसिद्ध्यर्थं जग्मुषी सूर्यस्य दुहितावृणीत युवां पती स्वयंवरे जेतारौ ॥ (५)

**युवं रेभं परिषूतेरुरुष्यथो हिमेन घर्मं परितप्तमत्रये ।**
**युवं शयोरवसं पिप्यथुर्गवि प्र दीर्घेण वन्दनस्तार्यायुषा ॥**

युवम् युवां रेफं परिषूतेरुपद्रवान्[5] । अपिवा[6] द्रक्षथुम[7] । हिमेन सममवारयेथां[8] परितप्तमत्रये । युवां शयोरवसं क्षीरमपिप्यथुर्गवि । युवाभ्यां जीर्णो वन्दनो दीर्घेणायुषा वर्धितः ॥

युवां रेफमुदकेन परिषूतं ततो रक्षितवन्तौ । तथा सर्वतः तप्तमग्निं अत्रये शीतेन वृष्ट्युदकेन शमितवन्तौ । युवां शयोर्ऋषेर्गवि पयोलक्षणमवसमन्नं आप्यायितवन्तौ । कूपे पतितो वन्दनो दीर्घेणायुषा दत्तेन कूपाद्युवाभ्यामुत्तारितः ॥ (६)

[1] Read प्रतिनिन्यतुरित्यर्थः

[2] Read सख्यार्थं.

[3] Read यदिवा जेतव्या.

[4] Read युवामेव पती.

[5] Read परिषूतेरुपद्रवात्.

[6] This word does not seem wanted; or an alternative meaning is missing.

[7] Read ररक्षथुः

[8] Read घर्मंवारयेथां.

**युवं वन्दनं निर्ऋतं जरण्यया रथं न दस्रा करणा समिन्वथः ।**
**क्षेत्रादा विप्रं जनथो विपन्यया प्र वामत्र विधते दंसना भुवत् ॥**

युवम् । युवां वन्दनं विशिष्टाङ्गं[1] जरया रथमिव जीर्णो[2] दस्रौ करणा कर्मणां कर्तारेण[3] शिल्पकुशलौ समिन्वथः । समयत्तकर्म[4] चेत् करणमाद्युदात्तम् । तदिन्नु ते करणम्[5] इति । क्षेत्रादा मातुरुदरात् विप्रं वामदेवं जनयतं स्तुत्या । कक्षीवान् विप्र इत्यपरम् । प्राभवच्चास्मै परिचरते युवयोर्दसनाकर्म काणात्मकमिति[6] ॥

युवं वन्दनं निर्गतं जरया युवत्वात् पुनरपि जीर्णं रथमिव दर्शनीयौ चक्षुरादिभिः संपूरितवन्तौ । तस्यर्षेः पुत्रमिच्छतो भार्यायाः पुत्रं मेधाविनं आजनयथो यौवनप्रदानेन तस्य स्तुत्या प्रीतौ । युवयोः कर्म परिचरते वन्दनायास्मिन् अभ्युदये प्राभवत् ॥ (७)

**अगच्छतं कृपमाणं परावति पितुः स्वस्य त्यजसा निबाधितम् ।**
**स्वर्वतीरित ऊतीर्युवोरह चित्रा अभीके अभवन्नभिष्टयः ॥**

अगच्छतम् । अगच्छतं स्तुवन्त[7] दूरे देशे पितुः स्वस्य ग्रस्य[8] त्यागेन बाधितम् । स्वर्वत्यो व्याप्तिमत्यो वा युवयोरेव भवन्तीत्यतः[9] ।

[1] Read विश्लिष्टाङ्गं.

[2] This word seems unwanted; read जीर्णं if wanted.

[3] Read कर्तारौ.

[4] Perhaps to read संयुक्तकर्म.

[5] R. V. 5. 31. 7. Folio 85*b* ends with त in तदिन्नु.

[6] Read करणात्मकमिति.

[7] Read स्तुवन्तं. The letter स्तु mostly worm-eaten.

[8] Read तुग्रस्य.

[9] Read भवन्तीत्यर्थः

इतो मुख्यजातय: । तदेवाह । चित्रा इति । चायनीया: समीपे भवन्ति नृणामभ्येषणीया ऊतस्य इति ॥

अगच्छतं स्तुवन्तं दूरे स्थितं पितुरात्मीयस्य त्यागेन निबाधितमृज्राश्वम् । अभ्युदयवत्य ऊतयो युववयोरेवात्र भवन्ति । चित्राणि चाभ्येषणानि अन्तिके भवन्ति ॥ (८)

**उत स्या वां मधुमन्मक्षिकारपन्मदे सोमस्यौशिजो हुवन्यति ।**
**युवं दधीचो मन आ विवासथोऽथा शिरः प्रति वामश्व्यं वदत् ॥**

उत । अपिचैषां मधुमत् मधुमन्तौ मक्षिका स्कौत्[1] मधुकामा: । वां सोमस्य मदे औशिज: कक्षीवान् हुवन्यति स्तौति आह्वयति वा । युवां दधीचो मन: शुश्रूषया पर्यचरतम् । अथ तस्य रश्व्यं[2] शिरो वां मधु प्रत्यवदत् ॥

अपिच सा वां मक्षिका जाति: रसवन्मधु याचितवती । युवयो: सोमस्य मदे सति औशिजश्च वां आह्वयति कक्षीवान् । युवां दधीच ऋषे: मधुप्रदानार्थं मन आराधितवन्तौ । ततो भवद्भ्यां प्रतिनिहितं अश्व्यं तच्छिरो ब्रह्म प्रत्यवदत् ॥ (९)

**युवं पेद्वे पुरुवारमश्विना स्पृधां श्वेतं तरुतारं दुवस्यथः ।**
**शर्यैरभिद्युं पृतनासु दुष्टरं चर्कृत्यमिन्द्रमिव चर्षणीसहम् ॥**

युवम् । युवां पेदधे[3] बहुभिर्वरणीयमश्विनौ स्पृधां स्पर्धमानानां

[1] Perhaps to read अरपत्.

[2] Read अश्व्यं.

[3] Read पेद्वे.

तारकं श्वेतमश्व[1] ददथुः । शर्यः[2] शृणोतेर्योद्धारः[3] । तैः पृतनासु दुष्टरमभिगतदीप्तिं चकृत्यं[4] कार्येषु पुनः पुनः प्रयोज्यं इन्द्रमिव चर्षिणीनां[5] अभिभवितारमिति[6] ॥

युवां पेदवे राज्ञे बहुभिर्वरणीयं अश्विनौ शत्रूणां तारकं श्वेतमश्वं अदत्तं विशरणकुशलैः संग्रामेषु तरितुं शक्यं अभिगतदीप्तिं संग्रामेषु पुनः पुनः प्रयोज्यं इन्द्रमिव शत्रूणामभिभवितारम् ॥ (१०)

---

का राधद्धोत्राश्विना वां को वां जोष उभयोः ।
कथा विधात्यप्रचेताः ॥

का रायत्[7] । का राधयति होत्रा वागश्विनौ वाम् । कश्च नः स्तोता युवयोरुभयोर्जोषे जोषणे भवति । केन वा प्रकारेण वां परिचरत्यज्ञः ॥

कीदृशी वाक् युवामाराधयत्यश्विनौ । को वा स्तोता युवयोरुभयोः पर्याप्त्यर्थं भवति । केन वा प्रकारेण वामज्ञः परिचरति ॥ (१)

[1] Read श्वेतमश्वं.

[2] Better read शर्याः

[3] Perhaps to read शृणातेर्योद्धारः

[4] Read चर्कृत्यं.

[5] Read चर्षणीनां.

[6] Here there is the figure 7 to mark the end of the sūkta.

[7] Read का राधत् । In the manuscript कारा is written together and यत separately.

**वि॒द्वांसा॒वि॒द्दुरः॑ पृच्छे॒दवि॑द्वा॒नि॒त्थाप॑रो अ॒चे॒ताः ।**
**नू चि॒न्नु मर्ते॒ अक्रौ॑ ॥**

विद्वांसौ । का राधदिति कृतः प्रश्नो युक्त एवेति वदति । विद्वांसावेवानौ[1] दुरौ[2] द्वाराणि प्रकारान् पृष्ठमर्हति[3] । अविद्वानित्थमन्यश्चेतोरहितः । ताविमौ क्षिप्रमेव मर्ते स्तोतरि सन्निधत्तः अक्रौ अनाक्रान्तौ बलिभिः ॥

विद्वांसावेव द्वाराणि प्रष्टुमर्हति । अविद्वानित्थमन्यश्चेतोवर्जितः । क्षिप्रमेव मर्त्येष्वनाक्रान्तौ ॥ (२)

**ता वि॒द्वांसा॑ हवामहे वा॒ं ता नो॑ वि॒द्वांसा॒ मन्म॑ वोचेतम॒द्य ।**
**प्रार्चे॒द्दय॑मानो यु॒वाकुः॑ ॥**

ता विद्वांसा[4] । तौ विद्वांसौ हवामहे वाम् । तौ मह्यं विद्वांसौ मन्म मनीयंव्यं[5] वोचेतमद्य । प्रार्चत् प्रास्तौद्वां दयमनौ[6] हविः प्रयच्छन् युवां कामयमानः कक्षीवानिति ॥

तौ विद्वांसौ हवामहे वाम् । तावस्माकं विद्वांसावभिलषितं वाचा वोचेतमद्य । स्तौति हवींषि ददत् युष्मत्कामः कक्षीवान् ॥ (३)

[1] Perhaps to read विद्वांसावेवाश्विनौ. But there is no अश्विनौ in the text. On read only विद्वांसावेव.

[2] Read दुरो.

[3] Read प्रष्टुमर्हति.

[4] The आ mark in ता and वि worm-eaten. Only the इ mark of वि is seen after त. The space is not enough for the 2 letters. So what was written might have been त विद्वांसा or तद्विद्वांसा.

[5] Read मननीयं or मन्तव्यं.

[6] Read दयमानो.

**वि पृ॑च्छामि पा॒क्या॒३॑ न दे॒वान् वष॑ट्कृतस्याद्भु॒तस्य॑ दस्रा ।**
**पा॒तं च॒ सह्य॑सो यु॒वं च॒ रभ्य॑सो नः ॥**

वि पृच्छामि । पाक्या पक्तव्यप्रज्ञानन्यान् देवंनाहं[1] विपृछामि । युवामेव पृच्छामि । तौ युवां षट्कृतस्याद्भुतस्य[2] महतः सोमस्य दस्रौ । पीतं[3] च सहीयसोऽभिभवितुः सोमस्य । पीतसोमेन च युवां रभीयसोऽस्मान् कुरुतमिति ॥

पक्तव्यप्रज्ञो विद्वानहं भूत्वा वषट्कृतस्य महतः सोमस्य पानार्थं नान्यान् देवान् विपृच्छामि । युवामेव मदीयं सोमं सहीयांसं पिबतम । कृणुतं चास्मान् वेगवतः ॥ (४)

**प्र या घोषे॒ भृग॑वाणे॒ न शो॒भे यया॑ वा॒चा यज॑ति पज्रि॒यो वा॑म् ।**
**प्रैषयु॒र्न वि॒द्वान् ॥**

प्र या । प्रभवति सा वाक या वाक् घोषे घोषायाः[4] पुत्रे सुभस्त्ये[5] भृगवाणेन भृगौ च शोभे शुभे । यया वाचा यजति वज्रियः कक्षीवान् वाम् । प्रभवत्वन्नकामश्च कक्षीवानिति ॥

घोषो नाम ऋषिः । तस्मिन् या वाक् भृगौ च प्रकर्षेण शुशुभे युष्मत्स्तुतिभूता च या तादृश्या वाचा पज्रकुले जातः कक्षीवान् इदानीमन्नकामः प्रभवतु ॥ (५)

[1] Read देवान् नाहं.

[2] Read वषट्कृतस्याद्भुतस्य.

[3] Read पातं.

[4] Folio 86*a* ends here.

[5] Perhaps to read सुहस्त्ये..

**श्रुतं गा॑य॒त्रं तक॑वानस्या॒हं चि॒द्धि रि॒रेभा॑श्विना वाम् ।**
**आक्षी शु॑भस्पती॒ दन् ॥**

श्रुतम् । शृणुतं गायत्रं स्तोत्रं तकवानस्य स्खलितगतेः[1] ऋज्राश्वस्यान्धस्य । स ह्यहमिव तुष्टावश्विनौ[2] वाम् । आददानोऽक्षिणी भवद्भ्यां शुभस्पती ॥

शृणुतं गायत्रं साम अन्धत्वात् स्खलितं गच्छत ऋज्राश्वस्य । स ह्यहमिव वामश्विनौ तुष्टाव अक्षी आददानो भवद्भ्यां शुभस्पती ॥ (६)

**यु॒वं ह्यास्तं॑ म॒हो रन् यु॒वं॑ वा॒ यन्नि॒रत॑तंसतम् ।**
**ता नो॑ वसू सु॒गो॒पा स्या॑तं पा॒तं नो॒ वृका॑दघा॒योः ॥**

युवम् । युवां ह्यास्तं महो महतो धनस्य रन् दातारौ । युवरवा[3] युवामेवास्तं यदि कश्चनाढ्यं धनानि रततंसतं[4] निरगमयतम् । विनाशकावपि युवामेवेत्यर्थः । तौ नौ वासवितारौ[5] सुगोपौ स्याताम् । रक्षतं चास्मान्नृकात्[6] स्तेनादव्यमिच्छतः[7] ॥

युवं ह्यास्तमाढ्यस्य महतो धनस्य दातारौ । युवामेव यदि किंचन निरततंसतम् । तसिरुपक्षयकर्मा । आढ्यं दरिद्रं च पुरुषं कुरुतः । तौ नो वासयितारौ सुगोप्तारौ भवतम् । रक्षतं चास्मान् स्तेनादघमिच्छतः ॥ (७)

[1] What is written is सख separately.

[2] After स the entire portion is badly worm-eaten. Conjectured from the bits that are available.

[3] Read युवं वा.

[4] Read निरततंसतं.

[5] Read वासयितारौ.

[6] Read चस्मान् वृकात्.

[7] Read स्तेनादघमिच्छत:

**मा कस्मैं धातमभ्यमित्रिणें नो माकुत्रा नो गृहेभ्यों धेनवों गुः ।**
**स्तनाभुजो अशिश्वीः ॥**

मा कस्मै । कस्मैचिदमित्रिणे सपत्नाशायामाभिदातं[1] अस्मान् । मा गमनकुत्र[2] अप्रज्ञाते देशे अस्माकं गृहेभ्यो धेवा[3] । स्तनै रक्षन्त्यो वत्सान् मनुष्यांश्च । अशिश्वीः वत्सरहिताः । यद्वा हेष्यशयनाः[4] ॥

मास्मान् कस्मैचित् मैत्रीवर्जितायाभिदत्तम् । मा चास्मद्गृहेभ्यो धेनवोऽप्रज्ञाते देशे गमन् स्तनं वत्सान् भोजयन्त्यः । स्तनैर्वा अस्मान् रक्षन्त्यः । शिशुवर्जिता वत्सानपहाय मा गमन् ॥ (८)

**दुहीयन् मित्रधितये युवाकु राये चं नो मिमीतं वाजवत्यै ।**
**इषे चं नो मिमीतं धेनुमत्यैं ॥**

दुहीयन् । दुहति मित्राणां धारणार्थं युवाकवो धनानि । तथा सति धनाय नः कुरुतम् बलयुतोय[5] । अनाय[6] च नः कुरुत + + + तय[7] ॥

युष्मत्कामा मित्रधारणार्थं कामात् युवां दुहीयन् । तथा सति धनाय बलवतेऽस्मान् कुरुतम् । तथा धेनुयुक्ताय चान्नाय कुरुतम् ॥ (९)

[1] Read सपत्नायाभिदत्तं.

[2] Read गमन् अकुत्र.

[3] Read धेनवः

[4] This word not clear. Perhaps गृहेष्वशयानाः

[5] Read बलयुक्ताय.

[6] Read अन्नाय.

[7] After कुरुत two letters worm-eaten. ए mark of the next is in tact. The one after that must have उ following. Read कुरुतं धेनुयुक्ताय.

**अश्विनोरसनं रथमनश्वं वाजिनीवतोः ।**
**तेनाहं भूरि चाकन ॥**

अश्विनोः । अश्विनोरश्वरहितं रथमहं अधनं[1] अभजं अन्नवतोः । तेन रथेनाहं भूरि चाकश्चेतिकामनार्थमिति[2] ॥

अश्विनोरभजं रथमश्वरहितं अन्नवतोः । तेनाहं बहु कामये ॥ (१०)

**अयं समह मा तनूह्याते जनाँ अनु ।**
**सोमपेयं सुखो रथः ॥**

अयम् । अयं रथस्समहं सधनं[3] तनु मां कुर्वाढ्यम् । यद्वा अयतेरय[4] । अभिगतव्यं[5] आढ्यम् । सोऽथ रथोऽश्विभ्यामूह्यते जनेषु सोमपेयं प्रति सुख इति ॥

अयं त्वं स्तुतियुक्त रथ मां विस्तीर्णं कुरु । सोऽयमूह्यतेऽश्विभ्यां जनेषु । सोमयेयं प्रति सुखकरो रथः ॥ (११)

**अध स्वप्नस्य निर्विदेऽभुञ्जतश्च रेवतः ।**
**उभा ता बस्रि नश्यतः ॥**

अध । प्रसङ्गात् कदर्यो निन्द्यते । सम्प्रत्यहं रात्रौ दृष्टस्य स्वप्नस्य निर्विदे तथा परानरक्षतः आढ्यस्य च । कर्मणि षष्ठ्यौ । उभावपि तौ

[1] Read असनं.
[2] Perhaps to read चाकन इति कामनार्थं इति.
[3] In the text समह is vocative.
[4] Read अयतेरयम् .
[5] Read अभिगन्तव्यं.

क्षिप्र[1] नश्यतः इति । स्वप्नदृष्टार्थाः प्रन्तर्न[2] दृश्यन्ते । अभुञ्जतश्च धनानि क्षिप्रं नश्यन्तीति[3] ॥

भिक्षमाणः कक्षीवान् अलभमानो धनं कदर्यं निन्दति । अथ स्वप्नस्याहं रात्रौ दृष्टस्य प्रातरदृश्यमानार्थस्य आश्रितानरक्षतः कदर्यतया वा अभुञ्जानस्य धनवतश्च निर्विदे तावुभावपि क्षिप्रं नश्यतः । इति निर्वेदः ॥ (१२)

---

**कदि॒त्था नॄँः पात्रं॑ देवय॒तां श्रव॒द्गिरो॒ अङ्गि॑रसां तु॒रण्य॑न् ।**
**प्र यदान॒ड्विश॒ आ ह॒र्म्यस्यो॒रु क्रं॑सते अध्व॒रे यज॑त्रः ॥**

कदित्था । तदिदमैन्द्रं सूक्तम् । कदेत्थं प्रयुज्यमानाः । नापात्रमिति[4] नृणां पातारमिन्द्रमाह । देवयतामस्माकं शृणुयात् स्तुतीः अङ्गिरसां तुरण्यन् प्रेरय धनम्[5] । प्राप्नोति यदा विशः ऋत्विजः स्तोतॄनिन्द्रः हर्म्यस्य गृहस्थस्य यजमानस्या[6] तदाग्नीमुरुकक्रंसते[7] शीघ्रं क्रमामत्यध्वरे[8] यष्टव्यः ॥

देवानिच्छतामङ्गिरसामस्माकमित्थं प्रवृत्ता स्तुतीरिन्द्रः कदा शृणोति आश्रितान् वा तान् नॄन् क्षिप्रकारी । यदा कामानामाहरणशीलस्येन्द्रस्य यजमानो

[1] Read क्षिप्रं.

[2] Read प्रातर्न.

[3] Here there is the figure 8 to mark the end of the sūkta.

[4] The text is नॄः पात्रं. Perhaps to read so.

[5] Read प्रेरयन् धनम्. After य only the second half of ध is seen; the first half is worm-eaten. There is no न्.

[6] Read यजमानस्य.

[7] Read तदानीमुरुक्रंसते.

[8] Read क्रामत्यध्वरे. The letter त्य looks more like न्य.

विश ऋत्विजः प्रकर्षेण व्याप्नोति ततोऽसाविन्द्रस्तस्य यज्ञे गन्तुं विस्तीर्णमवकाशं क्रमते यज्ञेषु यष्टव्यः ॥ (१)

**स्तम्भीद्ध द्यां स धरुणं प्रुषायदृभुर्वाजाय द्रविणं नरो गोः ।**
**अनु स्वजां महिषश्चक्षत व्रां मेनामश्वस्य परि मातरं गोः ॥**

स्तम्भीत् । स्तभ्नाति द्याम् । स उदकं च प्रेरयति । ऋभुर्दीप्तो वाजाय द्रविणं[1] बलार्थं द्रविणी यो हि गन्तव्यो[2] नरो नेता प्रदाता गोः । अनुपश्यति महान् स्वजां दुहितरं प्रामुषसमनूदेति[3] । रात्रिरत्र व्रा इति निरुक्तम्[4] । मेनामश्वस्य बडवां गोममातरं[5] परिकरोति । परिरन्यथाभावार्थः । इच्छन्नयं स्वभावान्यथाकरणेनाश्वायां गामुत्पादयतीत्यर्थः । इदं सु मे अजरितराचि अग्धीति[6] स्वयं चन्द्रो ब्रूते[7] इति ॥

द्यां तस्तम्भ । उदकं च स वर्षार्थं रश्मिभिर्दहति महान् हविषेन्द्रवत् स्तोतुर्भवति नेता गोरुदकस्य रश्मेर्वा । स्वजातामुषसं महाननुपश्यति । व्रा इत्युषोनाम शाकपूणिपठितम् । अश्वस्य निर्मात्रीं जनयित्रीमुषसं स्त्रियं रश्मेर्मातरं पर्यकरोत् ॥ (२)

**नक्षद्धवमरुणीः पूर्व्यं राट् तुरो विशामङ्गिरसामनु द्यून् ।**
**तक्षद्वज्रं नियुतं तस्तम्भद्द्यां चतुष्पदे नर्याय द्विपादे ॥**

[1] Folio 86*b* ends here.

[2] Passage not quite clear.

[3] Read व्रा for प्रा. It is distinctly written as प्र.

[4] व्राः occurs in N. only in 5. 38. मृगं न व्रा मृगयन्ते । मृगमिव व्रात्याः प्रैषाः. The present passage is not in N.

[5] Read गोर्मातरं. If it is र्म, there should be a dot between the 2 म.

[6] R. V. 10. 28. 4. Read इदं सु मे जरितरा चिकिद्धि इति. The letters अ and ग्धी very indistinct.

[7] This is a dialogue of Candra and Vasukra.

नक्षत् । प्राप्नोति ह्वानं स्तोतॄणामरुणीरुषसो राट् राजन् । पूर्वमिति ह्वानविशेषणम् । पूर्वैः प्रयुक्तम् । पूर्वं तुरो धनस्य प्रेरकः । विशामङ्गिरसामिति समानाधिकरणम् । अनुद्यूनन्वहम् । करोति च वज्रं हन्तव्येन घंयुक्तम्[1] । तस्तंभदिति चेद्भन्तं[2] शत्रन्तं वा । स्तभ्नोति दिवं नृहिताय चतुष्पदे द्विपदे च । तदर्थमिति ॥

उषसो राजयन् मुख्यं स्तोत्रं व्याप्नोति क्षिप्रोऽङ्गिरसां विशां स्वभूतं दिवसेषु । करोति च वज्रं नितरां पृथग्भावयितारम् । तथा मनुष्यहिताय गवादिकाय द्यामुपर्यस्तभ्नात् द्विपदे च यथासुखं स्थातुम् ॥ (३)

**अस्य मदे स्वर्यं दा ऋतायापीवृतमुस्रियाणामनीकम् ।**
**यद्ध प्रसर्गे त्रिककुम्निवर्तदप द्रुहो मानुषस्य दुरो वः ॥**

अस्य । अस्य सोमस्य मदे स्वर्यं स्तुत्यं दा यज्ञार्थमङ्गिरोभ्योऽपिवृतं गूढं गवामनीकम् । यद्ध प्रसर्गे युद्धे । अन्तोदात्तो वृष्टिवचनः । अपां प्रसर्गे यत् इति[3] । त्रिककुप् त्रिषु लोकेषूच्छ्रित इन्द्रो निवर्तेत तदानीं दोग्धुर्मानुषस्य द्वाराण्यपवृणोति । स याभिः रक्षाभिः परिवृतः तानि द्वाराणीति ॥

अस्य सान्नाय्यस्य मदे स्वरणकुशलम् । शब्दायन्ते हि गावो वत्सदर्शने । स्वर्यं दाः परिवृतं गवामनीकम । यदि हि मानुषस्योद्योगेषु युद्धप्रारम्भे त्रिष्वभिजनविद्याशौर्येषु त्रिषु वा लोकेषु उच्छ्रित इन्द्रो निवर्तते ततोऽस्मै द्रोग्धॄणि द्वाराणि अपावृणोति ॥ (४)

[1] Perhaps to read संयुक्तम्.

[2] Is it तिबन्तं or तिङन्तं?

[3] R. V. 7. 103. 4.

तुभ्यं॒ पयो॒ यत् पि॒तरा॒वनी॑तां॒ राधः॑ सु॒रेत॑स्तु॒रणे॑ भुर॒ण्यू ।
शुचि॒ यत्ते॒ रेक्ण॒ आय॑जन्त सब॒र्दुघा॑याः॒ पय॑ उ॒स्रिया॑याः ॥

तुभ्यम् । तुभ्यमानीय सारं रोदसी यदा अनीता[1] राधकं[2] शोभनरेतस्कम् । हविषो हि जगदुत्पत्तिः । तरणे[3] क्षिप्रकारणे[4] भरन्त्यौ । यदा च ताभ्यां गोष्वानीतं शुचि रेणः[5] शुद्धं दुग्धम् । अपिवा शुद्धं रेतः । पयोभि[6] रेत आपाययच्छन्[7] क्षीरदुघाया उस्रायायाः[8] तदानीमप द्रुहो मानुषस्य दुरो वरिति[9] ॥

त्वदर्थमात्मीयं सारं यदा द्यावापृथिवी नयतः शोभनवर्षणादिरेतस्कं धनं क्षिप्रकारिणे तुभ्यं भरणशीले । यदा च तद्गोषु पयोरूपेण परिणतं यजमाना अमृतदुघाया उस्रियाया गोः पयोलक्षणं शुचि धनं तदायजन्त प्रायच्छन् अस्य सान्नाय्यस्य मदे ॥ (५)

अध॒ प्र ज॑ज्ञे त॒रणि॑र्ममत्तु॒ प्र रो॑च्य॒स्या उ॒षसो॒ न सूरः॑ ।
इन्दु॒र्येभि॒राष्ट॒ स्वेदु॑हव्यैः स्रु॒वेण॑ सि॒ञ्चञ्जर॒णाभि धाम॑ ॥

अथ॰ । सप्रत्ययं[10] यं जातस्तरणिरस्मान् ममत्तु[11] । प्ररोचते

[1] Read अनीतां.

[2] The text is राधः

[3] Read तुरणे.

[4] Read क्षिप्रकरणे.

[5] Read रेक्णः

[6] Read पयोभिः

[7] Read आयच्छन्.

[8] Read उस्रियायाः. The second याः mostly worm-eaten.

[9] This is in the previous verse.

[10] Read संप्रत्ययं.

[11] After मम space left blank. The letter is replaced by me.

सोऽयमस्या उषसः सूर्य इवेन्द्रः । इन्दुर्यैरस्माभिः पीत आसीत् स्वभूतदीप्तहविष्कैः स्रुवेण सिच्यमानः जरणा जरणीयः स्तोतव्योऽभिधामाहवनीयं प्रति । तानस्मा[1] ममत्त्विति ॥

अथ प्रादुरभूत् स तरणिः । अस्मात् ममत्तु सोऽसावस्या उषसः सूर्य इव तेजसा । प्रकर्षेण दीप्यते सोमो यैः पीतः स्वभूतः समिद्धहव्यैः सखिभिर्यजमानैर्ग्रहचमसादिना स्रुवेण साधनेन स्तुत्या सह आहवनीयाख्ये स्थाने सिच्यमानः तान् ममत्तु ॥ (६)

**स्विध्मा यद्वनधितिरपस्यात्सूरो अध्वरे परि रोधना गोः ।**
**यद्ध प्रभासि कृत्व्याँ अनु द्यूननर्विशे पश्विषे तुराय ॥**

स्विध्मा । इन्धते: । सुदीप्तास्या यदि वरनदीधितिः[2] वने च्छेत्तव्ये निधातव्या शस्त्रीमुपस्यात्[3] कर्म कुर्यात् तदानीं सूरः सन्नध्वर्युरध्वरे यज्ञे गोः + + प + रोधानाय[4] परिभवति । पशुमुपाकरोतीत्यर्थः । तथा यदि त्वं प्रतिभासि कर्मयोग्या दिवसानन्वादित्यभूतः तदानीं मनसा अरण्यं विशते पश्विषे पशून् प्रेरयते गोपालाय च त्वरमाणाय । + + दभिमतमिति[5] शेषः ॥

[1] Read तानस्मान्.

[2] Read वनदीधितिः

[3] Perhaps to read शस्त्री अपस्यात्.

[4] After गोः space for 2 letters left blank. Then there is प and after that there is शु with also an ए mark added to it. Perhaps to read गोः पशोः परिरोधनाय. Folio 87*a* ends with रोधना.

[5] Before दभि two letters are completely broken off. The second seems to bo ध्य. Space for a letter left blank between मि and ति, perhaps since the leaf is bad for writing.

यथा पशुविशसनाय तीक्ष्णां स्वधितिमपस्यन् यज्ञे पशुं बध्नाति एवमनुदिते त्वयि न प्रवर्तते इति समुदायार्थः । सुष्ठ दीप्ता यदि तीक्ष्णधारा स्वधितिः पशुविशसनार्थं कर्म कर्तुमिच्छति अथ प्राज्ञोऽध्वर्युर्यज्ञे गोः परिरोधनाय भवति यदि कर्मयोग्येषु दिवसेषु त्वं प्रभासि मनसा यः कार्येषु विशति यो वा पशुमिच्छति क्षिप्रकारी तयोः कार्यकरणाय भासि चेत् यज्ञे पशुं बध्नाति ॥ (७)

**अष्टा महो दिव आदो हरी इह द्युम्नासाहमभि योधान उत्सम् ।**
**हरिं यत्ते मन्दिनं दुक्षन् वृधे गोरभसमद्रिभिर्वाताप्यम् ॥**

अष्टा । पाता महतः सोमस्यावदः[1] पाययन्नवाविह[2] द्युम्नसहमन्नमभिभवन्तमुत्सं शत्रुमभिभवति युध्यन् हरिं सोमम् । यदा ते मन्दिनं दुहन्ति वर्धनाय पयोवेगं मिश्रितं भ्रावभिः[3] वाताप्यं प्राणेनाप्यम् । अपि वा वाताप्यः प्रेर्यो वातैः प्रेरणार्थादिति ॥

अन्नवर्धनमुदकमुद्दिश्य मेघं योधयानस्त्वं महतो दीप्तस्य सोमस्य पाता सोऽश्वेन यजमाने पाययसि यदा तव वर्धनाय हरितवर्णं मदकरं प्राप्तवेगं अभिषवग्रावभिर्दुहन्ति पातव्यं सोमम् । वाताप्यमित्युदकनाम ॥ (८)

**त्वमायसं प्रति वर्तयो गोर्दिवो अश्मानमुपनीतमृभ्वा ।**
**कुत्साय यत्र पुरुहूत वन्वञ्छुष्णमनन्तैः परियासि वधैः ॥**

त्वमायसम् । त्वमायसं वज्रं प्रत्यवर्तयो गोरभिगन्तुश्शुष्णस्य वधार्थं द्युलोकादुपनीतं दीप्तेन त्वष्ट्रा । कुत्साय यत्र यदा यस्मिन् वा युद्धे हिंसच्छुष्णं बहुभिरायुधैः पर्यगच्छ इति ॥

[1] Read सोमस्यादः. Between स्या and दः there is a letter partly worm-eaten; it looks like व.

[2] Read पाययन्नश्वाविह.

[3] Read ग्रावभिः

त्वमयसा निर्मितं प्रेरितवानसि गन्तुः शुष्णस्य वधार्थं स्वर्गाच्छिलासदृशं भूमिस्थाय तुभ्यं त्वष्ट्रा प्रहितेन सुधन्वनः पुत्रेण त्वष्टुः शिष्येण ऋभ्वा उपनीतम्। यदा कुत्सप्रीत्यर्थं युद्धं भजन् तच्छत्रुं शुष्णासुरं अपरिमितैः प्रहारैः परिहन्सि ॥ (९)

**पुरा यत्सूरस्तमसो अपीतेस्तमद्रिवः फलिगं हेतिमस्य ।**
**शुष्णस्य चित् परिहितं यदोजो दिवस्परि सुग्रथितं तदादः ॥**

पुरा। पुरा यदा सूर्यस्तमसः शुष्णस्यापीतेः संगमादभवन्मुक्तः तदानीं तमिन्द्रवः[1] फलिगं मेव्यरूपं[2] हेतिं हतोरं[3] अस्य निरस्तवानसि। तदेवोक्तम्। शुष्णस्य वीत्[4] सूर्यस्योपरि परिहितं यदोजं[5] तत् सुग्रथितं सूर्ये सुष्ठु सक्तं तस्मादादरिति विदारणार्थमिति ॥

पुरा यदायं सूर्यः तमसः संगमनात् मुक्तोऽभूत् तदानींतनस्य सूर्यस्य अद्रिवो मेघमाहन्तारमादः इति संबन्धः। तदेवोच्यते। शुष्णासुरस्य सूर्यनिरोधार्थं परिहितं मेघरूपं यदोजः तदादित्यतः सुग्रथितमादारितवान् ॥ (१०)

**अनु त्वा मही पाजसी अचक्रे द्यावाक्षामा मदतामिन्द्र कर्मन् ।**
**त्वं वृत्रमाशयानं सिरासु महो वज्रेण सिष्वपो वराहुम् ॥**

अनु त्वा। अनुमदतामन्वमन्येतां त्वां महत्यौ पाजसी विस्तीर्णे चङ्क्रमणवर्जिते। द्यावाक्षामा रोदसी इन्द्र कर्मणि प्रवृतम्[6]। वृत्रवधे त्वं[7]

[1] Read तमद्रिवः

[2] Read मेघरूपं.

[3] Read हन्तारं.

[4] Read चित्.

[5] Read यदोजः

[6] Read प्रवृत्तम्.

[7] त्वं is mostly worm-eaten.

वृत्रमाशयानं सिरासु सरणशीलास्त्वप्सु[1] महता वज्रेण सिस्वपः प्रस्वापयो वाहारमिति[2] ॥

इन्द्र त्वा वृत्रवधे उद्युक्तं महति बलवती चङ्क्रमणवर्जिते द्यावाभूमी अन्वमदताम् । अथ त्वं वृत्रवधमाभिमुख्येन शयानमुदकस्य निर्गमनद्वारेषु महता वज्रेण निःस्वपितवानसि वराहारम् ॥ (११)

**त्वमिन्द्र नर्यो याँ अवो नृन् तिष्ठा वातस्य सुयुजो वहिष्ठान् ।**
**यं ते काव्य उशना मन्दिनं दाद्वृत्रहणं पार्यं ततक्ष वज्रम् ॥**

त्वमिन्द्र । त्वमिन्द्र नृहितो यानवसि नेतृनश्वान् आतिष्ठ तान् वातस्य तुल्यान् सुयुजो वहिष्ठान् । यं ते वज्रमुशनाः काव्यः प्रयच्छत् मन्दिनं हर्षकरम् । परोक्षः पाद उत्तरः । तं वृत्रहणं करोति पार्थं शत्रुपारणसमर्थ[3] इन्द्र इति ॥

त्वमिन्द्र मनुष्यहितो यान् रक्षसि नेतृनश्वान् तानभितिष्ठ वातसदृशवेगान् सुष्ठु युज्यमानान् । यं च ते कविपुत्र उशना मदयितारमदात् तं स्वकाय इन्द्राय शत्रूणां हन्तारं युद्धपारगमनहेतुमकरोत् वज्रम् ॥ (१२)

**त्वं सूरो हरितो रामयो नृन् भरच्चक्रमेतशो नायमिन्द्र ।**
**प्रास्य पारं नवतिं नाव्यानामपि कर्तमवर्तयोऽयज्यून् ॥**

त्वम् । त्वं सूरो हरितोऽश्वान् रामयः उपारमयः । भरत् बृहच्चक्रं एतशश्चायमिन्द्र । प्रास्य पारं प्रति नवतिं नाव्यानां नदीनाम् । तत्र कर्तमवटमप्यवर्तयः प्रापयो यजमानानिति ॥

1 Read सरणशीलास्वप्सु.

2 Read वराहारमिति.

3 Read शत्रुपारणसमर्थ.

त्वमिन्द्र सूर्यस्याश्वान् हरितो नेतृन् उपारमयः। एतशस्य जयार्थं अभरश्चक्रं सूर्यरथस्य नैतशो यमिन्द्र बलेन त्वं तदाहृतवान्। अथ तस्य शत्रून् अयजमानान् नवतिसंख्याकानां नदीनां पारं प्रत्युत्क्षिप्य तत्र तानवटमपि नीतवानसि ॥ (१३)

**त्वं नो॑ अ॒स्या इ॑न्द्र दु॒र्हणा॑याः पा॒हि व॑ज्रिवो दुरि॒ताद॒भीके॑ ।**

**प्र नो॒ वाजा॑न् र॒थ्यो॒३ अश्व॑बुध्यानि॒षे य॑न्धि॒ श्रव॑से सू॒नृता॑यै ॥**

त्वन्नः। त्वन्नो अस्या इन्द्र दुर्हणायाः अवत्याः[1] पाहि वज्रिवो दुरिताच्च संग्रामे। प्रयन्ध्यस्मभ्यं वाजाद्धनानि[2]। अथ युक्तान्यश्वमूलानि अन्नार्थं कीर्त्यर्थं सूनृतार्थं याचमानं प्रति[3]। ददानीति वाक् सूनृतेति ॥

त्वमस्मान् अस्याः सेनायाः दुर्भरणायाः पाहि वज्रिन् दुरिताच्च। संग्रामे प्रयन्धि चास्मभ्यं बलानि। रथ्यस्त्वमश्वैर्बोद्धव्यान् अन्नाय यशसे च सत्यायास्मान् प्रेरय ॥ (१४)

**मा सा ते॑ अ॒स्मत् सु॑म॒तिर्वि द॑स॒द्वाज॑प्रमहः॒ समिषो॑ वरन्त ।**

**आ नो॑ भज मघव॒न् गोष्व॒र्यो मंहि॑ष्ठास्ते सध॒माद॑ः स्याम ॥**

मा सा। मा विशुष्यतु सा त्वदीया सुमतिरस्मासु वाजप्रमहो धनैः प्रमहनीयः। इति षो[4]ऽस्मान् संवरन्त अभिकामयन्ताम्। आभजास्मान् गोष[5] स्वामी सर्वस्य तव मंहिष्ठाः स्तोत्रत + + + + लब्धधनाः[6] पुत्रपौत्रैः सधमादुः स्यामेति ॥

[1] Read अमत्याः

[2] Read वाजान् धनानि.

[3] Folio 87*b* ends here.

[4] Read इषो.

[5] Read गोषु.

[6] After स्तोत्रत the leaf is broken and about 4 letters are lost.

धातः किं द्विज साधु तेन चरितं किं तद्विधयाळन्[1]
किं ते तैः कृतमाहुरार्ये इमे[2] सूक्तं दुरुक्तं समम् ।
विस्पष्टं लिखिमेषु तच्च सदृशं प्रज्ञाश्च सृष्टा मया
प + + + + तादृशानहमिदं[3] श्रेष्ठं निरुक्तं मया[4] ॥

मा सा तव स्तोतृविषया सुमतिः अस्मासु शुष्यतु अतिशयेन पूजनीयान्न अस्मभ्यमन्नानि संवृण्वन्तु । आभज च मघवन् गोष्वस्मानीश्वरो दातृतमा वयं तुभ्यं गोभिः पुत्रैश्च सधमादः स्याम ॥ (१५)

ऋगर्थदीपिका सेयं प्रथमश्चायमष्टकः ।
कर्ता श्रीवेङ्कटार्यस्य तनयो माधवाह्वयः ॥

अष्टमोऽध्यायः

प्रथमोऽष्टकः समाप्तः

---

[1] Something lost. The word not certain.

[2] A letter lost before इमे.

[3] The end of the leaf is broken and 4 letters are wanting.

[4] The verse is very corrupt and it is not possible to construct it satisfactorily. This is about a fourth of the third line and there is हरिः ओं after this. Thus closes the work in the third line of folio 88*a*. The end of the *Adhyāya* and of the *Aṣṭaka* is not noticed in the manuscript.

# PUBLICATIONS OF THE ADYAR LIBRARY

## (The Theosophical Society, Adyar, Madras, 20, India)

Rs. A.

1910—1. A Preliminary List of the Saṃskṛt and Prākṛt MSS. in the Adyar Library. (Saṃskṛt-Devanāgarī) Boards ... 1-8 Cloth ... 2 0

1912—2. A Descriptive Catalogue of the Saṃskṛt MSS. in the Adyar Library. *By* F. O. Schrader, Vol. I, Upaniṣads Cloth ... 5 0

3. The Minor Upaniṣads (Saṃskṛt) critically edited for the Adyar Library. *By* F. O. Schrader, Vol. I.—Saṃnyāsa Cloth ... 10 0

1916—4. Ahirbudhnya-Saṁhitā of the Pāñcarātra Āgama (Saṃskṛt), 2 Vols. Cloth ... 10 0

5. Introduction (English) to the Pāñcarātra and the Ahirbudhnya Saṁhitā. *By* F. O. Schrader. Cloth ... 3 0

1920—6. Yoga Upaniṣads—20—with the Commentary of S'rī Upaniṣad Brahma Yogin. Edited *by* Paṇḍit A. Mahadeva Sastri ... 5 0

1921—7. Sāmānya Vedānta Upaniṣads—24—with the Commentary of S'rī Upaniṣad Brahma Yogin. Edited *by* Paṇḍit A. Mahadeva Sastri ... 5 0

1923—8. Vaiṣṇava Upaniṣads—14—with the Commentary of S'rī Upaniṣad Brahma Yogin. Edited *by* Paṇḍit A. Mahadeva Sastri ... 4 0

1925—9. S'aiva Upaniṣads—15—with the Commentary of S'rī Upaniṣad Brahma Yogin. Edited *by* Paṇḍit A. Mahadeva Sastri ... 3 0

10. S'ākta Upaniṣads—8—with the Commentary of S'rī Upaniṣad Brahma Yogin. Edited *by* Paṇḍit A. Mahadeva Sastri ... 2 8

1926—11. Catalogue of Saṁskṛt MSS. in the Adyar Library (Revised). 2 Vols. Each ... 3 12

1929—12. Saṁnyāsa Upaniṣads—17—with the Commentary of S'rī Upaniṣad Brahma Yogin. Edited *by* T. R. Chintamani, and the Paṇḍits of the Adyar Library ... 4 0

| | | Rs. | A. |
|---|---|---|---|
| 13. | RUKMIṆĪKALYĀṆA MAHĀKĀVYA by Rājacūḍāmaṇi Dīkṣita. Edited *by* the Paṇḍits of the Adyar Library and T. R. Chintamani ... | 2 | 0 |
| 1933—14. | UNPUBLISHED MINOR UPANIṢADS with the Commentary of S'rī Upaniṣad Brahma Yogin. Edited *by* the Paṇḍits of the Adyar Library ... | 5 | 0 |
| 1936—15. | TEN MAJOR UPANIṢADS with the Commentary of S'rī Upaniṣad Brahma Yogin. Edited *by* the Paṇḍits of the Adyar Library | | |
| | Is'a to Aitareya, Vol. I ... | 4 | 8 |
| | Chāndogya and Bṛhadāraṇyaka, Vol. II ... | 6 | 0 |
| | Vols. 1 and 2, Boards ... | 9 | 8 |
| 1937—16. | MELARĀGAMĀLIKĀ of Mahāvaidyanātha S'ivan. Edited *by* Paṇḍit S. Subrahmanya Sastri ... | 2 | 0 |
| 1938—17. | SAṀGRAHACŪḌĀMAṆI—Edited *by* Paṇḍit S. Subrahmanya Sastri ... | 5 | 0 |
| 18. | PRATYABHIJÑĀHṚDAYAM (The Secret of Recognition) with English Translation and Notes *by* K. F. Leidecker ... | 3 | 0 |
| 19. | BHAVASAṄKRĀNTI-SŪTRA AND NĀGĀRJUNA'S BHAVASAṀKRĀNTI S'ĀSTRA—with the Commentary of Maitreyinātha—with English Translation *by* Paṇḍit N. Aiyaswami Sastri ... | 2 | 4 |
| 20. | YOGA UPANIṢADS. Translated into English *by* T. R. Srinivasa Aiyangar, and Paṇḍit S. Subrahmanya Sastri ... | 5 | 0 |
| 21. | * WHERE THEOSOPHY AND SCIENCE MEET (in four Parts) by a body of experts—Edited *by* Professor D. D. Kanga: | | |
| | Part 1. Nature—From Macrocosm to Microcosm ... | 2 | 8 |
| | Part 2. Man—From Atom to Man ... | 2 | 8 |
| | Part 3. God—From Humanity to Divinity ... | 2 | 8 |
| | Part 4. Some Practical Applications ... | 2 | 8 |
| 1939—22. | ṚGVEDAVYĀKHYĀ, MĀDHAVAKṚTĀ—Edited *by* Prof. C. Kunhan Raja. Vol. I ... | 6 | 0 |
| 1940—23. | THE NUMBER OF RASAS *by* V. Raghavan, Department of Saṁskṛt, University of Madras ... | 3 | 0 |
| 1941—24. | SĀMĀNYA VEDĀNTA UPANIṢADS—Translated into English *by* T. R. Srinivasa Aiyangar and Paṇḍit S. Subrahmanya Sastri ... | 5 | 0 |
| 25. | BHAGAVADGĪTĀRTHAPRAKĀS'IKĀ of Upaniṣad Brahmayogin (Saṁskṛt). Edited *by* the Paṇḍits of the Adyar Library ... | 4 | 0 |

* *Published under the auspices of the Adyar Library Association.*

Rs. A.

26. SĀMAVEDA-SAṂHITĀ—With the Commentaries of Mādhava and Bharatasvāmin. Edited *by* Prof. C. Kunhan Raja ... 6 0

27. RĀJA DHARMA (Dewan Bahadur K. Krishnaswami Rao Lectures, 1938, University of Madras) *by* Rao Bahadur K. V. Rangaswami Aiyangar ... 3 8

28. VARIVASYĀRAHASYA of Bhāsurānandanātha (2nd Edition) *by* Paṇḍit S. Subrahmanya Sastri (with English Translation) ... 2 8

29. VYAVAHĀRANIRṆAYA OF VARADARĀJA—Edited *by* Rao Bahadur K. V. Rangaswami Aiyangar and A. N. Krishna Aiyangar ... 15 0

30. SAṂGĪTARATNĀKARA—With the Commentaries of Catura Kallinātha and Siṁhabhūpāla. Edited *by* Paṇḍit S. Subrahmanya Sastri. Vol. I. (Adhyāya 1) ... 9 0

1942—31. CATALOGUE OF THE ADYAR LIBRARY, Western Section. part 1 ... 5 0

32. ĀLAMBANAPARĪKṢĀ AND VṚTTI *by* Diṅnāga with English translation, Tibetan text etc. *by* Paṇḍit N. Aiyaswami Sastri ... 3 8

33. SOME CONCEPTS OF ALAṄKĀRA S'ĀSTRA *by* V. Raghavan, University of Madras .. 4 0

34. VEDĀNTAPARIBHĀṢĀ—with English translation and Notes *by* Prof. S. S. Suryanarayana Sastri ... 2 12

35. • A DESCRIPTIVE CATALOGUE of the Sanskrit Manuscripts in the Adyar Library *by* K. Madhava Krishna Sarma. Vol. I—Vedic ... 15 0

36. S'RĪ PĀÑCARĀTRA RAKṢĀ of S'rī Vedānta Des'ika—Edited *by* Vaidyaratna Paṇḍit M. Duraiswami Aiyangar and Vedānta S'iromaṇi T. Venugopalacharya ... 4 8

37. CATALOGUE OF THE ADYAR LIBRARY, Western Section, part 2 ... 6 0

38. CATURDAS'ALAKṢAṆĪ OF GADĀDHARA with three commentaries—Edited *by* Paṇḍit N. Santanam Aiyar. Vol. I ... 4 8

1943—39. PHILOSOPHY OF VIS'IṢṬĀDVAITA *by* Prof. P. N. Srinivasachari ... 10 0

40. VĀDĀVALĪ OF JAYATĪRTHA with English translation and Notes *by* P. Nagaraja Rao ... 4 0

41. SPINOZIAN WISDOM OR NATURAL RELIGION *by* James Arther ... 2 12

| | No. | | Rs. | A. |
|---|---|---|---|---|
| | 42 | USĀṆIRUDDHA of Rāmapāṇivāda. Edited *by* Paṇḍit S. Subrahmanya Sastri andProf. C. Kunhan Raja ... | 3 | 8 |
| 1944– | 43. | SAṀGĪTARATNĀKARA—With the Commentaries of Catura Kallınātha and Siṁhabhūpāla. Edited *by* Paṇḍit S. Subrahmanya Sastri. Vol. II. (Adhyāyas 2—4) ... | 9 | 0 |
| | 44. | ĀS'VALĀYANAGṚHYASŪTRA—With the Commentaries of Devasvāmin and Nārāyaṇa. Edıted *by* Svami Ravı Tirtha. Vol. I (Adhyāya 1) ... | 6 | 4 |
| | 45. | ALPHABETICAL INDEX OF SANSKRIT MANUSCRIPTS in the Adyar Lıbrary ... | 10 | 0 |
| | 46. | CATALOGUE OF THE ADYAR LIBRARY, Western Section, Part 3 ... | 7 | 0 |
| | 47. | ĀTMAN IN PRE-UPANIṢADIC VEDIC LITERATURE *by* H. G. Narahari ... | 8 | 0 |
| 1945— | 48. | RĀGAVIBODHA OF SOMANĀTHA wıth his own commentary Viveka. Edited by Paṇḍit S. Subrahmanya Sastri ... | 6 | 0 |
| | 49. | ACYUTARĀYĀBHYUDAYA OF RĀJANĀTHA ḌIṆḌIMA—Sargas 7 to 12. Edited *by* A. N. Krıshna Aıyangar ... | 3 | 8 |
| | 50. | THE ANCIENT WISDOM OF WALES *by* D. Jeffrey Williams ... | 1 | 4 |
| | 51. | SAṀGĪTARATNĀKARA OF S'ĀRṄGADEVA—Vol. I. Chapter 1. Englısh Translation *by* Prof. C. Kunhan Raja. Cloth Rs. 4-8. Boards ... | 4 | 0 |
| | 52. | VAIṢṆAVA UPANISADS. Translated ınto English *by* T. R. Srinivasa Aiyangar and G Srinivasa Murti ... | 10 | 0 |
| 1946— | 53. | NYĀYAKUSUMĀÑJALI of Udayanācārya—Translated ınto Englısh *by* Svamı Ravi Tırtha. (Vol. I– Books ı and ıı) .. | 4 | 0 |
| | 54. | PRĀKṚTAPRAKĀS'A OF VARARUCI with the Commentary of Rāmapāṇivāda. Edıted *by* Prof. C. Kunhan Raja and Paṇḍıt K. Ramachandra Sarma ... | 4 | 4 |
| | 55. | SPHOṬAVĀDA OF NĀGES'A—Edited *by* Paṇḍıt V. Krishnamacharya with his own Commentary ... | 3 | 12 |
| 1947— | 56. | THE CRADLE OF INDIAN HISTORY *by* C. R. Krishnamacharlu ... | 3 | 8 |
| | 57. | UNMATTARĀGHAVA OF VIRŪPĀKṢA—Edited *by* Paṇḍit V. Krishnamacharya ... | 1 | 12 |
| | 58. | ORIGIN AND SPREAD OF THE TAMILS (Sankara-Parvati Lectures, 1940, University of Madras) *by* V. R. Ramachandra Dikshitar ... | 3 | 8 |
| | 59. | JĪVĀNANDANAM OF ĀNANDARĀYAMAKHIN. Edited *by* Vaıdyaratna Paṇḍit M. Duraiswamı Aıyangar with his own Commentary. ... | 20 | 0 |

Rs. A.

60. A Descriptive Catalogue of Sanskrit MSS. in the Adyar Library, *by* Paṇḍit V. Krishnamacharya, Vol. VI—Grammar, Prosody and Lexicography ... 25 0

61. Ṛgvedavyākhyā of Mādhava, Vol. II, edited by Dr. C. Kunhan Raja. ... 15 0

## PAMPHLETS

### 1939

A Variant Version of the Ekāgnikāṇḍa. (Reprinted from the Adyar Library Bulletin, October, 1939). Edited *by* K. Madhava Krishna Sarma ... 0 3

### 1940

The Rājamṛgāṅka of Bhoja. (Reprinted from the Adyar Library Bulletin, October, 1940). Edited *by* K. Madhava Krishna Sarma. 0 4

### 1942

The Ṣaṭpañcās'ikā, a Silpas'āstra manual. (Reprinted from the Adyar Library Bulletin, February 1942). Edited *by* K. Madhava Krishna Sarma ... 0 5

The Pramāṇamañjarī of Sarvadeva. (Reprinted from the Adyar Library Bulletin, May, 1942). Edited *by* K. Madhava Krishna Sarma, ... 0 6

A List of Manuscripts (Reprinted from the Adyar Library Bulletin, Oct., 1942) ... 1 0

The Path of Greatness. (Reprinted from the Adyar Library Bulletin, December, 1942), *by* Dr. G. S. Arundale ... 0 6

### 1943

Vis'eṣāmṛta of Tryambaka Mis'ra. An orthographical lexicon. Edited *by* H. G. Narahari (Reprinted from the Adyar Library Bulletin, May, 1943) ... 0 12

A Sanskrit Letter of Mohamad Dara Shukoh with English Translation and Notes *by* Prof. C. Kunhan Raja. (Reprinted from the Adyar Library Bulletin, Oct. 1940, May and October, 1943) ... 0 12

### 1946

Dharmacauryarasāyana—Edited by H. G. Narahari, (Reprinted from the Adyar Library Bulletin, October and December 1946)... 1 12

## IN THE PRESS

Caturdas'alaksaṇī of Gadādhara with three commentaries. Vol. II *by* Paṇḍit N. Santanam Aiyar.

ĀPASTAMBASMṚTI—Edited *by* A. N. Krishna Aiyangar.

SAṀGĪTARATNĀKARA—With the Commentaries of Catura Kallinātha and Siṁhabhūpāla. Edited *by* Paṇḍit S. Subrahmanya Sastri, Vol III.

HORĀS'ĀSTRA—with the commentary Apūrvārthapradars'ikā *by* A, N. Srinivasaraghava Aiyangar.

SĀLISTAMBHASŪTRA—Restored from Tibetan and Chinese Sources—*by* Paṇḍit N. Aiyaswami Sastri.

SAṀGĪTARATNĀKARA, English Translation—Vol. II, *by* Prof. C. Kunhan Raja.

SAṀKALPASŪRYODAYA OF S'RĪ VEṄKAṬANĀTHA with the Commentaries Prabhāvilāsa and Prabhāvali. Edited *by* Paṇḍit V. Krishnamacharya.

HARICARITA OF PARAMES'VARA—Edited *by* Pandit V. Krishnamacharya with his own Commentary.

## READY FOR THE PRESS

ĀS'VALĀYANAGṚHYASŪTRA with the Commentaries of Devasvāmin and Nārāyaṇa. Vol. II. Edited *by* Svami Ravi Tirtha.

NYĀYAKUSUMĀÑJALI OF UDAYANA with the Commentary of Varadarāja. Edited *by* Prof. C. Kunhan Raja.

GAUTAMASMṚTI—Edited *by* A. N. Krishna Aiyangar.

CATURDAS'ALAKṢAṆĪ OF GADĀDHARA—with Commentaries—Edited *by* Paṇḍit N. Santanam Aiyar, Vol. III.

PAKṢATĀ OF GADĀDHARA—with four commentaries *by* Paṇḍit N. Santanam Aiyar.

SIDDHĀNTALAKṢAṆAM OF GADĀDHARA with commentaries. Edited *by* Paṇḍit N. Santanam Aiyar.

AVAYAVA OF GADĀDHARA—with commentaries *by* Paṇḍit N. Santanam Aiyar.

SĀMĀNYANIRUKTI OF GADĀDHARA with commentaries. Edited *by* Paṇḍit N Santanam Aiyar

VYUTPATTIVĀDA OF GADĀDHARA with commentaries. Edited *by* Paṇḍit N. Santanam Aiyar.

A DESCRIPTIVE CATALOGUE of Sanskrit MSS. in the Adyar Library, *by* H. G. Narahari, Vol. V—Poetry, Drama and Poetics.

S'AIVA AND S'ĀKTA UPANIṢADS—Translated into English *by* T. R. Srinivasa Aiyangar and G. Srinivasa Murti.

TEN MAJOR UPANIṢADS—English Translation *by* T. R. Srinivasa Aiyangar and G. Srinivasa Murti.

---

*Agents for our publications :*

**THE THEOSOPHICAL PUBLISHING HOUSE**

**Adyar, Madras, S. India**